प्रकाशिका - 11
Prakashika - 11

Volume 1



जैमिनीयसामवेदसंहिता

(मूल केरलपरम्परानुसार)

आर्चिक, साम तथा चन्द्रासाम भाग

सम्पादक
के.ए. रवीन्द्रन

राष्ट्रीय पाण्डुलिपि मिशन
॥ विज्ञानमुपास्व ॥
National Mission for Manuscripts

Jaiminīyasāmavedasaṃhitā

Text of Kerala Tradition

(Ārcika, Sāma and Candrāsāma Portions)

Prakashika
Series - 11

General Editor
Dipti S. Tripathi

Jaiminīyasāmavedasaṃhitā

Text of Kerala Tradition

(Ārcika, Sāma and Candrāsāma Portions)

Volume - 1

Editor

K. A. Ravindran

NATIONAL MISSION FOR MANUSCRIPTS
New Delhi
&
NAG PUBLISHERS
Delhi

Published by
National Mission for Manuscripts
No. 11, Mansingh Road,
New Delhi - 110001
Phone: (011) 2338, 3894; Fax: 2307 3340
E. mail : director.namami@mic.in

Co-Published by :
Nag Publishers,
11-A (U. A), Jawahar Nagar,
Delhi - 110007 (India)
Phone - (011) 2385 7975, 2385 5883
E. Mail - nagpublishers@rediffmail.com

ISBN - 978-93-80829-02-9 (series)

ISBN - 978-93-80829-20-3

First published in India 2013

© National Mission for Manuscripts, New Delhi

Price ₹ 600.00 (2 vols. set)

All rights reserved, No part of this publication may be reproduced or transmitted in any form or by any means, eletronic or mechanical, including photocopying, recording or any information storage or retrieval system, without prior written permission of both the copyright owner, indicatd above, and the phublisher.

Printed by : G. Offset Press, 308/2 Sahazadabagh, Dayabasti, New Delhi - 1100035

जैमिनीयसामवेदसंहिता

(मूल केरलपरम्परानुसार)

आर्चिक, साम तथा चन्द्रासाम भाग

प्रथम भाग

सम्पादक

के. ए. रवीन्द्रन

राष्ट्रीय पाण्डुलिपि मिशन

नई दिल्ली

तथा

नाग पब्लिशर्स

दिल्ली

प्रकाशक
राष्ट्रीय पाण्डुलिपि मिशन,
11. मानसिंह रोड़,
नई दिल्ली –110001
(भारत)

सहायक प्रकाशक
नाग पब्लिशर्स
11–ए, यू. ए., जवाहर नगर,
दिल्ली – 110007
(भारत)

प्रथम संस्करण 2013

ISBN - 978-93-80829-02-9 (series)

ISBN - 978-93-80829-20-3

मूल्य : ₹ 600.00 (दो भागों का)

© राष्ट्रीय पाण्डुलिपि मिशन

राष्ट्रीय पाण्डुलिपि मिशन, 11. मानसिंह रोड़, नई दिल्ली –110001 (भारत) द्वारा प्रकाशित तथा नाग पब्लिशर्स, 11–ए, यू. ए., जवाहर नगर, दिल्ली – 110007 के सहयोग से जी. प्रिन्ट प्रासेस, 308/2 शहजादाबाग, दयाबस्ती द्वारा मुद्रित।

CONTENT

Volume - 1

Key to Transliteration VIII

Foreword - Dipti S. Tripathi IX

Prologue - K. K. N. Kurup XI

Preface - Editor XV

Jaiminīyasāmavedasaṃhitā -
(Ārcika Portion)

Text of Kerala Tradition

Āgneyam Kāṇḍam 1

Aindram Kāṇḍam 17

Pavamānam Kāṇḍam 64

Dvādaśāham Kāṇḍam 81

Uttara Kāṇḍam 167

Key to Transliteration

VOWELS

अ a	आ ā	इ i	ई ī	उ u	ऊ ū
(b<u>u</u>t)	(p<u>a</u>lm)	(<u>i</u>t)	(b<u>ee</u>t)	(p<u>u</u>t)	(p<u>oo</u>l)
ऋ ṛ	ए e	ऐ ai	ओ o	औ au	
(<u>rhy</u>thm)	(pl<u>ay</u>)	(<u>air</u>)	(t<u>oe</u>)	(l<u>ou</u>d)	

CONSONANTS

Guttural	क ka	ख* kha	ग ga	घ gha	ङ ṅa
	(s<u>k</u>ate)	(block<u>h</u>ead)	(gate)	(g<u>h</u>ost)	(si<u>ng</u>)
Palatal	च ca	छ cha	ज ja	झ jha	ञ ña
	(<u>ch</u>unk)	(catc<u>hh</u>im)	(john)	(hedge<u>h</u>og)	(bu<u>n</u>ch)
Cerebral	ट ṭa	ठ* ṭha	ड/ड़ ḍa	ढ*/ढ़ ḍha	ण* ṇa
	(s<u>t</u>art)	(ant<u>h</u>ill)	(<u>d</u>art)	(god<u>h</u>ead)	(u<u>n</u>der)
Dental	त ta	थ tha	द da	ध dha	न na
	(pa<u>th</u>)	(<u>th</u>under)	(<u>th</u>at)	(brea<u>th</u>e)	(<u>n</u>umb)
Labial	प pa	फ* pha	ब ba	भ bha	म ma
	(sp<u>i</u>n)	(<u>ph</u>ilosop<u>h</u>y)	(<u>b</u>in)	(a<u>bh</u>or)	(<u>m</u>uch)
Semi-vowels	य ya	र ra	ल la	व va	
	(<u>y</u>oung)	(d<u>r</u>ama)	(<u>l</u>uck)	(<u>v</u>ile)	
Sibilants	श śa	ष ṣa	स sa	ह ha	
	(<u>sh</u>ove)	(bu<u>sh</u>el)	(<u>s</u>o)	(<u>h</u>um)	
Others	क्ष kṣa	त्र tra	ज्ञ jña	ळ* l	ॠ* ṝ
	(*k<u>s</u>ātriya*)	(*<u>tr</u>iśūla*)	(*<u>jñ</u>ānī*)	(pl<u>ay</u>)	

अं *(—)* *ṁ* or *ṃ amusūra* (nasalisation of preceding vowel) like *sa<u>ṁ</u>skṛti/or soṃskṛti*

अः *visarga* = *ḥ* (aspiration of preceding vowel like (*prātaḥ*)

ऽ *Avagraha* consonant #' consonant (like-*imé vasthitā*)

Anusvāra at the end of a line is presented by m (म्) and not *ṁ*

*No exact English equivalents for these letters.

FOREWORD

The Vedic tradition in India has a hoary past as historical dating of this tradition has failed to yield universally acceptable results. However, without getting into the rhetoric of dating this tradition one would like to place it at the antiquity of at least 5000 years. It is unique in several aspects besides its date; it has been a living tradition all through these years, has survived assault of time, has been carried forward by dedicated groups of people in all regions of the country and above all, till the beginning of 18th century, has survived purely as an oral tradition.

The industrial revolution in the 18th century changed the world in a manner where things would never be the same as they were before the revolution. It had a worldwide impact and India is no exception. Though the impact was felt in this country much later than in the West it surely and certainly changed the way in which the Indian mind was conditioned to work for hundreds of years. The printing press made texts more easily available to readers and this had an effect on oral literary tradition.

The oral Vedic tradition of three Saṃhitās - Ṛk, Yajus and Sāma - had different recensions according to geographical locations. These recensions were known as śākhās. According to Patañjali, Sāmaveda had the largest number of śākhās, around one thousand. Similarly, there were twentyone śākhās of the Ṛgveda, one hundred one of Yajurveda and nine of Atharvaveda (ekaśatamadhvaryu śākhāḥ sahasravartmā sāmaveda ekaviṃśatidhā bāhvṛcyaṃ navadhātharvaṇo vedo; Mbh. Paspaśā). Each śākhā had its peculiarity in the way mantras were recited. The Sāmaveda, being the musical rendition of mantras has very unique styles of recitation depending on different regions. As the oral tradition of Vedas started to wane, some śākhās were completely lost and others were restricted to limited number of zealous followers. Of the thousand śākhās of Sāmaveda only three have survived the ravages of time. These are Kauthuma, Rāṇāyanīya and Jaiminīya. The Namputiris of Kerala follow the Jaiminīya tradition which is named after the Rishi Jaimini. This tradition is also followed in the Tamil region but due to lack of encouragement it is almost on the verge of extinction there. In Kerala, the Namputiris have preserved their unique style of recitation but their dwindling numbers is cause for worry. In order to preserve this tradition,

it was felt necessary to create transcripts of the oral renderings. Accordingly transcripts were obtained from Namputiri families.

The Jaiminīya Sāmaveda in the Kerala tradition consists of Ārcika, Sāma and Candrasāma pāṭhas, two pāṭhas Ūha and Uśani have been lost and pundits fully equipped to recite all the five pāṭhas are a rarity. The Prakṛtipāṭhas need to be preserved in different formats to save this tradition from becoming totally extinct. Efforts at keeping the oral tradition alive as well as making available the written form will prove helpful in saving a dying tradition.

The Sāmaveda rendition of Kerala has remained unpublished in its entirety till date. A few publications like the one by Dr. Raghuvira in Devanagari from Lahore in 1938 and by Dr. Ravindran in 2007 are there, but they do not include the whole text. Besides, the Raghuvira version is different from the text followed by Kerala Namputiris. The edition published by Dr. Ravindran contains only Ārcika portion comprising 1698 hymns. Thus there is no complete edition available of the Jaiminīya Sāmaveda. This edition fills this desideratum. It is sourced from the transcripts of Namputiri scholars of Thrissur district in Kerala. The text contains the Ārcika, Sāma and Candrasāma pāṭhas of the Jaiminīya Sāmaveda. The whole text is given in Malayalam script as transcribed by the Namputiri pundits. Devanagari transcription of the Malyalam version has also been given with a view to wider dissemination.

The National Mission for Manuscripts is thankful to Dr. K.A. Ravindran of Shri Sankaracharya University, Kaladi for the pains he has taken to compile and transcribe this text from original Malyali transcripts. I would also like to thank Shri Surendra Pratap Singh of Nag Publishers for the keen interest he has shown in publication of this volume. I do hope this text will not only help in preserving the Jaiminīya Sāmaveda tradition in written format but will also prove to be a source of inspiration to scholars to undertake research in this field and also to unearth more such traditions which are on the verge of extinction.

New Delhi
Rakshabandhan
20 August, 2013

Dipti Tripathi
Director

PROLOGUE

I have great pleasure to write these lines as Prologue to the present work: *Jaiminīyasāma- vedasaṃhitā - Text of Kerala Tradition,* published with the financial assistance from National Mission for Manuscripts (NMM), New Delhi. This includes the entire Samhitā of Sāmaveda learnt and followed by the Nampūtiri Sāmavedins of Kerala. The present volume is compiled and edited by Dr. K. A. Ravindran, Associate Professor of Sanskrit-Sahitya; in-charge-of Sanskrit-Vedic Studies, Sree Sankaracharya University of Sanskrit, Kalady, Ernakulam Dist. Kerala.

Kerala has a great tradition of Vedic learning from centuries ago which has many unique features when compared to that of the other parts of India. The particular kind of *Svaras* used in the chanting of all the three Vedas, Ṛk, Yajus and Sāma is very peculiar to Kerala. The pronunciation of letters while chanting the Vedic hymns by Kerala Nambūtiris also has many phonetic significances. The ritual tradition of Kerala related to Yāgas is also very peculiar.

Jaiminīyasāmaveda tradition studied and followed by the Nambūtiris of Kerala is very unique in its elaboration of *Svaras* and modes of chanting. The arrangement of the text of the Kerala version of *Jaiminīyasāmavedasaṃhitā* is different from that of other parts of India. The text of this tradition was preserved in transcripts only till very recent times. It is due to the sincere efforts of Dr. K.A. Ravindran, the editor of the present work, that the entire Saṃhitā of the Kerala version of *Jaiminīyasāmaveda* is brought to light in the printed form. Earlier Dr. K.A. Ravindran has published the text of *Jaiminīyasāma* (Ārcika portion only, comprising 1698 hymns) in Malayalam script in his book

Sāmavedadarpaṇam (2007). It was the first ever step taken to print the *Jaiminīyasāmaveda* text of Kerala.

The present edition including the whole *Jaimīnīyasāmavedasaṃhitā* comprising the Ārcikā, Sāmagāna (Grāmageyagāna) and Candrāsāma (Āraṇyageyagāna) portions, learnt by the Nambūtiris of Kerala, is the first attempt to print the entire text in Devanagari script. The Saṃhitā of *Jaiminīyasāmaveda* including the above mentioned *Prakṛtipāṭha* portions together have been reconstructed from the transcripts possessed by the Nambūtiris Sāmaveda scholars of Kerala at Pāññāl village in Thrissur Dist, Kerala. It was the continuous endeavour of Dr. K.A. Ravindran that this publication became fruitful. I congratulate him for the sincere efforts that he undertook for compiling and editing the whole text from the transcripts. He is working enthusiastically in the field of Vedic studies and has published and edited several other works related to Vedic Studies in Malayalam and English. I hope he will continue his efforts and enthusiasm in preserving the Kerala Vedic tradition in the future also.

NMM was kind enough to sanction financial assistance to publish this work in this way, when I was working as Director General at the Centre for Heritage Studies, Hill Palace Thrippunithura, Kochi, Kerala. I extend my sincere thanks to the authorities of NMM for sanctioning the financial assistance to preserve this intangible heritage. I am extremely thankful to Prof. C.M. Neelakandhan who has initiated the Centre for Heritage Studies in the scheme of publication of Sanskrit manuscipts and other works with the financial assistance from NMM, New Delhi, when I was the Director General of the centre. The editing and publishing of many important works like *Dhvanyāloka* of Ānandavardhana with *Locana* commentary of Abinavagupta and published and unpublished commentaries on Locana from Kerala in two big volumes, was done at that time under the leadership and guidance of Prof. C.M. Neelakandhan. I feel that such works

and guidance of Prof. C.M. Neelakandhan. I feel that such works are the landmarks in the heritage studies undertaken by the centre. I appreciate Dr. Ravindran once more for his dedicated service and with great delight I introduce this book to the lovers of Sanskrit and Students of Vedic lore.

Kozhikkod,
01.01.2013.

K. K. N. Kurup
Coordinating Editor,
Centre for Heritage Studies,
Hill Palace, Thrippunithura,
Kochi, Kerala.

PREFACE

This volume is the Saṃhiā of Jaiminīyasāmaveda (JSV) learnt and preserved by the Nampūtiris of Kerala. The Saṃhitā is constituted by Ārcika, Sāma and Candrāsāma (also called Candrāsyāma, the etymology and meaning of the word is not clear) portions, each characterized by textual difference and variation in the modes of chanting. The Saṃhitā of this branch, incorporating these three portions, has not been published in āgarī script so far. Hence the present edition has remarkable significance.

Of the several branches of Sāmaveda, only three exist today and they are Kauthūma, Rāṇāyaṇīya and Jaiminīya. Among the three, Jaiminīyasaṃhitā is followed by the Nambūtiris of Kerala. There were twenty one Nampūtiri families following JSV in Kerala. Besides the Nampūtiri tradition, there is the Tamil tradition of JSV also located at Kodunthirappully Village at Palakkat, which also is in the verge of extinction. Due to several reasons, the younger generation is not interested in keeping up this heritage and hence both these traditions are struggling for existence. Even among the living traditional Pandits, fully equipped with all the five *Pāṭhas* viz, Ārcika, Sāma and Candrāsāma, Ūha and Ūṣāṇi, are now absent in both traditions. Therefore the compilation of all those *Prakṛtipāṭhas* together becomes a necessity for the preservation of this great heritage.

Taking into account the pitiable condition of the Sāmaveda tradition of Kerala that it may disappear soon due to the absence of learned scholars, School of Vedic Studies of Sree Sankaracharya University of Sanskrit, Kalady launched a project in 1997-98 and preserved the Nampūtiri Jaiminīya chanting tradition in audio/video tapes using the traditional Pandits viz. Sri Neelakanthan Namputiri and Sri Vasudevan Namputiri of Nellikkattil Mamannu Mana, Sri Aryan Namputiri and Sri

Narayanan Namputiri of Thottathil Mna, and Late Sri Vasudevan Namputiri of Perumangattu Mana, all located at the village Pāññāl, in Thrissur Dist., Kerala. The Ārcika portion of the Jaiminīyasāmaveda and some Sāmastutis used in Somayāga and Atirātra in Ūha and Ūṣāṇṇī modes of chanting were recorded at that time. The recording was conducted at the premises of Lakṣmīnārāyaṇa temple at Pāññāl. During that period, as a continuation of the recording, the present scholar had prepared the Ārcika portion of the text comprising 1698 hymns in both Malayalam and Devanagari scripts. It was based on the transcripts obtained from the Nampūtiri families - Nellikkattil Mamannu Mana, Muttathukattil Mamannu Mana, Thottathil Mana, Perumangattu Mana and Korattikkara Mana, The Ārcika portion in Malayalam language is published for the first time as appendix in the book authored by the present scholar (*Sāmavedadarpaṇam*: Kanippayyur Sankaran Namboothirippad Smaraka Granthasala Publication – 2007). Dr. Raghuvira has published the Ārcika portion of Jaiminīyasāmaveda in Devanagari script in 1938 from Lahore. But that edition was different from the text followed by the Kerala Nampūtiris in the arrangement of Mantras and chapter divisions. These aspects also make this publication relevant and important.

The *Prakṛtipāṭhas* other than Arcika viz. Grāmageya (Sāmagāna) and Āraṇyageya (Candrāsāma) of Jaiminīyasāmaveda followed by Kerala Pandits are not available in transcript form till recent time. On the request of the present scholar, Sri Vasudevan Nampūtiri of Nellikkattil Mamannu Mana agreed to prepare the text of Sāmagāna and Āraṇyageyagāna–the *Prakṛtipāṭhas* of the text. Accordingly Sri Vasudevan Nampūtiri, with the help of his elder brother Neelakandhan Nampūtiri prepared the transcript ready for publication. I, with extreme sincerity and obedience, extend my heart felt gratitude to those scholars for their valuable service in preserving this great and intangible heritage.

The following peculiarities in pronunciation are observed during the chanting of Sāmaveda by Nampūtiris of Kerala. They pronounce *ẕe* for *ḻe* (*agnimīẕe - agnimīḻe*), *ñu* for *nu* (*vyaśñuhi -*

vyaśnuhi), *ri* for *r*, (*bariham - barham*), *ḷ* for *ḍ* (*udānaḷ - udānad*), *vaṁvo* for *vamvo* (*dāśivaṁvo - dāśivamvo*), *viṇṇa* for *vṇa* (arāviṇṇa - arāvṇa), *khthe* for *kte (ukhthebhi* for *uktebhi)* and *dbhma* for *dhma (yudbhmam* for *yudhmam).* It is to be imagined that these changes of certain syllables in pronunciation may be due to the stretching up of words/letters at the time of chanting the Mantras. Nothing is known definitely regarding the source of these changes, which has to be determined only after undergoing deep investigation in the subject.

This volume is published with the financial assistance obtained from National Mission for Manuscripts (NMM), New Delhi to Centre for Heritage Studies (CHS), Hill Palace, Thrippunithura, Kerala. I extend my sincere thanks to NMM for their concern and deep interest in restoring these traditions by providing the financial support. I am also thankful to Dr. K.K.N. Kurup. Former Director General of CHS for the steps taken by him for the preservation of this tradition by publishing this text. My thanks are due to Dr. C. M. Neelakandhan, Former Professor-in-charge of Sanskrit – Vedic Studies Dept., SSUS Kalady, Kerala for the valuable guidance rendered by him in the preparation of this book. The present editor feels that the preparation and study of these traditional knowledge systems having historical, cultural and social significance is very necessary for carrying out serious and fruitful researches and studies in Vedic texts in the modern time. With these words, I submit the present volume to the world of scholars.

Kalady
12.12.2012

Editor

ജൈമിനീയസാമവേദം

ആർചികം

കേരളപാഠം (1698 ഋക്കുകൾ)

കാണ്ഡം 1 - ആഗ്നേയം

। जैमिनीयसामवेदम् आर्चिकम्।

केरळपाठम् (१६९८ ऋचः)

काण्डम् - १ - आग्नेयम्।

1

1. അഗ്ന ആയാഹി വീതയേ/ ഗൃണാനോ ഹവ്യദാതയേ/
നിഹോതാ സത്സി ബർഹിഷി/ 1

2. ത്വമഗ്നേ യജ്ഞാനാം ഹോതാ/ വശ്വേഷാം ഹിതഃ/
ദേവേഭിർമാനുഷേ ജനേ/ 2

3. അഗ്നിന്ദൂതം വൃണീമഹേ/ ഹോതാരം വിശ്വവേദസം/
അസ്യ യജ്ഞസ്യ സുക്രതും/ 3

4. അഗ്നിർവൃത്രാണി ജങ്ഘനത്/ ദ്രവിണസ്യുർവിപന്യയാ/
സമിദ്ധശ്ശുക്ര ആഹുതഃ / 4

5. പ്രേഷ്ഠം വോ അതിഥിം/ സ്തുഷേ മിത്രമിവ പ്രിയം/
അഗ്നേ രഥന്ന വേദ്യം/ 5

6. ത്വന്നോ അഗ്നേ മഹോഭിഃ/ പാഹി വിശ്വസ്യാ അരാതേഃ/
ഉത ദ്വിഷോ മർത്യസ്യ/ 6

7. ഏഹ്യൂഷു ബ്രവാണി തേ/അഗ്ന ഇത്ഥേതരാ ഗിരഃ/
ഏഭിർവർധാസ ഇന്ദുഭിഃ/ 7

8. ആ തേ വത്സോ മനോ യമത്/പരമാച്ചിത്സധസ്ഥാത്/
അഗ്നേ ത്വാം കാമയേ ഗിരാ/ 8

9. ത്വാമഗ്നേ പുഷ്കരാദധി/അഥർവാ നിരമന്ഥത/
മൂർധ്നോ വിശ്വസ്യ വാഘതഃ/ 9

10. അഗ്നേ വിവസ്വദാഭര/അസ്മഭ്യമൂതയേ മഹേ/
ദേവോ ഹ്യസി നോ ദൃശേ/ 10

१

१.. अग्न आयाहि वीतये। गृणानो हव्यदातये। निहोता सत्सि बर्हिषि।। १

२. त्वमग्ने यज्ञानां होता। विश्वेषां हितः। देवेभिर्मानुषे जने।। २

३. अग्निन्दूतं वृणीमहे। होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्।। ३

४. अग्निर्वृत्राणि जङ्घनत्। द्रविणस्युर्विपन्यया। समिद्धश्शुक्र आहुतः।। ४

५. प्रेष्ठं वो अतिथिम्। स्तुषे मित्रमिव प्रियम्। अग्ने रथन्न वेद्यम्।। ५

६. त्वन्नो अग्ने महोभिः। पाहि विश्वस्या अरातेः। उत द्विषो मर्तस्य।। ६

७. एह्यूषु ब्रवाणि ते। अग्न इत्थेतरा गिरः। एभिर्वर्धास इन्दुभिः।। ७

८. आ ते वत्सो मनो यमत्। परमाच्चित् सथस्थात्। अग्ने त्वाङ्कामये गिरा।। ८

९. त्वामग्ने पुष्करादधि। अथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः।। ९

१०. अग्ने विवस्वदाभर। अस्मभ्यमूतये महे। देवो ह्यसि नो दृशे।। १०

2

1. നമസ്തേ അഗ ഓജസേ/ ഗൃണന്തി ദേവ കൃഷ്ടയഃ/
അമൈരമിത്രമർദയ/ 11

2. ദൂതം വോ വിശ്വവേദസം/ ഹവ്യവാഹമമർത്യം/
യജിഷ്ഠമൃഞ്ജസേ ഗിരാ/ 12

3. ഉപ ത്വാ ജാമയോ ഗിരഃ/ ദേദിശതീർഹവിഷ്കൃതഃ/
വായോരനീകേ അസ്ഥിരൻ/ 13

4. ഉപ ത്വാഗ്നേ ദിവേ ദിവേ/ ദോഷാവസ്തർധിയാ വയം/
നമോ ഭരന്ത ഏമസി/ 14

5. ജരാബോധ തദ്വിവിഡ്ഢി/ വിശേവിശേ യജ്ഞിയായ/
സ്തോമം രുദ്രായ ദൃശീകം/ 15

6. പ്രതിത്യഞ്ചാരുംമധ്വരം/ ഗോപീഥായ പ്രഹൂയസേ/
മരുദ്ഭിരഗ്ന ആ ഗഹി/ 16

7. അശ്വന്നത്വാ വാരവന്തം/ വന്ദധ്യാ അഗ്നിം നമോഭിഃ/
സമ്രാജന്തമധ്വരാണാം/ 17

8. ഒൗർവ ഭൃഗുവച്ഛുചിം/ അപ്നവാനവദാഹുവേ/
അഗ്നിം സമുദ്രവാസസം/ 18

9. അഗ്നിമിന്ധാനോ മനസാ/ ധിയം സചേത മർത്യഃ/
അഗ്നിമിന്ധേ വിവസ്വഭിഃ/ 19

10. ആദിത്പ്രത്നസ്യ രേതസഃ/ ജ്യോതിഃ പശ്യന്തി വാസരം/
പരോ യദിധ്യതേ ദിവി/ 20

२

१. नमस्ते अग्न ओजसे। गृणन्ति देव कृष्टयः। अमैरमित्रमर्दय।। ११
२. दूतं वो विश्ववेदसम्। हव्यवाहममर्त्यम्। यजिष्ठमृञ्जसे गिरा।। १२
३. उप त्वा जामयो गिरः। ददिशतीर्हविष्कृतः। वायोरनीके अस्थिरन्।। १३
४. उप त्वाग्ने दिवे दिवे। दोषावस्तर्धिया वयम्। नमो भरन्त एमसि।। १४
५. जराबोध तद्विविड्ढि। विशेविशे यज्ञियाय। स्तोमं रुद्राय दृशीकम्।। १५
६. प्रतित्यञ्चारुमध्वरम्। गोपीथाय प्रहूयसे। मरुत्भिरग्न आगहि।। १६
७. अश्वन्नत्वा वारवन्तम्। वन्दध्या अग्निन्नमोभिः। सम्राजन्तमध्वराणाम्।। १७
८. और्व भृगुवच्छुचिम्। अप्नवानवदाहुवे। अग्निं समुद्रवाससम्।। १८
९. अग्निमिन्धानो मनसा। धियं सचेत मर्त्यः। अग्निमिन्धे विवस्वभिः।। १९
१०. आदित्प्रत्नस्य रेतसः। ज्योतिःपश्यन्ति वासरम्। परो यदिध्यते दिवि।। २०

3

1. അഗ്നിം വോ വൃധന്തം/ അധ്വരാണാം പുരൂതമം/
അച്ഛാ നപ്ത്രേ സഹസ്വതേ/ 21
2. അഗ്നിസ്തിഗ്മേന ശോചിഷാ/ യം സദ്വിശ്വന്യാത്രിണം/
അഗ്നിർനോ വംസതേ രയിം/ 22
3. അഗ്നേ മൃളമഹം അസി/ അയ ആ ദേവയും ജനം/
ഇയേഥ ബർഹിരാസദം/ 23
4. അഗ്നേ രക്ഷാണോ അംഹസഃ/ പ്രതി സ്മ ദേവ രിഷതഃ/
തപിഷ്ഠൈരജരോ ദഹ/ 24
5. അഗ്നേ യുങ്ക്ഷ്വാ ഹി യേ തവ/
ആശ്വാസോ ദേവസാധവഃ/ അരം വഹന്ത്യാശവഃ/ 25
6. നിത്വാ നക്ഷ്യ വിശ്പതേ/ ദ്യുമന്തം ധിമഹേ വയം/
സുവീരമഗ്ന ആഹുത/ 26
7. അഗ്നിർമൂർധാ ദിവഃ ക്കകുത്/ പതിഃ പൃഥിവ്യാ അയം/
അപാം രേതാംസി ജിന്വതി/ 27
8. ഇമമൂഷുത്വമസ്മാകം/ സനിം ഗായത്രം നവ്യാംസം/
അഗ്നേ ദേവേഷു പ്ര വോചഃ/ 28
9. തന്ത്വാ ഗോപവനോ ഗിരാ/ ജനിഷ്ഠദഗ്നേ അങ്ഗിരഃ/
സ പാവക ശ്രുധീ ഹവം/ 29
10. പരി വാജപതിഃ കവിഃ/ അഗ്നിർഹവ്യാന്യക്രമീത്/
ദധദ്രത്നാനി ദാശുഷേ/ 30
11. ഉദുത്യം ജാതവേദസം/ ദേവം വഹന്തി കേതവഃ/
ദൃശേ വിശ്വായ സൂര്യം/ 31

12. കവിമഗ്നിമുപസ്തുഹി/ സത്യധർമാണമധ്വരേ/
ദേവമമീവ ചാതനം/ 32
13. ശന്നോദേവീരഭീഷ്ടയേ/ ശന്നോ ഭുവന്തു പീതയേ/
ശം യോരഭിസ്രവന്തു നഃ/ 33
14. കസ്യ നൂനം പരിണസി/ ധിയോ ജിന്വസി സത്പതേ/
ഗോഷാതാ യസ്യ താ ഗിരഃ/ 34

३

1. अग्निं वो वृधन्तम्। अध्वराणां पुरूतमम्। अच्छा नप्त्रे सहस्वते।। २१
२. अग्निस्तिग्मेन शोचिषा। यं सद्विश्वन्यात्रिणम्। अग्निर्नो वंसते रयिम्।। २२
३. अग्ने मृऴमहम् असि। अय आ देवयुञ्जनम्। इयेथ बर्हिरासदम्।। २३
४. अग्ने रक्षाणो अंहसः। प्रति स्म देव रिषतः। तपिष्ठैरजरो दह।। २४
५. अग्ने युङ्क्ष्वा हि ये तव। आश्वासो देवसाधवः। अरं वहन्त्याशवः।। २५
६. नित्वा नक्ष्य विश्पते। द्युमन्तन्धीमहे वयम्। सुवीरमग्न आहुत।। २६
७. अग्निर्मूर्धा दिवः ककुत्। पतिःपृथिव्या अयम्। अपां रेतांसि जिन्वति।। २७
८. इममूषुत्वमस्माकम्। सनिङ्गायत्रन्नव्यांसम्। अग्ने देवेषु प्रवोचः।। २८
९. तन्त्वा गोपवनो गिरा। जनिष्ठदग्ने अङ्गिरः। स पावक श्रुधी हवम्।। २९
१०. परि वाजपतिः कविः। अग्निरहव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे।। ३०
११. उदुत्यञ्जातवेदसम्। देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।। ३१
१२. कविमग्निमुपस्तुहि। सत्यधर्माणमध्वरे। देवममीव चातनम्।। ३२
१३. शन्नोदेवीरभीष्टये। शन्नो भुवन्तु पीतये। शय्योरभिस्रवन्तु नः।। ३३
१४. कस्य नूनं परिणसि। धियो जिन्वसि सत्पते। गोषाता यस्य ता गिरः।। ३४

4

1. യജ്ഞായജ്ഞാ വോ അഗ്നയേ/ ഗിരാ ഗിരാ ച ദക്ഷസേ/
പ്ര പ്ര വയമമൃതഞ്ജാതവേദസം/പ്രിയം മിത്രന്ന ശംസിഷം/ 35
2. പാഹി നോ അഗ്ന ഏകയാ/പാഹ്യുത ദ്വിതീയയാ/
പാഹി ഗീർഭിസ്തിസൃഭിരൂർജാംപതേ/ പാഹി ചതസൃഭിർവസോ/ 36
3. ബൃഹദ്ഭിരഗ്നേ അർചിഭിഃ/ ശുക്രേണ ദേവ ശോചിഷാ/
ഭരദ്വാജേ സമിധാനോ യവിഷ്ഠ്യ/ രേവത്പാവക ദീദിഹി/ 37
4. ത്വയ്യഗ്നേ സ്വാഹുത/ പ്രിയാസസ്സന്തു സൂരയഃ/
യന്താരോ യേ മഘവാനോ ജനാനാം/ ഊർവന്ദയന്ത ഗോനാം/ 38
5. അഗ്നേ ജരിതർവിശ്പതിഃ/ തപാനോ ദേവ രക്ഷസഃ/
അപ്രോഷിവാൻ ഗൃഹപതിർമഹം അസി/
ദിവസ്പായുർദുരോണയുഃ/ 39

6. അഗ്നേ വിവസ്വദുഷസഃ/ ചിത്രം രാധോ അമർത്യം/
ആ ദാശുഷേ ജാതവേദോ വഹാ ത്വം/
അദ്യാ ദേവം ഉഷർബുധഃ/ 40
7. ത്വന്നശ്ചിത്ര ഊത്യാ/ വസോ രാധാംസി ചോദയ/
അസ്യ രായേ ത്വമഗ്നേ രഥീരസി/ വിദാ ഗാധന്തു ചേതു നഃ/ 41
8. ത്വമിത്സപ്രഥാ അസി/ അഗ്നേ ത്രാതരൃതഃ കവിഃ/
ത്വാം വിപ്രാസസ്സമിധാനദീദിവഃ/ ആ വിവാസന്തി വേധസഃ 42
9. ആ നോ അഗ്നേ വയോ വൃധം/ രയിം പാവക ശംസ്യം/
രാസ്വാ ച ന ഉപമാതേ പുരുസ്പൃഹം/ സുനീതീ സുയശസ്തരം/43
10. യോ വിശ്വാദയതേ വസു/ ഹോതാ മന്ദ്രോ ജനാനാം/
മധോർനപാത്രാ പ്രഥമാന്യസ്മൈ/ പ്രസ്തോമാ യന്ത്യഗ്നയേ/ 44

४

१. यज्ञायज्ञा वो अग्नये। गिरा गिरा च दक्षसे।
प्र प्र वयममृतञ्जातवेदसम्। प्रियं मित्रन्न शंसिषम्।। ३५
२. पाहि नो अग्न एकया। पाह्युत द्वितीयया।
पाहि गीर्भिस्तिसृभिरूर्जांपते। पाहि चतसृभिर्वसो।। ३६
३. बृहत्भिरग्ने अर्चिभिः। शुक्रेण देव शोचिषा।
भरद्वाजे समिधानो यविष्ठ्य। रेवत्पावक दीदिहि।। ३७
४. त्वय्यग्ने स्वाहुत। प्रियासस्सन्तु सूरयः।
यन्तारो ये मघवानो जनानाम्। ऊर्वन्दयन्त गोनाम्।। ३८
५. अग्ने जरितर्विश्पतिः। तपानो देव रक्षसः।
अप्रोषिवान् गृहपतिर्महं असि। दिवस्पायुर्दुरोणयुः।। ३९
६. अग्ने विवस्वदुषसः। चित्रं राधो अमर्त्यम्।
आ दाशुषे जातवेदो वहा त्वम्। अद्या देवं उषर्बुधः।। ४०
७. त्वन्नश्चित्र ऊत्या। वसो राधांसि चोदय।
अस्य राये त्वमग्ने रथीरसि। विदा गाधन्तु चेतु नः।। ४१
८. त्वमित्सप्रथा असि। अग्ने त्रातरृतः कविः।
त्वां विप्रासस्समिधानदीदिवः। आ विवासन्ति वेधसः।। ४२
९. आ नो अग्ने वयो वृधम्। रयिं पावकशंस्यम्।
रास्वा च न उपमाते पुरुस्पृहम्। सुनीती सुयशस्तरम्।। ४३
१०.यो विश्वा दयते वसु। होता मन्द्रो जनानाम्।
मधोर्नपात्रा प्रथमान्यस्मै। प्रस्तोमा यन्त्यग्नये।। ४४

5

1. ഏനാവോ അഗ്നിന്നമസാ/ ഊർജോ നപാതമാഹുവേ/
പ്രിയം ചേതിഷ്ഠമരതിം സ്വധ്വരം/ വിശ്വസ്യ ദൂതമമൃതം/ 45
2. ശേഷേ വനേഷു മാതൃഷു/ സന്ത്യാ മർതാസ ഇന്ധതേ/
അതന്ദ്രോ ഹവ്യം വഹസി ഹവിഷ്കൃതഃ/
ആദിദ്ദേവേഷു രാജസി/ 46
3. അദർശി ഗാതുവിത്തമഃ/ യസ്മിൻ വ്രതാന്യാദധുഃ/
ഉപോഷു ജാതമാര്യസ്യ വർധനം/ അഗ്നിന്നക്ഷന്തു നോ ഗിരഃ/ 47
4. അഗ്നിരുക്ഥേ പുരോഹിതഃ/ ഗ്രാവാണോ ബർഹിരധ്വരേ/
ഋചാ യാമി മരുതോ ബ്രഹ്മണസ്പതേ/ ദേവം അവോ വരേണ്യം/ 48
5. അഗ്നിമീളിഷ്വാവസേ/ ഗാഥാഭിശ്ശീരശോചിഷം/
അഗ്നിം രായേ പുരുമീഢശ്രുതന്നരഃ/ അഗ്നിസ്സുദീതയേച്ഛർദിഃ/ 49
6. ശ്രുധിശ്രുത്കർണവഹ്നിഭിഃ/ ദേവൈരഗ്നേ സയാവഭിഃ/
ആ സീദതു ബർഹിഷി മിത്രോ അര്യമാ/ പ്രാതർയാവഭിരധ്വരേ/ 50
7. പ്ര ദൈവോ ദാസോ അഗ്നിഃ/ ദേവ ഇന്ദ്രോ ന മജ്മനാ/
അനുമാതരം പൃഥിവീം വി വാവൃതേ/തസ്ഥൗ നാകസ്യ ശർമണി/ 47
8. അധ ജ്മോ അധ വാ ദിവഃ/ ബൃഹതോ രോചനാദധി/
അയാ വർധസ്വ തന്വാ ഗിരാ മമ/ ആ ജാതാ സുക്രമോ പൃണ/ 52
9. കായമാനോ വനാ ത്വം/ യന്മാതൃരജഗന്നപഃ/
ന തത്തേ അഗ്നേ പ്രമൃഷേ നിവർതനം/ യദ്ദൂരേ സന്നിഹാഭുവഃ/ 53
10. നിത്വാമഗ്നേ മനുർദധേ/ ജ്യോതിർജനായ ശശ്വതേ/
ദീദേഥ കണ്വ ഋത ജാത ഉക്ഷിതഃ/ യന്നമസ്യന്തി കൃഷ്ടയഃ/ 54

५

१. एनावो अग्निन्नमसा। ऊर्जो नपातमाहुवे।
प्रियं चेतिष्ठमरतिं स्वध्वरम्। विश्वस्य दूतममृतम्।। ४५
२. शेषे वनेषु मातृषु। सन्त्वा मर्तास इन्धते।
अतन्द्रो हव्यं वहसि हविष्कृतः। आदिद्देवेषु राजसि।। ४६
३. अदर्शि गातुवित्तमः। यस्मिन् व्रतान्यादधुः।
उपोषु जातमार्यस्य वर्धनम्। अग्निन्नक्षन्तु नो गिरः।। ४७
४. अग्निरुक्थे पुरोहितः। ग्रावाणो बर्हिरध्वरे।
ऋचा यामि मरुतो ब्रह्मणस्पते। देवं अवो वरेण्यम्।। ४८
५. अग्निमीळिष्वावसो गाथाभिश्शीरशोचिषम्।
अग्निं राये पुरुमीढश्रुतन्नरः। अग्निस्सुदीतयेच्छर्दिः।। ४९

६. श्रुधिश्रुत्कर्णवह्निभिः। देवैरग्ने सयावभिः।
आ सीदतु बर्हिषि मित्रो अर्यमा। प्रातर्यावभिरध्वरे।। ५०

७. प्र दैवो दासो अग्निः। देव इन्द्रो न मज्मना।
अनुमातरं पृथिवीं वि वावृते। तस्थौ नाकस्य शर्मणि।। ५१

८. अध ज्मो अध वा दिवः। बृहतो रोचनादधि।
अया वर्धस्व तन्वा गिरा मम। आ जाता सुक्रमो पृण।। ५२

९. कायमानो वना त्वम्। यन्मातृरजगन्नपः।
न तत्ते अग्ने प्रमृषे निवर्तनम्। यद्दूरे सन्निहाभुवः।। ५३

१०. नित्वामग्ने मनुर्दधे। ज्योतिर्जनाय शश्वते।
दीदेथ कण्व ऋत जात उक्षितः। यन्नमस्यन्ति कृष्टयः।। ५४

6

1. ദേവോ വോ ദ്രവിണോദാഃ/ പൂർണാം വിവഷ്ടാസിചം/
ഉദ്യാ സിഞ്ചധ്വമുപ വാ പൃണധ്വം/ ആദിദ്യോ ദേവ ഓഹതേ/ 55
2. പ്രൈതു ബ്രഹ്മണസ്പതിഃ/ പ്ര ദേവ്യേതു സൂനൃതാ/
അച്ഛാ വീരന്നര്യം പങ്ക്തിരാധസം/ദേവാ യജ്ഞന്നയന്തു നഃ/ 56
3. ഊർധ്വ ഊഷുണ ഊതയേ/ തിഷ്ഠാ ദേവോ ന സവിതാ/
ഊർധ്വോ വാജസ്യ സനിതാ യദഞ്ജിഭിഃ/
വാഘദ്ഭിർവിഹവയാമഹേ/ 57
4. പ്ര യോ രായേ നിനീഷതേ/ മർതോ യസ്തേ വസോ ദാശത്/
സ വീരന്ധത്തേ അഗ്ന ഉക്ഥ ശംസിനം/
ക്മനാ സഹസ്രപോഷിണം/ 58
5. പ്ര വോ യഹ്വം പുരൂണാം/ വിശാന്ദേവയതീനാം/
അഗ്നിം സൂക്തേഭിർവചോഭിർവൃണീമഹേ/യം സമിദന്യ ഇന്ധതേ/59
6. അയമഗ്നിസ്സുവീര്യസ്യ/ ഈശേ ഹി സൗഭഗസ്യ/
രായ ഈശേ സ്വപത്യസ്യ ഗോമതഃ/ ഈശേ വൃത്രഹഥാനാം/ 60
7. ത്വമഗ്നേ ഗൃഹപതിഃ/ ത്വം ഹോതാ നോ അധ്വരേ/
ത്വം പോതാ വിശ്വവാരപ്രചേതാഃ/ യക്ഷി യാസി ച വാര്യം/ 61
8. സഖായസ്ത്വാ വവൃമഹേ/ ദേവം മർതാസ ഊതയേ/
അപാന്നപാതം സുഭഗം സുദംസസം/ സുപ്രതൂർതിമനേഹസം/ 62

६

१. देवो वो द्रविणोदाः । पूर्णां विवष्ट्वासिचम्।
उद्वा सिञ्चध्वमुप वा पृणध्वम्। आदिद्वो देव ओहते।। ५५

२. प्रैतु ब्रह्मणस्पतिः। प्र देव्येतु सूनृता।
अच्छा वीरन्नरियं पङ्क्तिराधसम्। देवा यज्ञन्नयन्तु नः।। ५६
३. ऊर्ध्व ऊषुण ऊतये। तिष्ठा देवो न सविता।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिः। वाघत्भिर्विह्वयामहे।। ५७
४. प्र यो राये निनीषते। मर्तो यस्ते वसो दाशत्।
स वीरन्धत्ते अग्न उक्थ्य शंसिनम्। क्मना सहस्रपोषिणम्।। ५८
५. प्र वो यह्वं पुरूणाम्। विशान्देवयतीनाम्।
अग्निं सूक्तेभिर्वचोभिर्वृणीमहे। यं समिदन्य इन्धते।। ५९
६. अयमग्निस्सुवीर्यस्य। ईशे हि सौभगस्य।
राय ईशे स्वपत्यस्य गोमतः। ईशे वृत्रहथानाम्।। ६०
७. त्वमग्ने गृहपतिः। त्वं होता नो अध्वरे।
त्वं पोता विश्ववारप्रचेताः। यक्षि यासि च वार्यम्।। ६१
८. सखायस्त्वा ववृमहे। देवं मर्तास ऊतये।
अपान्नपातं सुभगं सुदंससम्। सुप्रतूर्तिमनेहसम्।। ६२

7

1. ആ ജുഹോതാ ഹവിഷാ മർജയധ്വം/
നിഹോതാരം ഗൃഹപതിന്ദധിധ്വം/
ഇളസ്പദേ നമസാ രാത ഹവ്യം/
സപര്യതാ യജതം പസ്ത്യാനാം/ 63
2. ചിത്ര ഇച്ഛിശോസ്തരുണസ്യ വക്ഷഥഃ/
ന യോ മാതരാവന്വേതി ധാതവേ/
അനൂധാ യദജീജനദധാചിദാ/
വവക്ഷത്സദ്യോ മഹി ദൂത്യാഞ്ചരൻ/ 64
3. ഇദന്ത ഏകം പര ഊ ത ഏകം/
തൃതീയേന ജ്യോതിഷാ സംവിശസ്വ/
സംവേശനസ്തനൂ ചാരുരേധി പ്രിയോ/
ദേവാനാം പരമേ ജനിത്രേ/ 65
4. ഇമം സ്തോമമർഹതേ ജാതവേദസേ/
രഥമിവ സമ്മഹേമാ മനീഷയാ/
ഭദ്രാ ഹി നഃ പ്രമതിരസ്യ സംസദി/
അഗ്നേ സഖ്യേ മാ രിഷാമാ വയം തവ/ 66
5. മൂർധാനന്ദിവോ അരതിം പൃഥിവ്യാഃ/
വൈശ്വാനരമൃത ആ ജാതമഗ്നിം/

കവിം സമ്രാജമതിഥിഞ്ജനാനാം/
ആസന്നാപാത്രഞ്ജനയന്ത ദേവാഃ/ 67
6. വി ത്വദാപോ ന പർവതസ്യ പൃഷ്ഠാത് /
ഉക്ഥേഭിരഗ്നേ ജനയന്ത ദേവാഃ/
തന്ത്വാ ഗിരസ്സുഷ്ടുതയോ വാജയന്തി/
ആജിന്നഗിർവവാഹോ ജിഗ്യു രശ്വാഃ/ 68
7. ആ വോ രാജാനമധ്വരസ്യ രുദ്രം/
ഹോതാരം സത്യയജം രോദസ്യോഃ/
അഗ്നിം പുരാ തനയിത്നോരചിത്ത/
ഹിരണ്യരൂപമവസേ കൃണുധ്വം/ 69
8. ഇന്ധേ രാജാ സമര്യോ നമോഭിഃ/
യസ്യ പ്രതീകമാഹുതം ഘൃതേന/
നരോ ഹവ്യേഭിരീഡതേ സബാധഃ/
അഗ്നിരഗ്രമുഷസാമശോചി/ 70
9. പ്ര കേതുനാ ബൃഹതാ യാത്യഗ്നിഃ/
ആ രോദസീ വൃഷഭോ രോരവീതി/
ദിവശ്ചിദന്താദുപമാമുദാനഡ്/
അപാമുപസ്ഥേ മഹിഷോ വവർധ/ 71
10. അഗ്നിന്നരോ ദീധിതിഭിരരണ്യോഃ/
ഹസ്തച്യുതഞ്ജനയതപ്രശസ്തം/
ദൂരേ ദൃശം ഗൃഹപതിമഥവ്യും/ 72

७

१. आ जुहोता हविषा मर्जयध्वम्। निहोतारङ्गृहपतिन्दधिध्वम्।
इळस्पते नमसा रात हव्यम्। सपर्यता यजतं पस्त्यानाम्।। ६३
२. चित्र इच्छिशोस्तरुणस्य वक्षथः। न यो मातरावन्वेति धातवे।
अनूधा यदजीजनदधाचिदा। ववक्षत्सद्यो महि दूत्याञ्चरन्।। ६४
३. इदन्त एकं पर ऊ त एकम्। तृतीयेन ज्योतिषा संविशस्व।
संवेशनस्तन्वे चारुरेधि। प्रियो देवानां परमे जनित्रे।। ६५
४. इमं स्तोममर्हते जातवेदसे। रथमिव सम्महेमा मनीषया।
भद्रा हि नःप्रमतिरस्य संसदि्। अग्ने सख्ये मा रिषामा वयं तव।। ६६
५. मूर्धानन्दिवो अरतिं पृथिव्याः। वैश्वानरमृत आ जातमग्निम्।
कविं सम्राजमतिथिञ्जनानाम् । आसन्नापात्रञ्जनयन्त देवाः।। ६७
६. वि त्वदापो न पर्वतस्य पृष्ठात्। उक्थेभिरग्ने जनयन्त देवाः।
तन्त्वा गिरस्सुष्टुतयो वाजयन्ति। आजिन्नगिर्ववाहो जिग्युरश्वाः।। ६८

७. आ वो राजानमध्वरस्य रुद्रम्। होतारं सत्ययजं रोदस्योः।
अग्निं पुरा तनयित्नोरचित्त। हिरण्यरूपमवसे कृणुध्वम्।। ६९

८. इन्धे राजा समर्यो नमोभिः। यस्य प्रतीकमाहुतङ्घृतेन।
नरो हव्येभिरीडते सबाधः। अग्निरग्रमुषसामशोचि।। ७०

९. प्र केतुना बृहता यात्यग्निः। आ रोदसी वृषभो रोरवीति।
दिवश्चिदन्तादुपमामुदानड् । अपामुपस्थे महिषो ववर्ध।। ७१

१०. अग्निन्नरो दीधितिभिररण्योः। हस्तच्युतञ्जनयतप्रशस्तम्।
दूरे दृशङ्गृहपतिमथव्युम्।। ७२

8

1. അബോധ്യഗ്നിസ്സമിധാ ജനാനാം/
പ്രതിധേനുമിവായതീമുഷാസം/
യഹ്വാ ഇവ പ്രവയാമുജ്ജിഹാനാഃ/
പ്ര ഭാനവസ്സസ്രതേ നാകമച്ഛ/ 73

2. പ്ര ഭൂർജയന്തം മഹാം വിപോധാം/
മൂരൈരമൂരം പുരാന്ദർമാണം/
നയന്തങ്ഗീർഭിർവനാധിയന്ധാഃ/
ഹരിശ്മശ്രുന്ന വർമണാ ധനർചിം/ 74

3. ശുക്രന്തേ അന്യദ്യജതന്തേ അന്യത്/
വിഷുരൂപേ അഹനീ ദ്യൗരിവാസി/
വിശ്വാ ഹി മായാ അവസി സ്വധാവൻ /
ഭദ്രാ തേ പൂഷന്നിഹരാതിരസ്തു/ 75

4. ഇളാമഗ്നേ പുരുദംസം സനിം ഗോഃ/
ശശ്വത്തമം ഹവമാനായ സാധഃ/
സ്യാന്നസ്സൂനുസ്തനയോ വിജാവാ/
അഗ്നേ സാ തേ സുമതിർഭൂത്വസ്മേ/ 76

5. പ്ര ഹോതാ ജാതോ മഹാന്നഭോവിത്/
നൃഷദ്മാ സീദദപാം വിവർതേ/
ദധദ്യോധായി സു തേ വയാംസി/
യന്താ വസൂനി വിധതേ തനൂപാഃ/ 77

6. പ്രസമ്രാജമസുരസ്യ പ്രശസ്തം/
പുംസഃ കൃഷ്ടീനാമനുമാദ്യസ്യ/
ഇന്ദ്രസ്യേവ പ്ര തവസഃ കൃതാനി/
വന്ദദ്വീരാ വന്ദമാനാ വിവഷ്ടു/ 78

7. അരണ്യോർനിഹിതോ ജാതവേദാഃ/
ഗർഭ ഇവേത് സുഭൃതോ ഗർഭിണീഭിഃ/

ദിവേ ദിവ ഈഡ്യോ ജാഗൃവദ്ഭിഃ/
ഹവിഷ്മദ്ഭിർമനുഷ്യേഭിരഗ്നിഃ/ 79
8. സനാദഗ്നേ മൃണസി യാതുധാനാൻ/
ന ത്വാ രക്ഷാംസി പൃതനാസു ജിഗ്യുഃ/
അനുദഹസഹമൂരാൻ കയാദഃ/
മാ തേ ഹേത്യാമുക്ഷത ദൈവ്യായാഃ/ 80

८

१. अबोध्यग्निस्समिधा जनानाम्। प्रतिधेनुमिवायतीमुषासम्।
यह्वा इव प्रवयामुज्जिहानाः। प्र भानवस्सस्रते नाकमच्छ।। ७३
२. प्र भूर्जयन्तं महां विपोधाम। मूरैरमूरं पुरान्दर्माणम्।
नयन्तड्गीर्भिर्वनाधियन्धाः। हरिश्मश्रुन्न वर्मणा धनर्चिम्।। ७४
३. शुक्रन्ते अन्यद्यजतन्ते अन्यत्। विषुरूपे अहनी द्यौरिवासि।
विश्वा हि माया अवसि स्वधावन्। भद्रा ते पूषन्निह रातिरस्तु।। ७५
४. इलामग्ने पुरुदंसं सनिं गोः। शश्वत्तमं हवमानाय साधः।
स्यान्नस्सूनुस्तनयो विजावा। अग्ने सा ते सुमतिर्भू त्वस्मे।। ७६
५. प्र होता जातो महान्नभोवित्। नृषद्मा सीददपां विवर्ते।
दधद्योधायि सु ते वयांसि। यन्ता वसूनि विधते तनूपाः।। ७७
६. प्रसम्राजमसुरस्य प्रशस्तम्। पुंसः कृष्टीनामनुमाद्यस्य।
इन्द्रस्येव प्र तवसः कृतानि। वन्दद्वीरा वन्दमाना विवष्टु।। ७८
७. अरण्योर्निहितो जातवेदाः। गर्भ इवेत् सुभृतो गर्भिणीभिः।
दिवे दिव ईड्यो जागृवत्भिः। हविष्मद्भिर्मनुष्येभिरग्निः।। ७९
८. सनादग्ने मृणसि यातुधानान्। न त्वा रक्षांसि पृतनासु जिग्युः।
अनुदहसहमूरान् कयादः। मा ते हेत्यामुक्षत दैव्यायाः।। ८०

9

1. അഗ ഓജിഷ്ഠമാഭര/ ദ്യുമ്നമസ്മഭ്യമധ്രിഗോ/
പ്ര നോ രായേ പനീയസേ/ രത്സി വാജായ പന്ഥാം/ 81
2. യദി വീരോ അനുഷ്യാത് / അഗ്നിമിന്ധീത മർത്യഃ /
ആ ജുഹ്വദ്ധവ്യമാനുഷക്/ ശർമ ഭക്ഷീത ദൈവ്യം/ 82
3. ത്വേഷസ്തേ ധൂമ ഋണ്വതി/ ദിവി സഞ്ഛുക്ര ആതതഃ/
സൂരോ ന ഹി ദ്യുതാ ത്വം/ കൃപാ പാവക രോചസേ/ 83
4. ത്വം ഹി ക്ഷൈതവദ്യശഃ/ അഗ്നേ മിത്രോ ന പത്യസേ/
ത്വം വിചർഷണേ ശ്രവഃ/ വസോ പുഷ്ടിന്ന പുഷ്യസി/ 84

5. പ്രാതരഗ്നിഃ പുരുപ്രിയഃ/ വിശസ്തവേതാതിഥിഃ/
വിശ്വേ യസ്മിന്നമർത്യേ/ ഹവ്യം മർതാസ ഇന്ധതേ/ 85
6. യദ്വാഹിഷ്ഠന്തദഗ്നയേ/ ബൃഹദർച വിഭാവസോ/
മഹിഷീവ ത്വദ്രയിഃ/ ത്വദ്വാജാ ഉദീരതേ/ 86
7. വിശോ വിശോ വോ അതിഥിം/വാജയന്തഃ പുരുപ്രിയം/
അഗ്നിം വോ ദുര്യം വചഃ/ സ്തുഷേ ശൂഷസ്യ മന്മഭിഃ/ 87
8. ബൃഹദ്വയോ ഹി ഭാനവേ/ അർചാ ദേവായാഗ്നയേ/
യം മിത്രന്ന പ്രശസ്തയേ/ മർതാസോ ദധിരേ പുരഃ/ 88
9. അഗന്മ വൃത്രഹന്തമം/ ജ്യേഷ്ഠമഗ്നിമാനവം/
യഃ സ്മ ശ്രുതർവന്നാർക്ഷേ ബൃഹദനീക ഇധ്യതേ/ 89
10. ജാതഃ പരേണ ധർമണാ/ യത്സവൃദ്ഭിസ്സഹാഭുവഃ/
പിതാ യത്കശ്യപസ്യാഗ്നിഃ/ ശ്രദ്ധാ മാതാ മനുഃ കവിഃ/ 90

९

१. अग्न ओजिष्ठमाभर। द्युम्नमस्मभ्यमध्रिगो।
प्र नो राये पनीयसे। रत्सि वाजाय पन्थाम्।। ८१
२. यदि वीरो अनुष्यात्। अग्निमिन्धीत मर्त्यः।
आ जुह्वद्धव्यमानुषक्। शर्म भक्षीत दैव्यम्।। ८२
३. त्वेषस्ते धूम ऋण्वति। दिवि सञ्छुक्र आततः।
सूरो न हि द्युता त्वम्। कृपा पावक रोचसे।। ८३
४. त्वं हि क्षैतवद्यशः। अग्ने मित्रो न पत्यसे।
त्वं विचर्षणे श्रवः। वसो पुष्टिन्न पुष्यसि।। ८४
५. प्रातरग्निःपुरुप्रियः। विशस्तवेतातिथिः।
विश्वे यस्मिन्नमर्त्ये। हव्यं मर्तास इन्धते।। ८५
६. यद्वाहिष्ठन्तदग्नये। बृहदर्च विभावसो।
महिषीव त्वद्रयिः। त्वद्वाजा उदीरते।। ८६
७. विशो विशो वो अतिथिम्। वाजयन्तःपुरुप्रियम्।
अग्निं वो दुर्यं वचः। स्तुषे शूषस्य मन्मभिः।। ८७
८. बृहद्वयो हि भानवे। अर्चा देवायाग्नये।
यं मित्रन्न प्रशस्तये। मर्तासो दधिरे पुरः।। ८८
९. अगन्म वृत्रहन्तमम्। ज्येष्ठमग्निमानवम्।
यः स्म श्रुतर्वन्नार्क्षे। बृहदनीक इध्यते।। ८९

१०. जातःपरेण धर्मणा। यत्सवृत्भिरसहाभुवः।
पिता यत्कश्यपस्याग्निः। श्रद्धा माता मनुः कविः।। ९०

10

1. സോമം രാജാനം വരുണം/ അഗ്നിമന്വാരഭാമഹേ/
ആദിത്യം വിഷ്ണും സൂര്യം/ ബ്രഹ്മാണഞ്ച ബൃഹസ്പതിം/ 91
2. ഇത ഏത ഉദാരുഹൻ/ ദിവസ്പൃഷ്ഠാന്യാരുഹൻ/
പ്ര ഭൂർജയോ യഥാ പഥാ/ ഉദ്യാമങ്ഗിരസോ യയുഃ/ 92
3. രായേ അഗ്നേ മഹേ ത്വാ/ ദാനായ സമിധീമഹി/
ഈളിഷ്വാ ഹി മഹേ വൃഷൻ/ ദ്യാവാ ഹോത്രായ പൃഥിവീം/ 93
4. ദധന്വേ വായദീമനു/ വോചദ്ബ്രഹ്മേതി വേരുതത്/
പരിവിശ്വാനി കാവ്യാ/ നേമിശ്ചക്രമിവാഭുവത്/ 94
5. ത്വമഗ്നേ വസും രിഹ/ രുദ്രം ആദിത്യം ഉത/
യജാ സ്വധ്വരഞ്ജനം/ മനുജാതങ്ഘൃതപ്രുഷം/ 95
6. പ്രത്യഗ്നേ ഹരസാ ഹരഃ/ ശൃണാഹി വിശ്വതഃ പ്രതി/
യാതുധാനസ്യ രക്ഷസഃ/ ബലം ന്യുബ്ജ വീര്യം/ 96

१०

१. सोमं राजानं वरुणम्। अग्निमन्वारभामहे।
आदित्यं विष्णुं सूर्यम्। ब्रह्माणञ्च बृहस्पतिम्।। ९१
२. इत एत उदारुहन्। दिवस्पृष्ठान्यारुहन्।
प्र भूर्जयो यथा पथा। उद्यामङ्गिरसो ययुः।। ९२
३. राये अग्ने महे त्वा। दानाय समिधीमहि।
ईळिष्वा हि महे वृषन्। द्यावा होत्राय पृथिवीम्।। ९३
४. दधन्वे वायदीमनु। वोचद्ब्रह्मेति वेरुतत्।
परि विश्वानि काव्या। नेमिश्चक्रमिवाभुवत्।। ९४
५. त्वमग्ने वसुं रिह। रुद्रं आदित्यम् उत।
यजा स्वध्वरञ्जनम्। मनुजातङ्घृतप्रुषम्।। ९५
६. प्रत्यग्ने हरसा हरः। शृणाहि विश्वतःप्रति।
यातुधानस्य रक्षसः। बलन्न्युब्ज वीर्यम्।। ९६

11

1. പുരു ത്വാ ദാശിവങ്ധ്വാ ചേത്/ അരിരഗ്നേ തവ സ്വിദാ/
തോദസ്യേവ ശരണ ആ മഹസ്യ/ 97

2. പ്ര ഹോത്രേ പൂർവ്യം വചഃ/ അഗ്നയേ ഭരതാ ബൃഹത്/
വിപാം ജ്യോതീംഷി ബിഭ്രതേ ന വേധസേ/ 98
3. അഗ്നേ വാജസ്യ ഗോമതഃ/ ഈശാനസ്സഹസോ യഹോ/
അസ്മേ ദേഹി ജാതവേദോ മഹി ശ്രവഃ/ 99
4. അഗ്നേ യജിഷ്ഠോ അധ്വരേ/ ദേവാന്ദേവയതേ യജ/
ഹോതാ മന്ദ്രോ വി രാജസ്യതി സ്രിധഃ/ 100
5. ജജ്ഞാനസ്സപ്തമാത്യഭിഃ/ മേധാമാശാസതശ്രിയേ/
അയം ധ്രുവോ രയീണാം ചികേതദാ/ 101
6. ഉത സ്യാ നോ ദിവാമതിഃ/ അദിതിരുത്യാ ഗമത്/
സാ ശന്താതാമയസ്കരദപ സ്രിധഃ/ 102
7. ഈളിഷ്വാ ഹി പ്രതീവ്യം/ യജസ്വ ജാതവേദസം/
ചരിഷ്ണുധൂമമഗൃഭീതശോചിഷം/ 103
8. ന തസ്യ മായയാ ചന/ രിപുരീശീതമർത്യഃ/
യോ അഗ്നയേ ദദാശ ഹവ്യദാതയേ/ 104
9. അപത്യം വൃജിനം രിപും/ സ്തേനമഗ്നേ ദുരാധ്യം/
ദവിഷ്ഠമസ്യ സത്പതേ കൃധീ സുഗം/ 105
10. ശ്രുഷ്ട്യഗ്നേ നവസ്യ മേ/ സ്തോമസ്യ വീര വിശ്പതേ/
നി മായിനസ്തപസാ രക്ഷസോ ദഹ/ 106

११

१. पुरुत्वादाशिवङ्वो चेत्। अरिरग्ने तव स्विदा।
तोदस्येव शरण आ महस्य।। ९७
२. प्र होत्रे पूर्व्यं वचः। अग्नये भरता बृहत्।
विपां ज्योतींषि बिाभ्रते न वेधसे।। ९८
३. अग्ने वाजस्य गेमतः। ईशानस्सहसो यहो।
अस्मे देहि जातवेदो महि श्रवः।। ९९
४. अग्ने यजिष्ठो अध्वरे। देवान्देवयते यज।
होता मन्द्रो विराजस्यति स्त्रिधः।। १००
५. जज्ञानस्सप्तमातृभिः। मेधामाशासतश्रिये।
अयन्ध्रुवो रयीणाञ्चिकेतदा।। १०१
६. उत स्या नो दिवामतिः। अदितिरूत्या गमत्।
साशन्तातामयस्करदपस्त्रिधः।। १०२
७ ईलिष्वा हि प्रतीव्यम्। यजस्व जातवेदसम्।
चरिष्णुधूममगृभीतशोचिषम्।। १०३

८. **न तस्य मायया चन**। रिपुरीशीतमर्त्यः। यो अग्नये ददाश हव्यदातये।। १०४
९. अपत्यं वृजिनं रिपुम्। स्तेनमग्ने दुराध्यम्।
दविष्ठमस्य सत्पते कृधी सुगम्। १०५
१०. श्रुष्ट्यग्ने नवस्य मे। स्तोमस्य वीर विश्पते।
निमायिनस्तपसा रक्षसो दह।। १०६

12

1. പ്ര മംഹിഷ്ഠായ ഗായത/ ഋതാവ്നേ ബൃഹതേ ശുക്രശോചിഷേ/
ഉപസ്തുതാസോ അഗ്നയേ/ 107
2. പ്ര സോ അഗ്നേ തവോതിഭിഃ/സുവീരാഭിസ്തരതി വാജകർമഭിഃ/
യസ്യ ത്വം സഖ്യമാവിഥ/ 108
3. തങ്ഗൂർധയാ സ്വർണരം/ ദേവാസോ ദേവമരതിം ദധന്വിരേ/
ദേവത്രാ ഹവ്യമൂഹിഷേ/ 109
4. മാ നോ ഹൃണീഥാ അതിഥിം/
വസുരഗ്നിഃപുരുപ്രശസ്ത ഏഷഃ/ യസ്സ്രുഹോതാ സ്വധ്വരഃ/ 110
5. ഭദ്രോ നോ അഗ്നിരാഹുതഃ/ ഭദ്രാരാതിസ്സുഭഗ ഭദ്രോഅധ്വരഃ/
ഭദ്രാ ഉത പ്രശസ്തയഃ/ 111
6. യജിഷ്ഠന്ത്വാ വവൃമഹേ/ ദേവന്തേവത്രാ ഹോതാരമമർത്യം/
അസ്യ യജ്ഞസ്യ സുക്രതും/ 112
7. തദഗ്നേ ദ്യുമ്നമാഭര/ യത്പാസാഹസദനേ കഞ്ചിദത്രിണം/
മന്യുഞ്ജനസ്യ ദൂഢ്യം/ 113
8. യദ്വാ ഉ വിശ്പതിശ്ഛിതഃ/ സുപ്രീതോ മനുഷോ വിശേ/
വിശ്വേദഗ്നിഃ പ്രതി രക്ഷാംസി സേധതി/ 114
9. അയമഗ്നിഃ ശ്രേഷ്ഠതമഃ/ അയം വാ മധുമത്തമഃ/
അയം സഹസ്രസാതമഃ/ അസ്മിന്നസ്തു സുവീര്യം/ 115
10. ആദിത്യശ്ശുക്ര ഉദഗാത് പുരസ്താത്/
ജ്യോതിഃ കൃണ്വന്വിതമോ ബാധമാനഃ/
ആ ഭാസമാനഃ പ്രദിശോ നു സർവാഃ/
ഭദ്രസ്യ കർതാ രുചയന്ന ആഗാത്/ 116

ആഗ്നേയം കാണ്ഡം കഴിഞ്ഞു.

१२

१. प्र मंहिष्ठाय गायत। ऋताव्ने बृहते शुक्रशोचिषे। उपस्तुतासो अग्नये।। १०७
२. प्र सो अग्ने तवोतिभिः। सुवीराभिस्तरति वाजकर्मभिः।
यस्य त्वं सख्यमाविथ। १०८

३. तङ्गूर्धया स्वर्णरम्। देवासो देवमरतिन्दधन्विरे। देवत्रा हव्यमूहिषे।। १०९
४. मा नो हृणीथा अतिथिम्। वसुरग्निःपुरुप्रशस्त एषः।
यस्सुहोता स्वध्वरः।। ११०
५. भद्रो नो अग्निराहुतः। भद्रारातिस्सुभग भद्रो अध्वरः।
भद्रा उत प्रशस्तयः। १११
६. यजिष्ठन्त्वा ववृमहे। देवन्देवत्रा होतारममर्त्यम्।
अस्य यज्ञस्य सुक्रतुम्।। ११२
७. तदग्ने द्युम्नमाभर। यत्सासाहसदने कञ्चिदत्रिणम्।
मन्युञ्जनस्य दूढ्यम्। ११३
८. यद्वा उ विश्पतिश्शितः। सुप्रीतो मनुषो विशे।
विश्वेदग्निःप्रतिरक्षांसि सेधति।। ११४
९. अयमग्निः श्रेष्ठतमः। अयं वा मधुमत्तमः।
अयं सहस्रसातमः। अस्मिन्नरस्तु सुवीर्यम्।। ११५
१०. आदित्यश्शुक्र उदगात् पुरस्तात्। ज्योतिः कृण्वन्वितमो बाधमानः।
आ भासमानःप्रदिशो नु सर्वाः। भद्रस्य कर्ता रुचयन्न आगात्।। ११६

आग्नेयं काण्डम् समाप्तम्।

കാണ്ഡം 2 - ഐന്ദ്രം

काण्डम् - २ - ऐन्द्रम्।

13

1. തദ്വോ ഗായസുതേ സചാ/ പുരുഹൂതായ സത്വനേ/
ശയ്യദ്ഗവേ ന ശാകിനേ/ 117
2. യസ്തേ നൂനം ശതക്രതോ/ ഇന്ദ്രദ്യുമ്നിതമോ മദഃ/
തേന നൂനം മദേ മദേഃ/ 118
3. ഗാവ ഉപവദാവടേ/ മഹീയജ്ഞസ്യ രപ്സുദാ/
ഉഭാ കർണാ ഹിരണ്യയാ/ 119
4. അരമശ്വായ ഗായത/ ശ്രുതകക്ഷാരം ഗവേ/
അരമിന്ദ്രസ്യ ധാമ്നേ/ 120
5. തമിന്ദ്രം വാജയാമസി/ മഹേ വൃത്രായ ഹന്തവേ/
സ വൃഷാ വൃഷഭോ ഭുവത് / 121
6. ത്വമിന്ദ്രബലാദധി/ സഹസാ ജാത ഓജസാ/
ത്വം സൻ വൃഷൻ വൃഷേദസി/ 122
7. യജ്ഞ ഇന്ദ്രമവർധയത്/യദ്ഭൂമിം വ്യവർതയത് /
ചക്രാണ ഓപശന്ദിവി/ 123
8. യദിന്ദ്രാഹയ്യഥാത്വം/ ഈശീയവസ്വ ഏക ഇത്/
സ്തോതാ മേ ഗോസഖാ സ്യാത്/ 124
9. പന്യം പന്യമിത്സോതാരഃ/ ആധാവതമദ്ര്യായ/
സോമം വീരായ ശൂരായ/ 125.
10. ഇദം വസോ സുതമന്ധഃ/ പിബാസു പൂർണമുദരം/
അനാഭയിന്നരിമാ തേ/

१३

१. तद्वो गाय सुते सचा। पुरुहूताय सत्वने। शय्यत्गवे न शाकिने। ११७
२. यस्ते नूनं शतक्रतो। इन्द्रद्युम्नितमो मदः। तेन नूनं मदे मदे। ११८
३. गाव उपवदावटे। महीयज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया। ११९
४. अरमश्वाय गायत। श्रुतकक्षारङ्गवे। अरमिन्द्रस्य धाम्ने। १२०
५. तमिन्द्रं वाजयामसि। महे वृत्राय हन्तव। स वृषा वृषभो भुवत्। १२१
६. त्वमिन्द्रबलादधि। सहसा जात ओजसा। त्वं सन्वृषन्वृषेदसि। १२२
७. यज्ञ इन्द्रमवर्धयत। यत्भूमिं व्यवर्तयत्। चक्राण ओपशन्दिवि। १२३

८. यदिन्द्राहय्यथात्वम्। ईशीयवस्व एक इत्। स्तोता मे गोसखा स्यात्। १२४
९. पन्यं पन्यमित्सोतारः। आधावतमद्याय। सोमं वीराय शूराय। १२५
१०. इदं वसो सुतमन्धः। पिबासु पूर्णमुदरम्। अनाभयिन्नरिमा ते। १२६

14

1. ഉദ്ഘേദഭിശ്രുതാമഘം/ വൃഷഭന്നരിയാപസം/
അസ്താരമേഷി സൂര്യ/ 127
2 യദദ്യകച്ച വൃത്രഹൻ/ ഉദഗാ അഭി സൂര്യ/
സർവം തദിന്ദ്ര തേ വശേ/ 128
3. യ ആനയത്പരാവതഃ/ സുനീതീ തുർവശയ്യദും/
ഇന്ദ്രസ്സനോ യുവാ സഖാ/ 129
4. മാ ന ഇന്ദ്രാഭ്യാ ദിശഃ/ സൂരോ അക്തുഷ്വായമത്/
ത്വാ യുജാ വനേമ തത്/ 130
5. ഏന്ദ്ര സാനസി രയിം/ സജിത്വാനം സദാസഹം/
വർഷിഷ്ഠമൂതയേ ഭര/ 131
6. ഇന്ദ്രം വയം മഹാധനേ/ ഇന്ദ്രമർഭേ ഹവാമഹേ/
യുജം വൃത്രേഷു വജ്രിണം/ 132
7. അപിബത്കദ്രുവസ്സുതം/ ഇന്ദ്രസ്സഹസ്ര ബാഹ്വേ/
തത്രാദദിഷ്ട പൗംസ്യം/ 133
8. വയമിന്ദ്രത്വായവഃ/ അഭിപ്രനോ നുമോ വൃഷൻ/
വിദ്ധീത്വാസ്യ നോ വസോ/ 134
9. ആഘായേ അഗ്നിമിന്ധതേ/ സ്തൃണന്തി ബർഹിരാനുഷക്/
യേഷാമിന്ദ്രോ യുവാ സഖാ/ 135
10. ഭിന്ധി വിശ്വാ അപ ദ്വിഷഃ/പരിബാധോ ജഹീമൃധഃ/
വസുസ്പാർഹന്തദാഭര/ 136

१४

१. उत्घेदभिश्रुतामघम्। वृषभन्नरियापसम्। अस्तारमेषि सूर्य। १२७
२. यदद्यकच्च वृत्रहन्। उदगा अभि सूर्य। सर्वन्तदिन्द्र ते वशे। १२८
३. य आनयत्परावतः। सुनीती तुर्वशय्यदुम्। इन्द्रस्सनो युवा सखा। १२९
४. मा न इन्द्राभ्यादिशः। सूरो अक्तुष्वायमत्। त्वा युजा वनेम तत्। १३०
५. एन्द्र सानसि रयिम्। सजित्वानं सदासहम्। वर्षिष्ठमूतये भर। १३१
६. इन्द्रं वयं महाधने। इन्द्रमर्भे हवामहे। युजं वृत्रेषु वज्रिणम्। १३२
७. अपिबत्कद्रुवस्सुतम्। इन्द्रस्सहस्र बाह्वे। तत्रादादिष्ट पौंस्यम्। १३३
८. वयमिन्द्रत्वायवः। अभिप्रनो नुमो वृषन्। विद्धीत्वारस्य नो वसो। १३४

९. आघाये अग्निमिन्धते। स्तृणन्ति बर्हिरानुषक्। येषामिन्द्रो युवा सखा। १३५
१०.भिन्धि विश्वा अप द्विषः। परिबाधो जहीमृधः। वसुस्पार्हन्तदाभर। १३६

15

1. ഈഹേവ ശൃണ്വ ഏഷാം/ കശാഹസ്തേഷു യദ്വദാൻ/
നിയാമൈശ്ചിത്രമൃഞ്ജതേ/ 137
2. ഇമ ഉ ത്വാ വിചക്ഷതേ/ സഖായ ഇന്ദ്ര സോമിനഃ/
പുഷ്ടാവന്തോ യഥാ പശും/ 138
3. സമസ്യമന്യവേ വിശഃ/ വിശ്വേ നമന്തകൃഷ്ടയഃ/
സമുദ്രായേവ സിന്ധവഃ/ 139
4. ദേവാനാമിദവോ മഹത്/ തദാ വൃണീമഹേ വയം/
വൃഷ്ണാമസ്മഭ്യമൂതയേ/ 140
5. സോമാനാം സ്വരണം/ കൃണുഹി ബ്രഹ്മണസ്പതേ/
കക്ഷീവന്തയ്യ ഔശിജഃ/ 141
6. ബോധന്മനാ ഇദസ്തു നഃ/ വൃത്രഹാ ഭൂര്യാസുതിഃ/
ശൃണോതു ശക്ര ആശിഷം/ 142
7. അദ്യ നോ ദേവ സവിതഃ/ പ്രജാവത്സാവീസ്സൗഭഗം/
പരാ ദുഷ്വപ്ന്യം സു വ/ 143
8. ക്വാസ്യ വൃഷഭോ യുവാ/ തുവിഗ്രീവോ അനാനതഃ/
ബ്രഹ്മാ കസ്തം സപര്യതി/ 144
9. ഉപഹ്വരേ ഗിരീണാം/ സങ്ഗമേ ച നദീനാം/
ധിയാ വിപ്രോ അജായത/ 145
10. പ്രസമ്രാജഞ്ചർഷണീനാം/ ഇന്ദ്രം സ്തോതാ നവ്യം ഗീർഭിഃ/
നരന്നൃഷാഹം മംഹിഷ്ഠം/ 146.

१५

१. ईहेव शृण्व एषाम्। कशाहस्तेषु यद्वदान्। नियामैश्चित्रमृञ्जते। १३७
२. इम उ त्वा विचक्षते। सखाय इन्द्र सोमिनः। पृष्टावन्तो यथा पशुम्। १३८
३. समस्यमन्यवे विशः। विश्वे नमन्तकृष्टयः। समुद्रायेव सिन्धवः। १३९
४. देवानामिदवो महत्। तदा वृणीमहे वयम्। वृष्णामस्मभ्यमूतये। १४०
५. सोमानां स्वरणम्। कृणुहि ब्रह्मणस्पते। कक्षीवन्तय्य औशिजः। १४१
६. बोधन्मना इदस्तु नः। वृत्रहा भूर्यासुतिः। शृणोतु शक्र आशिषम्। १४२
७. अद्य नो देव सवितः। प्रजावत्सावीस्सौभगम्। परा दुष्वप्न्यं सु व। १४३
८. क्वास्य वृषभो युवा। तुविग्रीवो अनानतः। ब्रह्मा कस्तं सपर्यति। १४४
९. उपह्वरे गिरीणाम्। सङ्गमे च नदीनाम्। धिया विप्रो अजायत। १४५
१०.प्रसम्राजञ्चर्षणीनाम्। इन्द्रं स्तोता नव्यङ्गीर्भिः। नरन्नृषाहं मंहिष्ठम्। १४६

16

1. അപാദു ശിപ്രിയന്ധസഃ/ സുദക്ഷസ്യ പ്രഹോഷിണഃ/
ഇന്ദോരിന്ദ്രോ യവാശിരഃ/ 147
2. ഇമാ ഉ ത്വാ പുരോവസോ/ അഭിപ്രനോനവുർഗിരഃ/
ഗാവോ വത്സന്ന ധേനവഃ/ 148
3. അത്രാഹ ഗോരമന്വത/ നാമ ത്വഷ്ടുരപീച്യം/
ഇത്ഥാ ചന്ദ്രമസോ ഗൃഹേ/ 149
4. യദിന്ദ്രോ അനയദ്രിതഃ/ മഹീരപോ വൃഷന്തമഃ/
തത്ര പൂഷാ ഭുവത്സചാ/ 150
5. ഗൗർധയതി മരുതാം/ ശ്രവസ്യുർമാതാ മഘോനാം/
യുക്താ വഹ്നീ രഥാനാം/ 151
6. ഉപ നോ ഹരിഭിസ്സുതം/ യാഹി മദാനാം പതേ/
ഉപ നോ ഹരിഭിസ്സുതം/ 152
7. ഇഷ്ടാ ഹോത്രാ അസൃക്ഷത/ ഇന്ദ്രം വൃധന്തോ അധ്വരേ/
അച്ഛാവഭൃഥമോജസാ/ 153
8. അഹമിദ്ധിപിതുഃ പരി/ മേധാമൃതസ്യ ജഗ്രഹ/
അഹം സൂര്യ ഇവാജനി/ 154
9. രേവതീർനസ്സധമാദേ/ ഇന്ദ്രേ സന്തു തുവിവാജാഃ/
ക്ഷുമന്തോ യാഭിർമദേമ/ 155
10. സോമഃ പൂഷാ ച ചേതതുഃ/ വിശ്വാസാം സുക്ഷിതീനാം/
ദേവത്രാ രഥ്യോർഹിതഃ/ 156

१६

१. अपादु शिप्रियन्धसः। सुदक्षस्य प्रहोषिणः। इन्दोरिन्द्रो यवाशिरः। १४७
२. इमा उ त्वा पुरोवसो। अभिप्रनोनवुर्गिरः। गावो वत्सन्न धेनवः। १४८
३. अत्राह गोरमन्वत। नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे। १४९
४. यदिन्द्रो अनयद्रितः। महीरपो वृषन्तमः। तत्र पूषा भुवत्सचा। १५०
५. गौर्धयति मरुताम्। श्रवस्युर्माता मघोनाम्। युक्ता वह्नी रथानाम्। १५१
६. उप नो हरिभिस्सुतम्। याहि मदानां पते। उप नो हरिभिस्सुतम्। १५२
७. इष्टा होत्रा असृक्षत। इन्द्रं वृधन्तो अध्वरे। अच्छावभृथमोजसा। १५३
८. अहमिद्धि पितुःपरि। मेधामृतस्य जग्रह। अहं सूर्य इवाजनि। १५४
९. रेवतीर्नस्सधमादे। इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम। १५५
१०. सोमःपूषा च चेततुः। विश्वासां सुक्षितीनाम्। देवत्रा रथ्योर्हितः। १५६

17

1. പാന്തമാവോ അന്ധസഃ/ ഇന്ദ്രമഭിപ്രഗായത/
   വിശ്വാസാഹം ശതക്രതും/ മംഹിഷ്ഠഞ്ചർഷണീനാം/ 157
2. പ്ര വ ഇന്ദ്രായ മാദനം/ ഹരിയശ്വായ ഗായത/
   സഖായസ്സോമ പാവ്ന്നേ/ 158
3. വയമുത്വാ തദിദർഥാഃ/ ഇന്ദ്രത്വായന്തസ്സഖായഃ/
   കണ്വാ ഉക്ഥേഭിർജരന്തേ/ 159
4. ഇന്ദ്രായ മദ്വനേ സുതം/ പരിഷ്ടോഭന്തു നോ ഗിരഃ/
   അർകമർചന്തു കാരവഃ/ 160.
5. അയന്ത ഇന്ദ്ര സോമഃ/ നിപൂതോ അധി ബർഹിഷി/
   ഏഹീമസ്യ ദ്രവാ പിബ/ 161
6. സുരൂപകൃത്നുമൂതയേ/ സുദുഘാമിവ ഗോദുഹേ/
   ജുഹൂമസി ദ്യവി ദ്യവി/ 162
7. അഭിത്വാ വൃഷഭാസുതേ/ സുതം സൃജാമി പീതയേ/
   തൃമ്പാ വ്യശ്ഞുഹീ മദം/ 163.
8. യ ഇന്ദ്ര ചമസേഷ്വാ/ സോമശ്ചമൂഷു തേ സുതഃ/
   പിബേദസ്യ ത്വമീശിഷേ/ 164
9. യോഗേയോഗേ തവസ്തരം/ വാജേ വാജേ ഹവാമഹേ/
   സഖായ ഇന്ദ്രമൂതയേ/ 165
10. ആ ത്വേതാ നിഷീദത/ ഇന്ദ്രമഭിപ്രഗായത/
    സഖായസ്തോമവാഹസഃ/ 166

१७

१. पान्तमावो अन्धसः। इन्द्रमभिप्रगायत।
   विश्वासाहं शतक्रतुम्। मंहिष्ठञ्चर्षणीनाम्। १५७
२. प्र व इन्द्राय मादनम्। हरियश्वाय गायत। सखायस्सोम पाव्न्ने। १५८
३. वयमुत्वा तदिदर्थाः। इन्द्रत्वायन्तस्सखायः। कण्वा उक्थेभिर्जरन्ते। १५९
४. इन्द्राय मद्वने सुतम्। परिष्टोभन्तु नो गिरः। अर्कमर्चन्तु कारवः। २६०
५. अयन्त इन्द्र सोमः। निपूतो अधि बर्हिषि। एहीमस्य द्रवा पिब। १६१
६. सुरूपकृत्नुमूतये। सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि। १६२
७. अभित्वा वृषभा सुते। सुतं सृजामि पीतये। तृम्पा व्यश्नुही मदम्। १६३
८. य इन्द्र चमसेष्वा। सोमश्चमूषु ते सुतः। पिबेदस्य त्वमीशिषे। १६४
९. योगे योगे तवस्तरम्। वाजे वाजे हवामहे। सखाय इन्द्रमूतये। १६५
१०.आ त्वेता निषीदत। इन्द्रमभिप्रगायत। सखायस्तोमवाहसः। १६६

18

1. ഇദം ഹ്യന്വോജസാ/ സുതം രാധാനാമ്പതേ/
പിബാ ത്വാസ്യ ഗിർവണഃ/ 167
2. മഹം ഇന്ദ്രഃ പുരശ്ചനഃ/ മഹീത്വമസ്തു വജ്രിണേ/
ദ്യൗർന പ്രഥിനാശവഃ/ 168
3. ആ തൂ ന ഇന്ദ്ര ക്ഷുമന്തം/ ചിത്രം ഗ്രാഭം സങ്ഗൃഭായ/
മഹാഹസ്തീ ദക്ഷിണേന/ 169
4. അഭി പ്രഗോ പതിങ്ഗിരഃ/ ഇന്ദ്രമർചയഥാ വിദേ/
സൂനും സത്യസ്യ സത്പതിം/ 170
5. കയാനശ്ചിത്ര ആ ഭുവത്/ ഊതിസ്സദാവൃധസ്സഖാ/
കയാ ശചിഷ്ഠയാ വൃതഃ/ 171
6. ത്യമുവസ്സത്രാസാഹം/ വിശ്വാസു ഗീർഷ്ടായതം/
ആ ച്യാവയസ്യൂതയേ/ 172
7. സദസസ്പതിമദ്ഭുതം/ പ്രിയമിന്ദ്രസ്യ കാമ്യം/
സനിം മേധാമയാസിഷം/ 173
8. യേ തേ പന്ഥാ അധോ ദിവഃ/ യേഭിർവ്യശ്വമൈരയഃ/
ഉത ശ്രോഷന്തു നോ ഭുവഃ/ 174
9. ഭദ്രം ഭദ്രന്ന ആഭര/ ഇഷമൂർജം ശതക്രതോ/
യദിന്ദ്രമൃഡയാസി നഃ / 175
10. അസ്തി സോമോ അയം സുതഃ/ പിബന്ത്യസ്യ മരുതഃ/
ഉത സ്വരാജോ അശ്വിനാ/ 176

१८

१. इदं ह्यन्वोजसा। सुतं राधानाम्पते। पिबा त्वास्य गिर्वणः। १६७
२. महम् इन्द्रः पुरश्चनः। महीत्वमस्तु वज्रिणे। द्यौर्न प्रथिनाशवः। १६८
३. आ तू न इन्द्र क्षुमन्तम्। चित्रङ्ग्राभं सङ्गृभाय। महाहस्ती दक्षिणेन। १६९
४. अभि प्रगो पतिङ्गिरः। इन्द्रमर्चयथा विदे। सूनुं सत्यस्य सत्पतिम्। १७०
५. कयानश्चित्र आभुवत्। ऊतिस्सदावृधस्सखा। कया शचिष्ठया वृतः। १७१
६. त्यमुवस्सत्रासाहम्। विश्वासु गीर्ष्वायतम्। आ च्यावयस्यूतये। १७२
७. सदसस्पतिमत्भुतम्। प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम्। १७३
८. ये ते पन्था अधो दिवः। येभिर्व्यश्वमैरयः। उत श्रोषन्तु नो भुवः। १७४
९. भद्रं भद्रन्न आभर। इषमूर्जं शतक्रतो। यदिन्द्र मृडयासि नः। १७५
१०. अस्ति सोमो अयं सुतः। पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना। १७६

19

1. ഈങ്ഖയന്തീരപസ്യുവഃ/ ഇന്ദ്രഞ്ജാതമുപാസതേ/
വന്വാനാസസ്സുവീര്യം/ 177
2. നകിദേവാ ഇനീമസി/ നക്യായോപയാമസി/
മന്ത്രശ്രുത്യഞ്ചരാമസി/ 178
3. ദോഷോ ആഗാത് ബൃഹദ്ഗായ/ ദ്യുമദ്ഗമാഥർവണ/
സ്തുഹി ദേവം സവിതാരം/ 179
4. ഏഷോ ഉഷാ ആ പൂർവ്യ/ വ്യുച്ഛതി പ്രിയാ ദിവഃ/
സ്തുഷേ വാമശ്വിനാ ബൃഹത്/ 180
5. ഇന്ദ്രോ ദധീചോ അസ്ഥഭിഃ/ വൃത്രാണ്യപ്രതിഷ്കുതഃ/
ജഘാന നവതീർനവ/ 181
6. ഇന്ദ്രേ ഹി മത്സ്യന്ധസാ/ വിശ്വേഭിസ്സോമപർവഭിഃ/
മഹം അഭിഷ്ടിരോജസാ/ 182
7. ആ തൂന ഇന്ദ്ര വൃത്രഹൻ/ അസ്മാകമർധമാഗഹി/
മഹാൻ മഹീഭിരൂതിഭിഃ / 183
8. ഓജസ്തദസ്യ തിത്വിഷേ/ ഉഭേ യത്സമവർതയത്/
ഇന്ദ്രശ്ചർമേവ രോദസീ/ 184
9. അയമുതേ സമതസി/ കപോത ഇവ ഗർഭധിം/
വചസ്തച്ചിന്ന ഓഹസേ/ 185
10. വാത ആവാതു ഭേഷജം/ ശംഭുമയോഭുനോ ഹൃദേ/
പ്ര ന ആയൂംഷി താരിഷത്/ 186

१९

१. ईङ्खन्तीरपस्युवः। इन्द्रञ्जातमुपासते। वन्वानासस्सुवीर्यम्। १७७
२. नकिदेवा इनीमसि। नक्यायोपयामसि। मन्त्रश्रुत्यञ्चरामसि। १७८
३. दोषो आगात् बृहत्गाय। द्युमत्गमाथर्वण। स्तुहि देवं सवितारम्। १७९
४. एषो उषा आ पूर्व्य। व्युच्छति प्रिया दिवः। स्तुषे वामश्विना बृहत्। १८०
५. इन्द्रो दधीचो अस्थभिः। वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव। १८१
६. इन्द्रो हि मत्स्यन्धसा। विश्वेभिस्सोमपर्वभिः। महम् अभिष्टिरोजसा। १८२
७. आ तून इन्द्र वृत्रहन्। अस्माकमर्धमागहि। महान् महीभिरूतिभिः। १८३
८. ओजस्तदस्य तित्विषे। उभे यत्समवर्तयत्। इन्द्रश्चर्मेव रोदसी। १८४
९. अयमुते समतसि कपोत इव गर्भधिम्। वचस्तच्चिन्न ओहसे।। १८५.
१०.वात आवातु भेषजम्। शंभुमयोभुनो हृदे। प्र न आयूंषि तारिषत्। १८६

20

1. യം രക്ഷന്തി പ്രചേതസഃ/ വരുണോ മിത്രോ അര്യമാ/
നകിസ്സുദഭ്യതേ ജനഃ/ 187
2. ഗവ്യോഷുണോ യഥാ പുരാ/അശ്വയോത രഥയാ/
വരിവസ്യാ മഹോനാം/ 188
3. ഇമാസ്ത ഇന്ദ്ര പൃശ്ഞയഃ/ ഘൃതം ദുഹത ആശിരം/
ഏനാമൃതസ്യ പിപ്യുഷീഃ/ 189
4. അയാ ധിയാ ച ഗവ്യയാ/ പുരുണാമൻ പുരുഷ്ടുത/
യത്സോമേ സോമ ആഭുവഃ/ 190
5. പാവകാ നഃ സരസ്വതീ/ വാജേഭിർവാജിനീവതീ/
യജ്ഞം വഷ്ടു ധിയാവസുഃ/ 191
6. ക ഇമന്നാഹുഷീഷ്വാ/ ഇന്ദ്രം സോമസ്യ തർപയാത്/
സ നോ വസൂന്യാഭരാത്/ 192
7. ആ യാഹി സുഷുമാഹിതേ/ഇന്ദ്ര സോമം പിബാ ഇമം/
ഏദം ബർഹിസ്സദോ മമ/ 193
8. മഹി ത്രീണാമവരസ്തു/ ദ്യുക്ഷം മിത്രസ്യാര്യമ്ണഃ/
ദുരാധർഷം വരുണസ്യ/ 194
9. ത്വാവതഃ പുരോവസോ/ വയമിന്ദ്ര പ്രണേതഃ/
സ്മസിസ്ഥാതർഹരീണാം/ 195

२०

१. यं रक्षन्ति प्रचेतसः। वरुणो मित्रो अर्यमा। नकिस्सदभ्यते जनः। १८७
२. गव्योषुणो यथा पुरा। अश्वयोत रथया। वरिवस्या महोनाम्। १८८
३. इमास्त इन्द्र पृश्ञयः। घृतन्दुहत आशिरम्। एनामृतस्य पिप्युषीः। १८९
४. अया धिया च गव्यया। पुरुणामन् पुरुष्टुत। यत्सोमे सोम आभुवः। १९०
५. पावका नस्सरस्वती। वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः। १९१
६. क इमन्नाहुषीष्वा। इन्द्रं सोमस्य तर्पयात्। स नो वसून्याभरात्। १९२
७. आ याहि सुषुमाहिते। इन्द्र सोमं पिबा इमम्। एदं बर्हिस्सदो मम। १९३
८. महि त्रीणामवरस्तु। द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य। १९४
९. त्वावतःपुरोवसो। वयमिन्द्र प्रणेतः। स्मसिस्थातर्हरीणाम्। १९५

21

1. ഉത്വാ മദന്തു സോമാഃ/ കൃണുഷ്വ രാധോ അദ്രിവഃ/
അവ ബ്രഹ്മ ദ്വിഷോ ജഹി/ 196

2. ഗിർവണഃ പാഹി നസ്സുതം/ മധോർധാരാഭിരജ്യസേ/
ഇന്ദ്ര ത്വാദാതമിദ്യശഃ/ 197
3. സദാവ ഇന്ദ്രശ്ചർകൃഷത്/ ഉപോ നു സ സപര്യൻ/
ന ദേവ ഋതശ്ശൂര ഇന്ദ്രഃ / 198
4. ആ ത്വാ വിശന്ത്വിന്ദവഃ/ സമുദ്രമിവ സിന്ധവഃ/
ന ത്വാമിന്ദ്രാതിരിച്യതേ/ 199
5. ഇന്ദ്രമിത് ഗാഥിനോ ബൃഹത്/ ഇന്ദ്രമർകേഭിരർകിണഃ/
ഇന്ദ്രം വാണീരനൂഷത/ 200
6. ഇന്ദ്ര ഇഷേ ദദാതു നഃ/ ഋഭുക്ഷണമൃഭും രയിം/
വാജീ ദദാതു വാജിനം/ 201
7. ഇന്ദ്രോ അങ്ഗ മഹദ്ഭയം/ അഭീഷദപ ചുച്യവത്/
സ ഹി സ്ഥിരോ വിചർഷണിഃ/ 202
8. ഇമാ ഉ ത്വാ സുതേ സുതേ/ നക്ഷന്തേ ഗിർവണോ ഗിരഃ/
ഗാവോ വത്സന്ന ധേനവഃ/ 202
9. ഇന്ദ്രാനു പൂഷണാ വയം/ സഖ്യായ സ്വസ്തയേ/
ഹുവേമ വാജസാതയേ/ 204
10. ന കീന്ദ്രത്വദുത്തരം/ ന ജ്യായോ അസ്തി വൃത്രഹൻ/
നക്യേവയ്യഥാത്വം/ 205

२१

१. उ त्वा मदन्तु सोमाः। कृणुष्व राधो अद्रिवः। अव ब्रह्म द्विषो जहि। १९६
२. गिर्वणःपाहि नस्सुतम्। मधोर्धाराभिरज्यसे। इन्द्र त्वादातमिद्यशः। १९७
३. सदाव इन्द्रश्चर्कृषत्। उपो नु स सपर्यन्। न देव ऋतश्शूर इन्द्रः। १९८
४. आ त्वा विशन्त्विन्दवः। समुद्रमिव सिन्धवः। न त्वामिन्द्रातिरिच्यते। १९९
५. इन्द्रमित् गाथिनो बृहत्। इन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत। २००
६. इन्द्र इषे ददातु नः। ऋभुक्षणमृभुं रयिम्। वाजी ददातु वाजिनम्। २०१
७. इन्द्रो अङ्ग महत् भयम्। अभीषदप चुच्यवत्। स हि स्थिरो विचर्षणिः। २०२
८. इमा उ त्वा सुते सुते। नक्षन्ते गिर्वणो गिरः। गावो वत्सन्न धेनवः। २०३
९. इन्द्रा नु पूषणा वयम्। सख्याय स्वस्तये। हुवेम वाजसातये। २०४
१०.न कीन्द्रत्वदुत्तरम्। न ज्यायो अस्ति वृत्रहन्। नक्येवय्यथात्वम्। २०५

22

1. തരണിം വോ ജനാനാം/ ത്രദം വാജസ്യ ഗോമതഃ/
സമാനമുപ്രശംസിഷഃ/ 206

2. അസൃഗ്രമിന്ദ്ര തേ ഗിരഃ/ പ്രതിത്വാമുദഹാസത/
സജോഷാ വൃഷഭം പതിം/ 207
3. സുനീഥോ ഘാസ മർത്യഃ/ യമ്മരുതോ യമര്യമാ/
മിത്രാഃ പാന്ത്യദ്രുഹോ അതിദ്വിഷഃ/ 208
4. യദ്ധീഷാവിന്ദ്രയത്സ്ഥിരേ/ യത്പർശാനേ പരാഭൃതം/
വസുസ്പാർഹന്തദാഭര/ 209
5. ശ്രുതം വോ വൃത്രഹന്തമം/ പ്രശർധഞ്ചർഷണീനാം/
ആശിഷേ രാധസേ മഹേ/ 210
6. അരന്ത ഇന്ദ്രശ്രവസേ/ ഗമേമ ശൂരത്വാവതഃ/
അരം ശക്ര പരേമണി/ 211
7. ധാനാവന്തം കരംഭിണം/ അപൂപവന്തമുക്ഥിനം/
ഇന്ദ്ര പ്രാതർജുഷസ്വ നഃ/ 212
8. അപാം ഫേനേന നമുചേഃ/ശിര ഇന്ദ്രോദവർതയഃ/
വിശ്വാ യദജയസ്പൃധഃ/ 213
9. ഇമേ ത ഇന്ദ്ര സോമാഃ/ സുതാസോ യേ ച സോത്വാഃ/
തേഷാം മത്സ്വ പ്രഭൂവസോ/ 214
10. തുഭ്യം സുതാസസ്സോമാഃ/സ്തീർണം ബർഹിർവിഭാവസോ/
സ്തോതൃഭ്യ ഇന്ദ്ര മൃഡയ/ 215

२२

१. तरणिं वो जनानाम्। त्रदं वाजस्य गोमतः। समानमुप्रशंसिषः। २०६
२. असृग्रमिन्द्र ते गिरः। प्रतित्वामुदहासत। सजोषा वृषभं पतिम्। २०७
३. सुनीथो घास मर्त्यः। यम्मरुतो यमर्यमा। मित्राःपान्त्यद्रुहो अतिद्विषः। २०८
४. यद्वीलाविन्द्रयत्स्थिरे। यत्परशाने पराभृतम्। वसुस्पारहन्तदाभर। २०९
५. श्रुतं वो वृत्रहन्तमम्। प्रशर्धञ्चर्षणीनाम्। आशिषे राधसे महे। २१०
६. अरन्त इन्द्रश्रवसे। गमेम शूरत्वावतः। अरं शक्र परेमणि। २११
७. धानावन्तं करंभिणम्। अपूपवन्तमुक्थिनम्। इन्द्र प्रातर्जुषस्व नः। २१२
८. अपां फेनेन नमुचेः। शिर इन्द्रोदवर्तयः। विश्वा यदजयस्पृधः। २१३
९. इमे त इन्द्र सोमाः। सुतासो ये च सोत्वाः। तेषां मत्स्व प्रभूवसो। २१४
१०. तुभ्यं सुतासस्सोमाः। स्तीर्णं बर्हिर्विभावसो। स्तोतृभ्य इन्द्र मृडय। २१५

23

1. ആ വ ഇന്ദ്രം കൃവിയ്യഥാ/ വാജയന്തശ്ശതക്രതും/
മംഹിഷ്ഠം സിഞ്ച ഇന്ദുഭിഃ/ 216

2. അതശ്ചിതിന്ദ്ര ന ഉപ/ ആയാഹി ശതവാജയാ/
ഇഷാ സഹസ്രവാജയാ/ 217
3. ആ ബുന്ദം വൃത്രഹാ ദദേ/ ജാതഃ പൃച്ഛദ്വിമാതരം/
ക ഉഗ്രാഃ കേഹ ശൃണ്വിരേ/ 218
4. ബൃബദുക്ഥം ഹവാമഹേ/ സൃപ്രകരസ്നമൂതയേ/
സാധഃ കൃണ്വന്തമവസേ/ 219
5. ഋജുനീതീ നോ വരുണഃ/ മിത്രോ നയതി വിദ്വാന്സഃ/
അര്യമാ ദേവൈസ്സജോഷാഃ/ 220
6. ദൂരാദിഹേവ യത്സതഃ/ അരുണപ്സുരശിശ്വിതത്/
വിഭാനും വിശ്വഥാതനത്/ 221
7. ആ നോ മിത്രാ വരുണാ/ ഘൃതൈർഗവ്യൂതിമുക്ഷതം/
മധ്വാ രജാംസി സുക്രതൂ/ 222
8. ഉദുത്യേ സൂനവോ ഗിരഃ/ കാഷ്ഠാ യജ്ഞേഷ്വത്നത/
വാ ശ്രാ അഭിജ്ഞു യാതവേ/ 223
9. ഇദം വിഷ്ണുർവിചക്രമേ/ ത്രേധാ നിദധേ പദം/
സമൂഢമസ്യ പാംസുലേ/ 224

२३

१. आ व इन्द्रङ्कृविय्यथा। वाजयन्तश्शतक्रतुम्। मंहिष्ठं सिञ्च इन्दुभिः। २१६
२. अतश्चितिन्द्र न उप। आयाहि शतवाजया। इषा सहस्रवाजया। २१७
३. आ बुन्दं वृत्रहा ददे। जातः पृच्छद्विमातरम्। क उग्राः केह शृण्विरे। २१८
४. बृबदुक्थं हवामहे। सृप्रकरस्नमूतये। साधः कृण्वन्तमवसे। २१९
५. ऋजुनीती नो वरुणः। मित्रो नयति विद्वान्सः। अर्यमा देवैस्सजोषाः। २२०
६. दूरादिहेव यत्सतः। अरुणप्सुरशिश्वितत्। विभानुं विश्वथातनत्। २२१
७. आ नो मित्रा वरुणा। घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू। २२२
८. उदुत्ये सूनवो गिरः। काष्ठा यज्ञेष्वत्नत। वा श्रा अभिज्ञु यातवे। २२३
९. इदं विष्णुर्विचक्रमे। त्रेधा निदधे पदम्। समूढमस्य पांसुले। २२४

24

1. അതീഹി മന്യുഷാവിണം/ സുഷുവാംസമുപൈരയ/
അസ്യ രാതൗ സുതം പിബ/ 225
2. കദു പ്രചേതസേ മഹേ/ വചോ ദേവായ ശസ്യതേ/
തദിധ്യസ്യ വർധനം/ 226
3. ഉക്ഥഞ്ച ന ശസ്യമാനം/ നാഗൗരൈരാചികേത[1]/
ന ഗായത്രം ഗീയമാനം/ 227

4. ഇന്ദ്ര ഉക്ഥേഭിർമന്ദിഷ്ഠഃ/ വാജാനാഞ്ച വാജപതിഃ/
ഹരിവാൻ സുതാനാം സഖാ/ 228
5. ബ്രാഹ്മണാദിന്ദ്ര രാധസഃ/ പിബാ സോമമൃതും രനു/
തവേദു സഖ്യമസ്തൃതം/ 229
6. വയം ഘാ തേ അപി ശ്മസി/ സ്തോതാര ഇന്ദ്രഗിർവണഃ/
ത്വന്നോ ജിന്വ സോമപാഃ / 230
7. ആ യാഹ്യുപനസ്സുതം/ വാജേഭിർമാ ഹൃണീ യഥാഃ
മഹം ഇവ യുവജാനിഃ/ 231
8. കദാ വസോ സ്തോത്രം ഹര്യത ആ/ അവ ശ്മശാരുധദ്ധാഃ/
ദീർഘം സുതം വാതാപ്യായ/ 232
9. ഏന്ദ്ര പൃക്ഷു കാസുചിത്/ നൃമ്ണാ തനൂഷു ധേഹിനഃ/
സത്രാജിദുഗ്ര പൗംസ്യം/ 233
10. അയമേനം സചതാം സുതഃ/ മന്ദിമിന്ദ്രായ മന്ദിനേ/
ചക്രിം വിശ്വാനി ചക്രയേ/ 234

२४

१. अतीहि मन्युषाविणम्। सुषुवांसमुपैरय। अस्य रातौ सुतं पिब। २२५
२. कदु प्रचेतसे महे। वचो देवाय शस्यते। तदिध्यस्य वर्धनम्। २२६
३. उक्थञ्च न शस्यमानम्। नागोरैराचिकेत। न गायत्रं गीयमानम्। २२७
४. इन्द्र उक्थेभिर्मन्दिष्ठः। वाजानाञ्च वाजपतिः। हरिवान् सुतानां सखा। २२८
५. ब्राह्मणादिन्द्र राधसः। पिबा सोममृतुं रनु। तवेदु सख्यमस्तृतम्। २२९
६. वयं घाते अपिश्मसि। स्तोतार इन्द्र गिर्वणः। त्वन्नो जिन्व सोमपाः। २३०
७. आ याह्युपनस्सुतम्। वाजेभिर्मा हृणी यथाः। महम्.इव युवजानिः। २३१
८. कदा वसो स्तोत्रं हर्यत आ। अव श्मशा रुधद्वाः। दीर्घं सुतं वाताप्याय। २३२
९. एन्द्र पृक्षु कासुचित्। नृम्णा तनूषु धेहिनः। सत्राजिदुग्र पौंस्यम्। २३३
१०. अयमेनं सचतां सुतः। मन्दिमिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये। २३४

1. അഭിത്വാ ശൂര നോനുമഃ/ അദുഗ്ധാ ഇവ ധേനവഃ/
ഈശാനമസ്യ ജഗതഃ സ്വർദൃശം/
ഈശാനമിന്ദ്ര തസ്ഥുഷഃ/ 235
2. ത്വാമിദ്ധി ഹവാമഹേ/ സാ ത്വാ വാജസ്യ കാരവഃ/
ത്വാം വൃത്രേഷ്വിന്ദ്രസത്പതിന്നരഃ/
ത്വാം കാഷ്ഠാസ്വർവതഃ/ 236
3. അഭിപ്രവസ്സുരാധസം/ ഇന്ദ്രമർചയഥാ വിദേ/

യോ ജരിത്യഭ്യോ മഘവാ പുരോവസുഃ/
സഹസ്രേണേവ ശിക്ഷതി/ 237
4. തം വോദസ്മമൃതീഷഹം/ വസോർമന്ദാനമന്ധസാ/
അഭിവത്സന്നസ്വസരേഷു ധേനവഃ/
ഇന്ദ്രം ഗീർഭിർനവാമഹേ/ 238
5. തരോഭിർവോ വിദദ്വസും/ ഇന്ദ്രം സബാധ ഊതയേ/
ബൃഹദ്ഗായന്തസ്സുതസോമേ അധ്വരേ/
ഹുവേ ഭരന്നകാരിണം/ 239
6. തരണിരിത്സിഷാസതി/ വാജം പുരന്ധ്യാ യുജാ/
ആവ ഇന്ദ്രം പുരുഹൂതന്നമേ ഗിരാ/
നേമിന്തഷ്ടേവ സുദ്രുവം/ 240
7. പിബാ സുതസ്യ രസിനഃ/ മത്സ്വാ ന ഇന്ദ്ര ഗോമതഃ/
ആപിർനോ ബോധി സധമാദ്യേ വൃധേ/
അസ്മം അവന്തു തേ ധിയഃ/ 241
8. ത്വം ഹ്യേഹി ചേരവേ/ വിദാ ഭഗം വസുത്തയേ/
ഉദ്വാവൃഷസ്വ മഘവൻ ഗവിഷ്ടയേ/
ഉദിന്ദ്രോ അശ്വമിഷ്ടയേ/ 242
9. ന ഹി വശ്ചരമഞ്ചന/ വസിഷ്ഠഃ പരിമംസതേ/
അസ്മാകമദ്യ മരുതസ്സുതേ സചാ/
വിശ്വേ പിബന്തു കാമിനഃ/ 243
10. മാചിദന്യദ്വിശംസത/ സഖായോ മാരിഷണ്യത/
ഇന്ദ്രമിത്സ്തോതാ വൃഷണം സചാ സുതേ/
മുഹുരുക്ഥാ ച ശംസത/ 244

२५

१. अभित्वा शूर नोनुमः। अदुग्धा इव धेनवः।
ईशानमस्य जगतःस्वर्दृशम्। ईशानमिन्द्र तस्थुषः। २३५
२. त्वामिद्धि हवामहे। सा तौ वाजस्य कारवः।
त्वां वृत्रेष्विन्द्रसत्पतिन्नरः। त्वां काष्ठास्वर्वतः। २३६
३. अभिप्रवस्सुराधसम्। इन्द्रमर्चयथा विदे।
यो जरितृभ्यो मघवा पुरोवसुः। सहस्त्रेणेव शिक्षति। २३७
४. तं वोदस्ममृतीषहम्। वसोर्मन्दानमन्धसा।
अभिवत्सन्नस्वसरेषु धेनवः। इन्द्रङ्गीर्भिर्नवामहे। २३८
५. तरोभिर्वो विदद्वसुम्। इन्द्रं सबाध ऊतये।
बृहत्गायन्तस्सुतसोमे अध्वरे। हुवे भरन्नकारिणम्। २३९

६. तरणिरित्सिषासति। वाजं पुरन्ध्या युजा।
आ व इन्द्रं पुरुहूतन्नमे गिरा। नेमिन्तष्टेव सुद्रुवम्। २४०
७. पिबा सुतस्य रसिनः। मत्स्वा न इन्द्र गोमतः।
आपिर्नो बोधि सधमाद्ये वृधे। अस्मं अवन्तु ते धियः। २४१
८. त्वं ह्येहि चेरवे। विदा भगं वसुत्तये।
उद्वावृषस्व मघवन् गविष्टये। उदिन्द्रो अश्वमिष्टये। २४२
९. न हि वश्चरमञ्चन। वसिष्ठःपरिमंसते।
अस्माकमद्य मरुतस्सुते सचा। विश्वे पिबन्तु कामिनः। २४३
१०. मा चिदन्यद्विशंसत। सखायो मारिषण्यत।
इन्द्रमित्स्तोता वृषणं सचा सुते। मुहुरुक्था च शंसत। २४४

26

1. നകിഷ്ടം കർമണാ നശത്/ യശ്ചകാര സദാവൃധം/
ഇന്ദ്രന്നയജ്ഞൈർവിശ്വഗൂർതമൃഭ്വസം/
അധൃഷ്ടമധൃഷ്ണുമോജസാ/ 245
2. യ ഋതേ ചിദഭിശ്രിഷഃ/ പുരാ ജത്രുഭ്യ ആ തൃദഃ/
സന്ധാത സന്ധിമ്മഘവാ പുരോവസുഃ/
നിഷ്കർതാ വിഹ്രുതം പുനഃ/ 246
3. ആ ത്വാ സഹസ്രമാശതം/ യുക്താ രഥേ ഹിരണ്യയേ/
ബ്രഹ്മയുജ്യോ ഹരയ ഇന്ദ്രകേശിനഃ/
വഹന്തു സോമപീതയേ/ 247
4. ആമന്ദ്രൈരിന്ദ്രഹരിഭിഃ/ യാഹി മയൂരരോമഭിഃ/
മാത്വാ കേചിന്നിയേമുർവിന്ന പാശിനഃ/
അതി ധന്വേവ തം ഇഹി/ 248
5. ത്വമങ്ഗ പ്രശംസിഷഃ/ ദേവശ്ഛവിഷ്ഠമർത്യം/
ന ത്വദന്യോ മഘവന്നസ്തി മർഡിതാ/
ഇന്ദ്ര ബ്രവീമി തേ വചഃ/ 249
6. ത്വമിന്ദ്ര യശാ അസി/ ഋജീഷി ശവസസ്പതിഃ/
ത്വം വൃത്രാണി ഹംസ്യപ്രതീന്യേക ഇത് പുരുഃ/
അനുത്തശ്ചർഷണീ ധൃതിഃ/ 250
7. ഇന്ദ്രമിദ്ദേവതാതയേ/ ഇന്ദ്രം പ്രയത്യധ്വരേ/
ഇന്ദ്രം സമീകേ വനിനോ ഹവാമഹേ/
ഇന്ദ്രന്ധനസ്യ സാതയേ/ 251

8. ഇമാ ഉത്യാ പുരോവസോ/ ഗിരോ വർധനന്തു യാ മമ/
പാവകവർണാശ്ശുചയോ വിപശ്ചിതഃ/
അഭിസ്തോമൈരനൂഷത/ 252

9. ഉദുത്യേ മധുമത്തമാഃ/ ഗിരസ്തോമാസ ഈരതേ/
സത്രാജിതോ ധനസാ അക്ഷിതോതയഃ/
വാജയന്തോ രഥാ ഇവ/ 253

10. യഥാ ഗൗരോ അപാകൃതം/ തൃഷ്യന്നേത്യവേരിണം/
അപിത്വേനഃ പ്രപിത്വേ തൂയമാഗഹി/
കണ്വേഷു സുസചാ പിബ/ 254

२६

१. नकिष्टङ्कर्मणा नशत्। यश्चकार सदावृधम्।
इन्द्रन्नयज्ञैर्विश्वगूर्तमृभ्वसम्। अधृष्टन्धृष्णुमोजसा। २४५

२. य ऋते चिदभिश्रिषः। पुरा जत्रुभ्य आ तृदः।
सन्धात सन्धिं मघवा पुरोवसुः। निष्कर्ता विह्रुतं पुनः। २४६

३. आ त्वा सहस्रमाशतम्। युक्ता रथे हिरण्यये।
ब्रह्मयुजो हरय इन्द्रकेशिनः। वहन्तु सोमपीतये। २४७

४. आमन्द्रैरिन्द्रहरिभिः। याहि मयूररोमभिः।
मात्वा केचिन्नियेमुर्विन्न पाशिनः। अति धन्वेव तम् इहि। २४८

५. त्वमङ्ग प्रशंसिषः। देवश्शविष्ठमर्त्यम्।
न त्वदन्यो मघवन्नस्ति मर्डिता। इन्द्र ब्रवीमि ते वचः। २४९

६. त्वमिन्द्र यशा असि। ऋजीषि शवसस्पतिः।
त्वं वृत्राणि हंस्यप्रतीन्येक इत् पुरुः। अनुत्तश्चर्षणीधृतिः। २५०

७. इन्द्रमिद्देवतातये। इन्द्रं प्रयत्यध्वरे।
इन्द्रं समीके वनिनो हवामहे। इन्द्रन्धनस्य सातये। २५१

८. इमा उ त्वा पुरोवसो। गिरो वर्धन्तु या मम।
पावकवर्णाश्शुचयो विपश्चितः। अभिस्तोमैरनूषत। २५२

९. उदुत्ये मधुमत्तमाः। गिरस्तोमास ईरते।
सत्राजितो धनसा अक्षितोतयः। वाजयन्तो रथा इव। २५३

१०. यथा गौरो अपाकृतम्। तृष्यन्नेत्यवेरिणम्।
अपित्वे नः प्रपित्वे तूयमागहि। कण्वेषु सुसचा पिब। २५४

27

1. ശഗ്ധ്യൂഷു ശചീപതേ/ ഇന്ദ്ര വിശ്വാഭിരൂതിഭിഃ/
ഭഗന്നഹിത്വാ യശസം വസുവിദം/ അനുശൂര ചരാമസി/ 255
2. യാ ഇന്ദ്ര ഭുജ ആഭരഃ/ സ്വർവം അസുരേഭ്യഃ/
സ്തോതാരമിന്മഘവന്നസ്യ വർധയ/ യേ ച ത്വേ വൃക്ത ബർഹിഷഃ/
3. പ്രമിത്രായ പ്രാര്യമ്ണേ/ സചഥ്യമൃതാവസോ/
വരൂഥ്യേ വരുണേ ഛന്ദ്യം വചഃ/
സ്തോത്രം രാജസു ഗായത/ 257
4. അഭിത്വാ പൂർവപീതയേ/ ഇന്ദ്രസ്തോമേഭിരായവഃ/
സമീചീനാസ ഋഭവസ്സമസ്വരൻ/ രുദ്രാ ഗൃണന്ത പൂർവ്യം/ 258
5. പ്രവ ഇന്ദ്രായ ബൃഹതേ/ മരുതോ ബ്രഹ്മാർചത/
വൃത്രം ഹനാതി വൃത്രഹാ ശതക്രതുഃ/
വജ്രേണ ശതപർവണാ/ 259
6. ബൃഹദിന്ദ്രായ ഗായത/ രുതോ വൃത്രഹന്തമം/
യേന ജ്യോതിരജനയന്നൃതാ വൃധഃ/
ദേവന്തേവായ ജാഗൃവിം/ 260
7. ഇന്ദ്ര ക്രതുന്ന ആഭര/ പിതാ പുത്രേഭ്യോ യഥാ/
ശിക്ഷാണോ ആസ്മിൻ പുരുഹൂത യാമനി/
ജീവാ ജ്യോതിരശീമഹി/
8. മാ ന ഇന്ദ്ര പരാ വൃണക്/ ഭവാ നസ്സധമാദ്യഃ/
ത്വന്ന ഊതിസ്ത്വമിന്ന ആപ്യം/ മാന ഇന്ദ്ര പരാ വൃണക്/ 262
9. വയങ്ഘത്വാ സുതാവന്തഃ/ ആപോ ന വൃക്ത ബർഹിഷഃ/
പവിത്രസ്യ പ്രസ്രവണേഷു വൃത്രഹൻ/
പരിസ്തോതാര ആസതേ/ 263
10. യദിന്ദ്ര നാഹുഷീഷ്വാ/ ഓജോ നൃമ്ണഞ്ച കൃഷ്ടിഷു/
യദ്വാ പഞ്ചക്ഷിതീനാം ദ്യുമ്നമാഭര/
സത്രാ വിശ്വാനി പൗംസ്യം/ 264

२७

१. शग्ध्यूषु शचीपते। इन्द्र विश्वाभिरूतिभिः।
भगन्नहित्वा यशसं वसुविदम्। अनुशूर चरामसि। २५५
२. या इन्द्र भुज आभरः। स्वर्वं असुरेभ्यः।
स्तोतारमिन्मघवन्नस्य वर्धय। ये च त्वे वृक्तबर्हिषः। २५६
३. प्रमित्राय प्रार्यम्णे। सचथ्यमृतावसो।
वरूथ्ये वरुणे छन्द्यं वचः। स्तोत्रं राजसु गायत। २५७

४. अभित्वा पूर्वपीतये। इन्द्रस्तोमेभिरायवः।
समीचीनास ऋभवस्समस्वरन्। रुद्रा गृणन्त पूर्व्यम्। २५८
५. प्रव इन्द्राय बृहते। मरुतो ब्रह्मार्चत।
वृत्रं हनाति वृत्रहा शतक्रतुः। वज्रेण शतपर्वणा। २५९
६. बृहदिन्द्राय गायत। मरुतो वृत्रहन्तमम्।
येन ज्योतिरजनयन्नृता वृधः। देवन्देवाय जागृविम्। २६०
७. इन्द्र क्रतुन्न आभर। पिता पुत्रेभ्यो यथा।
शिक्षाणो अस्मिन् पुरुहूत यामनि। जीवा ज्योतिरशीमहि। २६१
८. मा न इन्द्र परा वृणक्। भवा नस्सधमाद्यः।
त्वन्न ऊतिरस्त्वमिन्न आप्यम्। मान इन्द्र परा वृणक्। २६२
९. वयङ्घत्वा सुतावन्तः। आपो न वृक्त बर्हिषः।
पवित्रस्य प्रस्रवणेषु वृत्रहन्। परिस्तोतार आसते। २६३
१०. यदिन्द्र नाहुषीष्वा। ओजो नृम्णञ्च कृष्टिषु।
यद्वा पञ्चक्षितीनान्द्युम्नमाभर। सत्रा विश्वानि पौंस्यम्। २६४

1. സത്യമിത്ഥാ വൃഷേദസി/ വൃഷജൂതിർനോവിതാ/
വൃഷാഹ്യുഗ്ര ശൃണ്വിഷേ പരാവതി/
വൃഷോ അർവാവതി ശ്രുതഃ/ 265
2. യച്ഛക്രാസി പരാവതി/ യദർവാവതി വൃത്രഹൻ/
അതസ്ത്വാഗീർഭിർദ്യുഗദിന്ദ്ര കേശിഭിഃ/
സുതാവം ആ വിവാസതി/ 266
3. അഭിവോ വീരമന്ധസാ മദേഷു ഗായ/
ഗിരാ മഹാ വി ചേതസം/
ഇന്ദ്രന്നാമ ശ്രുത്യം ശാകിനം വചോ യഥാ/ 267
4. ഇന്ദ്ര ത്രിധാതു ശരണം/ ത്രിവരൂഥം സ്വസ്തയേ/
ഛർദിർയച്ഛ മഘവത്ഭ്യശ്ച മഹ്യഞ്ച/ യാവയാദിദ്യുമേഭ്യഃ/ 268
5. ശ്രായന്ത ഇവ സൂര്യം/ വിശ്വേദിന്ദ്രസ്യ ഭക്ഷത/
വസൂനി ജാതോ ജനിമാന്യോജസാ/ പ്രതിഭാഗന്ന ദീധിമഃ/ 269
6. ന സീമ ദേവ ആപതത്/ ഇഷന്ദീർഘായോ മർത്യഃ/
ഏതഗ്വാ ചിദ്യ ഏതശോ യുയോജതേ/
ഇന്ദ്രോ ഹരീ യുയോജതേ/ 270
7. ആ നോ വിശ്വാസു ഹവ്യം/ ഇന്ദ്രം സമത്സു ഭൂഷത/
ഉപ ബ്രഹ്മാണി സവനാനി വൃതഹൻ/
പരമ ജ്യാ ഋചീഷമ/ 271

8. തവേദിന്ദ്രാവമം വസു/ ത്വം പുഷ്യസി മധ്യമം/
സത്രാവിശ്വസ്യ പരമസ്യ രാജസി/
നകിഷ്ടാ ഗോഷു വൃണ്വതേ/ 272
9. കോ യഥ കോദസി/ പുരുത്രാചിദ്ധി തേ മനഃ/
അലർഷിയുധ്മ ഖജകൃത്പുരന്ദര/
പ്ര ഗായത്രാ അഗാസിഷുഃ/ 273
10. വയമേനമിദാഹ്യഃ/ അപീപേമേഹ വജ്രിണം/
തസ്മാ ഉ അദ്യ സവനേ സുതംഭര/
ആ നൂനം ഭൂഷതശ്രുതേ/ 274

२८

१. सत्यमित्था वृषेदसि। वृषजूतिर्नोविता।
वृषाह्युग्र शृण्विषे परावति। वृषो अर्वावतिश्रुतः। २६५
२. यच्छक्रासि परावति। यदर्वावति वृत्रहन्।
अतस्त्वागीर्भिर्द्युगदिन्द्र केशिभिः। सुतावं आ विवासति। २६६
३. अभिवो वीरमन्धसा मदेषु गाय। गिरा महा वि चेतसम्।
इन्द्रन्नाम श्रुत्यं शाकिनं वचो यथा। २६७
४. इन्द्र त्रिधातु शरणम्। त्रिवरूथं स्वस्तये।
छर्दिर्यच्छ मघवत्भ्यश्च मह्यञ्च। यावयादिद्युमेभ्यः। २६८
५. श्रायन्त इव सूर्यम्। विश्वेदिन्द्रस्य भक्षत।
वसूनि जातो जनिमान्योजसा। प्रतिभागन्न दीधिमः। २६९
६. न सीम देव आपतत्। इषन्दीर्घा यो मर्त्यः।
एतग्वा चिद्य एतशो युयोजते। इन्द्रो हरी युयोजते। २७०
७. आ नो विश्वासु हव्यम्। इन्द्रं समत्सु भूषत।
उप ब्रह्माणि सवनानि वृत्रहन्। परम ज्या ऋचीषम। २७१
८. तवेदिन्द्रावमं वसु। त्वं पुष्यसि मध्यमम्।
सत्राविश्वस्य परमस्य राजसि। नकिष्ट्वा गोषु वृण्वते। २७२
९. क्वे यथ क्वेदसि पुरुत्राचिद्धि ते मनः।
अलर्षियुत्म खजकृत्पुरन्दर। प्र गायत्रा अगासिषुः। २७३
१०. वयमेनमिदाह्यः। अपीपेमेह वज्रिणम्।
तस्मा उ अद्य सवने सुतम्भर। आ नूनं भूषतश्रुते। २७४

29

1. യോ രാജാ ചർഷണീനാം/ യാതാ രഥേഭിരധ്രിഗുഃ/
വിശ്വാസാന്തരുതാ പൃതനാനാം/
ജ്യേഷ്ഠയ്യോ വൃത്രഹാ ഗൃണേ/ 275
2. യത ഇന്ദ്ര ഭയാമഹേ/ തതോ നോ അഭയങ്കൃധി/
മഘവഞ്ഛഗ്ധി തവ തന്ന ഊതയേ/
വിദ്വിഷോ വിമൃധോ ജഹി/ 276
3. വാസ്തോഷ്പതേ ധ്രുവാ സ്ഥൂണാ/ അംസത്രം സോമ്യാനാം/
ദ്രപ്സഃ പുരാംഭേത്താ ശശ്വതീനാം/ ഇന്ദ്രോ മുനീനാം സഖാ/ 277
4. ബൾമഹം അസി സൂര്യ/ ബളാദിത്യമഹാം അസി/
മഹസ്തേ സതോ മഹിമാ പനിഷ്ടമ/
മഹ്നാ ദേവമഹാം അസി/ 278
5. യദിന്ദ്ര പ്രാഗപാഗുദക്/ ന്യഗ്വാ ഹൂയസേ നൃഭിഃ/
സിമാ പുരൂ നൃഷൂതോ അസ്യാ നവേ/
അസി പ്രശർധ തുർവശേ/ 279
6. കസ്തമിന്ദ്ര ത്വാവസോ/ ആ മർത്യോ ദധർഷതേ/
ശ്രദ്ധാ ഹി തേ മഘവൻ പാര്യേ ദിവി/
വാജീ വാജം സിഷാസതി/ 280
7. അശ്വീ രഥീ സുരൂപയുഃ/ ഗോമയ്യദിന്ദ്ര തേ സഖാ/
ശ്വാത്രാ ഭാജാ വയസാ സചതേ സദാ/
ചന്ദ്രേര്യാതി സഭാ ഉപ/ 281
8. യദ്യാവ ഇന്ദ്ര തേ ശതം/ ശതം ഭൂമീരുതസ്യുഃ/
ന ത്വാ വജ്രിൻ സഹസ്രം സൂര്യാ അനു/ ന ജാതമഷ്ടരോദസീ/ 282
9. ഇന്ദ്രാഗ്നീ അപാദിയം/ പൂർവാഗാത്പദ്വതീഭ്യഃ/
ഹിത്വാ ശിരോ ജിഹ്വയാ രാരപച്ചരത്/ ത്രിംശത്പദാന്യക്രമീത്/ 283
10. ഇന്ദ്ര നേദീയ ഏദിഹി/ മിതമേധാഭിരൂതിഭിഃ/
ആശന്തമ ശന്തമാഭിരഭിഷ്ടിഭിഃ/ ആ സ്വാപേ സ്വാപിഭിഃ/ 284

२९

१. यो राजा चर्षणीनाम्। याता रथेभिरध्रिगुः।
विश्वासान्तरुता पृतनानाम्। ज्येष्ठय्यो वृत्रहा गृणे। २७५
२. यत इन्द्र भयामहे। ततो नो अभयङ्कृधि।
मघवञ्छग्धि तव तन्न ऊतये। विद्विषो विमृधो जहि। २७६
३. वास्तोष्पते ध्रुवा स्थूणा। अंसत्रं सोम्यानाम्।
द्रप्सःपुरां भेत्ता शश्वतीनाम्। इन्द्रो मुनीनां सखा। २७७

४. बळ्महं असि सूर्य। बलादित्यमहम् असि।
महस्ते सतो महिमा पनिष्टम। मह्ना देवमहाम् असि। २७८
५. यदिन्द्र प्रागपागुदक्। न्यग्वा हूयसे नृभिः।
सिमा पुरू नृषूतो अस्या नवे। असि प्रशर्ध तुर्वशे। २७९
६. कस्तमिन्द्र त्वावसो। आ मर्त्यो दधर्षते।
श्रद्धा हि ते मघवन् पार्य दिवि। वाजी वाजं सिषासति। २८०
७. अश्वी रथी सुरूपयुः। गोमय्यदिन्द्र ते सखा।
श्वात्रा भाजा वयसा सचते सदा। चन्द्रैर्याति सभा उप। २८१
८. यद्याव इन्द्र ते शतम्। शतं भूमीरुतस्युः।
न त्वा वज्रिन् सहस्रं सूर्या अनु न जातमष्टरोदसी। २८२
९. इन्द्राग्नी अपादियम्। पूर्वागात्पद्वतीभ्यः।
हित्वा शिरो जिह्वया रारपच्चरत्। त्रिंशत्पदान्यक्रमीत्। २८३
१०. इन्द्र नेदीय एदिहि। मितमेधाभिरूतिभिः।
आशन्तम शन्तमाभिरभिष्टिभिः। आ स्वापे स्वापिभिः। २८४

30

1. ഇത ഊതീ വോ അജരം/ പ്രഹേതാരമപ്രഹിതം/
ആശുഞ്ജേതാരം ഹേതാരം രഥീതമം/
അതൂർതന്തുഗ്രിയാ വൃധം/ 285
2. മോഷൂത്വാ വാഘതശ്ചന/ ആരേ അസ്മന്നിരീരമൻ/
ആരാത്താദ്വാ സധമാദന്ന ആഗഹി/ ഇഹ വാസന്നുപശ്രുധി/ 286
3. സുനോത സോമപാവ്ന്നേ/ സോമമിന്ദ്രായ വജ്രിണേ/
പചതാ പക്തീരവസേ കൃണുധ്വമിത്/ പൃണന്നിത്പൃണതേ മയഃ/ 287
4. യസ്സത്രാഹാ വിചർഷണിഃ/ ഇന്ദ്രന്തം ഹൂമഹേ വയം/
സഹസ്രമന്യോ തുവി നൃമ്ണ സത്പതേ/
ഭവാ സമത്സുനോ വൃധേ/ 288
5. ശചീഭിർനശ്ശചീവസൂ/ ദിവാ നക്തന്ദിശസ്യതം/
മാ വാം രാതിരുപദസത്കദാചന/ അസ്മദ്രാതിഃ കദാചന/ 289
6. യദാ കദാ ച മീഢുഷേ/ സ്തോതാ ജരേത മർത്യഃ/
ആദിദ്വന്തേത വരുണം വിപാ ഗിരാ/ധർതാരം വിവ്രതാനാം/ 290
7. പാഹി ഗായാന്ധസാ മദേ/ ഇന്ദ്രായ മേധ്യാതിഥേ/
യസ്സമ്മിശ്ലോ ഹര്യോർയോ ഹിരണ്യയഃ/
ഇന്ദ്രോ വജ്രീ ഹിരണ്യയഃ/ 291
8. ഉഭയം ശൃണവച്ച ന/ ഇന്ദ്രോ അർവാഗിദം വചഃ/
സത്രാച്യാ മഘവാ സോമപീതയേ/ ധിയാ ശവിഷ്ഠ ആഗമത്/ 292

൭. മഹേ ച നത്വാദ്രിവഃ/ പരാ ശുത്കായ ദീയസേ/
ന സഹസ്രായ നായുതായ വജ്രിവഃ/ ന ശതായ ശതാമഘ/ 293

३०

१. इत ऊती वो अजरम्। प्रहेतारमप्रहितम्।
आशुञ्जेतारं हेतारं रथीतमम्। अतूर्तन्तुग्रिया वृधम्। २८५

२. मोषुत्वा वाघतश्चन। आरे अस्मन्निरीरमन्।
आरात्ताद्वा सधमादन्न आगहि। इह वासन्नुपश्रुधि। २८६

३. सुनोत सोम पाव्ने। सोममिन्द्राय वज्रिणे।
पचता पक्तीरवसे कृणुध्वमित्। पृणन्नित्पृणते मयः। २८७

४. यस्सत्राहा विचर्षणिः। इन्द्रन्तं हूमहे वयम्।
सहस्रमन्यो तुवि नृम्ण सत्पते। भवा समत्सु नो वृधे। २८८

५. शचीभिर्नश्शचीवसू। दिवा नक्तन्दिशस्यतम्।
मा वां रातिरुपदसत्कदाचन। अस्मद्रातिः कदाचन। २८९

६. यदा कदा च मीढुषे। स्तोता जरेत मर्त्यः।
आदिद्वन्देत वरुणं विपा गिरा। धर्तारं विव्रतानाम्। २९०

७. पाहि गायान्धसा मदे। इन्द्राय मेध्यातिथे।
यस्सम्मिश्लो हर्य्योर्यो हिरण्ययः। इन्द्रो वज्री हिरण्ययः। २९१

८. उभयं शृणवच्चन। इन्द्रो अर्वागिदं वचः।
सत्राच्या मघवा सोमपीतये। धिया शविष्ठ आगमत्। २९२

९. महे च नत्वाद्रिवः। परा शुत्काय दीयसे।
न सहस्राय नायुताय वज्रिवः। न शताय शतामघ। २९३

31

1. വസ്യം ഇന്ദ്രാസി മേ പിതുഃ/ ഉത ഭ്രാതുരഭുഞ്ജതഃ/
മാതാ ച മേ ഛദയഥസ്സമാവസോ/ വസൂത്വനായ രാധസേ/ 294

2. ഇമ ഇന്ദ്രായ സുന്വിരേ/ സോമാസോ ദധ്യാ ശിരഃ/
തം ആ മദായ വജ്രഹസ്തപീതയേ/ ഹരിഭ്യ്യായ്യാ ഹ്യൊക ആ/ 295

3. ഇമ ഇന്ദ്ര മദായതേ/ സോമാശ്ചികിത്ര ഉക്ഥിനഃ/
മധോഃ പപാന ഉപനോ ഗിരഃ ശൃണു/
രാസ്വ സ്തോത്രായ ഗിർവണഃ/ 296

4. ആ ത്വാദ്യ സബർദുഘാം/ ഹുവേ ഗായത്രവേപസം/
ഇന്ദ്രന്ധേനും സുദുഘാമന്യാമിഷം/ ഉരു ധാരാമരങ്കൃതം/ 297
5. ന ത്വാ ബൃഹന്തോ അദ്രയഃ/ വരന്ത ഇന്ദ്ര വീളവഃ/
യച്ഛിക്ഷസി സ്തുവതേ മാവതേ വസു/ നകിഷ്ടദാമിനാതി തേ/ 298
6. ക ഈം വേദസുതേ സചാ/പിബന്തഃ കദ്വയോ ദധുഃ/
അയം യഃ പുരോ വിഭിനത്യോജസാ/ മന്ദാനശ്ശിപ്രിയന്ധസാ 299
7. യദിന്ദ്രശാസോ അവ്രതം/ ച്യാവയാ സദസസ്പരി/
അസ്മാകമംശും മഘവൻ പുരുസ്പൃഹം/
വസ്യാവ്യേ അധി ബർഹയ 300
8. ത്വഷ്ടാ നോ ദൈവ്യം വചഃ/ പർജന്യോ ബ്രഹ്മണസ്പതിഃ/
പുത്രൈർഭ്രാതൃഭിരദിതിർനുപാതു നഃ/ ദുഷ്ടരന്ത്രാമണം വചഃ/ 301
9. കദാചനസ്തരീരസി/ നേന്ദ്രം സശ്ചസി ദാശുഷേ/
ഉപോപേന്നു മഘവൻ ഭൂയ ഇന്നു തേ/ ദാനന്ദേവസ്യ പൃച്യതേ/ 302
10. യുങ്ക്ഷ്വാ ഹി വൃത്രഹന്തമ/ ഹരീ ഇന്ദ്ര പരാവതഃ/
അർവാചീനോ മഘവൻ സോമപീതയേ/ ഉഗ്ര ഋഷ്വാഭിരാഗഹി/ 303
11. ത്വാമിദാഹ്യോ നരഃ/ അപീപ്യൻ വജ്രിൻ ഭൂർണയഃ/
സ ഇന്ദ്ര സ്തോമവാഹ സ ഇഹ ശ്രുധി/ ഉപസ്വസരമാഗഹി/ 304

३१

१. वस्यं इन्द्रासि मे पितुः। उत भ्रातुरभुञ्जतः।
माता च मे छदयथस्समावसो। वसूत्वनाय राधसे। २९४
२. इम इन्द्राय सुन्विरे। सोमासो दध्या शिरः।
तम् आ मदाय वज्रहस्तपीतये। हरिभ्याय्या ह्योक आ। २९५
३. इम इन्द्र मदायते। सोमाश्चकित्र उक्थिनः।
मधोःपपान उप नो गिरश्शृणु। रास्व स्तोत्राय गिर्वणः। २९६
४. आ त्वाद्य सबर्दुघाम्। हुवे गायत्रवेपसम्।
इन्द्रन्धेनुं सुदुघामन्यामिषम्। उरु धारामरङ्कृतम्। २९७
५. न त्वा बृहन्तो अद्रयः। वरन्त इन्द्र वीळवः।
यच्चिक्षसि स्तुवते मावते वसु। न किष्टदामिनाति ते। २९८
६. क ईं वेदसुते सचा। पिबन्तः कद्वयो दधुः।
अयय्यप्पुरो विभिनत्योजसा। मन्दानश्शिप्रियन्धसा। २९९
७. यदिन्द्रशासो अव्रतम्। च्यावया सदसस्परि।
अस्माकमंशुं मघवन् पुरुस्पृहम्। वसाव्ये अधि बर्हय। ३००

८. त्वष्टा नो दैव्यं वचः। पर्जन्यो ब्रह्मणस्पतिः।
पूत्रैर्भ्रातृभिरदितिर्नु पातु नः। दुष्टरन्त्रामणं वचः। ३०१
९. कदाचनस्तरीरसि। नेन्द्रं सश्चसि दाशुषे।
उपोपेन्नु मघवन् भूय इन्नु ते। दानन्देवस्य पृच्यते। ३०२
१०. युङ्क्ष्वा हि वृत्रहन्तम। हरी इन्द्र परावतः।
अर्वाचीनो मघवन् सोमपीतये। उग्र ऋष्वाभिरागहि। ३०३
११. त्वामिदाह्यो नरः। अपीप्यन् वज्रिन् भूर्णयः।
स इन्द्र स्तोमवाह स इह श्रुधि। उपस्वसरमागहि। ३०४

32

1. പ്രതിവോ ദർശ്യായതീ/ ഉച്ഛന്തീ ദുഹിതാ ദിവഃ/
അപോ മഹീ വ്യൂണുതേ ചക്ഷുഷാതമഃ/
ജ്യോതിഃ കൃണോതിസൂനരീ/ 305
2. ഇമാ ഉവാന്ദിവിഷ്ടയഃ/ ഉസ്രാ ഹവന്തേ അശ്വിനാ/
അയം വാമഹ്വയവസേ ശചീവസൂ / വിശം വിശം ഹി ഗച്ഛഥഃ/ 306
3. കുഷ്ഠഃ കോ വാമശ്വിനാ/ തപാനോ ദേവാ മർത്യഃ/
ഘ്നതാ വാമശ്നയാ ക്ഷപമാണോഽംശുനാ/ ഇത്ഥമുവാദ്യന്യഥാ/ 307
4. അയം വാം മധുമത്തമഃ/ സുതസ്സോമോ ദിവിഷ്ടിഷു/
തമശ്വിനാ പിബതന്തിരോ അഹ്ന്യം/ ധത്തം രത്നാനി ദാശുഷേ/ 308
5. ആ ത്വാ സോമസ്യ ഗൽദയാ/ സദാ യാചന്നഹഞ്ജ്യാ/
ഭൂർണിം മൃഗന്നസവനേഷു ചുക്രുധം/
ക ഈശാനന്നയാചിഷത്/ 309
6. അധ്വര്യോ ദ്രാവയാ ത്വം/ സോമമിന്ദ്രഃ പിപാസതി/
ഉപോ നൂനം യുയുജേ വൃഷണാ ഹരീ/
ആ ച ജഗാമ വൃത്രഹാ/ 310
7. അഭീഷതസ്തദാഭര/ ഇന്ദ്ര ജ്യായഃ കനീയസഃ/
പുരോവസുർഹി മഘവൻ ബഭൂവിഥ/ ഭരേ ഭരേ ച ഹവ്യഃ/ 311
8. യദിന്ദ്ര യാവതസ്ത്വം/ ഏതാവദഹമീശീയ/
സ്തോതാരമിദ്ദധിഷേരദാവസോ/ ന പാപത്വായ രംസിഷഃ/ 312
9. ത്വമിന്ദ്ര പ്രതൂർതിഷു/ അഭി വിശ്വാ അസി സ്പൃധഃ/
അശസ്തിഹാ ജനിതാ വൃത്രതൂരസി/ ത്വന്തൂര്യ തരുഷ്യതഃ/ 313
10. പ്രയോ രിരിക്ഷ ഓജസാ/ ദിവസ്സദോഭ്യസ്പരി/
ന ത്വാ വിവ്യാച രജ ഇന്ദ്ര പാർഥിവം/ അതി വിശ്വം വവക്ഷിഥ/ 314

३२

१. प्रतिवोऽदर्श्यायती। उच्छन्ती दुहिता दिवः।
अपो मही वृणुते चक्षुषातमः। ज्योतिः कृणोति सूनरी। ३०५
२. इमा उवान्दिविष्टयः। उस्रा हवन्ते अश्विना।
अयं वामह्वय़वसे शचीवसू। विशं विशं हि गच्छथः। ३०६
३. कुष्ठः कोवामश्विना। तपानो देवा मर्त्यः।
घ्नता वामश्ज्ञया क्षपमाणोऽंशुना। इत्थमुवाद्वन्यथा। ३०७
४. अयं वा मधुमत्तमः। सुतस्सोमो दिविष्टिषु।
तमश्विना पिबतन्तिरो अह्न्यम्। धत्तं रत्नानि दाशुषे। ३०८
५. आत्वा सोमस्य गल्दया। सदा याचन्नहञ्ज्या।
भूर्णिं मृगन्न सवनेषु चुक्रुधम्। क ईशानन्न याचिषत्। ३०९
६. अध्वर्यो द्रावया त्वम्। सोममिन्द्रःपिपासति।
उपो नूनय्युयुजे वृषणा हरी। आ च जगाम वृत्रहा। ३१०
७. अभीषतस्तदाभर। इन्द्र ज्यायः कनीयसः।
पुरोवसुर्हि मघवन् बभूविथ। भरे भरे च हव्यः। ३११
८. यदिन्द्र यावतस्त्वम्। एतावदहमीशीय।
स्तोतारमिद्दधिषेरदावसो। न पापत्वाय रंसिषः। ३१२
९. त्वमिन्द्र प्रतूर्तिषु। अभि विश्वा असि स्पृधः।
अशस्तिहा जनिता वृत्रतूरसि। त्वन्तूर्य तरुष्यतः। ३१३
१०. प्र यो रिरिक्ष ओजसा। दिवस्सदोभ्यस्परि।
न त्वा विव्याच रज इन्द्र पार्थिवम्। अति विश्वं ववक्षिथ। ३१४

33

1. അസാവി ദേവം ഗോഭ്യജീകമന്ധഃ/
ന്യസ്മിന്നിന്ദ്രോ ജനുഷേമുവോച/
ബോധാമസി ത്വാ ഹര്യശ്വയജ്ഞൈഃ/
ബോധാനസ്തോമമന്ധസാ മദേഷു/ 315
2. യോനിഷ്ട ഇന്ദ്ര സദനേ അകാരി/
തമാനൃഭിഃ പുരുഹൂതപ്രയാ ഹി/
അസോ യഥാ നോ/വിതാ വൃധശ്ചിത്/
ദദോ വസൂനി മമദശ്ച സോമൈഃ/ 316

3. അദർദരുത്സമസൃജോ വിഖാനി/
ത്വമർണവാൻ ബദ്ബധാനാം അരമ്ണാഃ/
മഹാന്തമിന്ദ്രപർവതം വിയദ്വഃ/
സൃജദ്ധുരാ അവ യദ്വാനവാൻ ഹൻ/ 317
4. സുഷ്വാണാസ ഇന്ദ്രസ്തുമസി ത്വാ/
സനിഷ്യന്തശ്ചിത്തുവിനൃമ്ണവാജം/
ആ നോ ഭര സുവിതയ്യസ്യ കോനാ/
തനാത്മനാ സഹ്യാമത്വോതാഃ/ 318
5. ജഗൃഭ്മാ തേ ദക്ഷിണമിന്ദ്രഹസ്തം/
വസൂയവോ വസുപതേ വസൂനാം/
വിദ്മാ ഹിത്വാ ഗോപതിം ശൂരഗോനാം/
അസ്മഭ്യഞ്ചിത്രം വൃഷണം രയിന്ദാഃ/ 319
6. ഇന്ദ്രന്നരോ നേമധിതാ ഹവന്തേ/
യത്പാര്യായുനജന്തേ ധിയസ്താഃ/
ശൂരോ നൃഷാതാ ശ്രവസശ്ച കാമേ/
ആ ഗോമതി വ്രജേ ഭജാത്വന്നഃ/ 320
7. വയസ്സുപർണാ ഉപസേദുരിന്ദ്രം/
പ്രിയമേധാ ഋഷയോ നാധമാനാഃ/
അപ ധ്വാന്തമൂർണുഹി പൂർധിചക്ഷുഃ/
മുമുഗ്ധ്യാസ്മാന്നിധയേവ ബദ്ധാൻ/ 321
8. നാകേ സുപർണമുപ യത്പതന്തം/
ഹൃദാ വേനന്തോ അഭ്യചക്ഷതത്വാ/
ഹിരണ്യപക്ഷം വരുണസ്യ ദൂതം/
യമസ്യ യോനൗ ശകുനം ഭുരണ്യും/ 322
9. ബ്രഹ്മ ജജ്ഞാനം പ്രഥമം പുരസ്താത്/
വിസീമതസ്സുരുചോ വേന ആവത്/
സബുദ്ധ്ന്യാ ഉപമാ അസ്യ വിഷ്ഠാഃ/
സതശ്ചയോനിമസതശ്ച വിവഃ/ 323
10. അപൂർവ്യാ പുരുതമാന്യസ്മൈ/
മഹേ വീരായ തവസേ തുരായ/
വിരപ്ശിനേ വജ്രിണേ ശന്തമാനി/
വചാംസ്യസ്മൈ സ്ഥവിരായ തക്ഷുഃ/ 324

३३

१. असावि देवङ्गोऋजीकमन्धः। न्यस्मिन्निन्द्रो जनुषेमुवोच।
बोधामसित्वा हर्यश्वयज्ञैः। बोधानस्तोममन्धसा मदेषु।। ३१५
२. योनिष्ट इन्द्र सदने अकारि। तमानृभिःपुरुहूतप्रया हि।
असो यथा नोऽविता वृधश्चित्। ददो वसूनि ममदश्च सोमैः।। ३१६

३. अदर्दरुत्समसृजो विखानि। त्वमर्णवान् बत्बधानां अरम्णाः।
महान्तमिन्द्रपर्वतं वियद्वः। सृजद्धारा अव यद्दानवान् हन्।। ३१७
४. सुष्वाणास इन्द्रस्तुमसि त्वा। सनिष्यन्तश्चित्तुविनृम्णवाजम्।
आ नोभर सुवितय्यस्यकोना। तनात्मना सह्यामत्वोताः।। ३१८
५. जगृह्मा ते दक्षिणमिन्द्रहस्तम्। वसूयवो वसुपते वसूनाम्।
वित्मा हित्वा गोपतिं शूरगोनाम्। अस्मभ्यञ्चित्रं वृषणं रयिन्दाः।। ३१९
६. इन्द्रन्नरो नेमधिता हवन्ते। यत्पार्यायुनजन्ते धियस्ताः।
शूरो नृषाता सवश्रश्च कामे। आ गोमतिव्रजे भजा त्वन्नः।। ३२०
७. वयस्सुपर्णा उपसेदुरिन्द्रम्। प्रियमेधा ऋषयो नाधमानाः।
अप ध्वान्तमूर्णुहि पूर्धिचक्षुः। मुमुग्ध्यास्मान्निधयेव बद्धान्।। ३२१
८. नाके सुपर्णमुप यत्पतन्तम्। हृदा वेनन्तो अभ्यचक्षत त्वा।
हिरण्यपक्षं वरुणस्य दूतम्। यमस्य योनौ शकुनं भुरण्युम्।। ३२२
९. ब्रह्मजज्ञानं प्रथमं पुरस्तात्। विसीमतस्सुरुचो वेन आवत्।
सबुद्ध्न्या उपमा अस्य विष्ठाः। सतश्च योनिमसतश्च विवः।। ३२३
१०. अपूर्व्या पुरुतमान्यस्मै। महे वीराय तवसे तुराय।
विरप्शिने वज्रिणे शन्तमानि। वचांस्यस्मै स्थविराय तक्षुः।। ३२४

34

1. അവ ദ്രപ്സോ അംശുമതീമതിഷ്ഠത്/
ഇയാനഃ കൃഷ്ണോ ദശഭിസ്സഹസ്രൈഃ/
ആവത്തമിന്ദ്രശ്ചക്ര്യാ യമന്തം/
അപസ്നിഹിതിന്ന്യമണാ അധദ്രാ/ 325
2. വൃത്രസ്യ ത്വാ ശ്വസഥാദീഷമാണാഃ/
വിശ്വേ ദേവാ അജഹുര്യേ സഖായഃ/
മരുദ്ഭിരിന്ദ്ര സഖ്യന്തേ അസ്തു/
അഥേമാ വിശ്വാഃ പൃതനാ ജയാസി/ 326
3. വിധുന്ദ്രാണം സമനേ ബഹൂനാം/
യുവാനം സന്തം പലിതോ ജഗാര/
ദേവസ്യ പശ്യ കാവ്യം മഹിത്വാ/
അദ്യാ മമാര സഹ്യസ്സമാന/ 327
4. ത്വം ഹത്യൈസപ്തഭ്യോ ജായമാനഃ/
അശത്രുഭ്യോ അഭവശ്ശത്രുരിന്ദ്ര/
ഗൂഢേ ദ്യാവാപൃഥിവീ അന്വവിന്ദഃ/
വിഭുമദ്ഭ്യോ ഭുവനേഭ്യോ രണന്ധാഃ/ 328

5. മേളിന്നത്വാ വജ്രിണം ഭൃഷ്ടിമന്തം/
പുരുധസ്മാനം വൃഷഭം സ്ഥിരപ്സ്നും/
കരോഷ്യര്യസ്തരുഷീർദുവസ്യുഃ/
ഇന്ദ്ര ദ്യുക്ഷം വൃത്രഹണം ഗൃണീഷേ/ 329
6. പ്ര വോ മഹേ മഹേ വൃധേ ഭരദ്ധ്വം/
പ്ര ചേതസേ പ്ര സുമതിങ്കൃണുധ്വം/
വിശഃ പൂർവീഃ പ്ര ചരാ ചർഷണിപ്രാഃ/ 330
7. ശുനം ഹുവേമ മഘവാനമിന്ദ്രം/
അസ്മിൻഭരേ നൃതമം വാജസാതൗ/
ശൃണ്വന്തമുഗ്രമൂതയേ സമത്സു/
ഘ്നന്തം വൃത്രാണി സഞ്ജിതന്ധനാനി/ 331
8. ഉ ദു ബ്രഹ്മാണ്യൈരതശ്രവസ്യാ/
ഇന്ദ്രം സമര്യേ മഹയാ വസിഷ്ഠ/
ആയോ വിശ്വാനി ശ്രവസാ തതാന/
ഉപശ്രോതാമ ഈവതോ വചാംസി/ 332
9. ചക്രയ്യദസ്യാപ്സ്വാ നിഷത്തം/
ഉതോ തദസ്മൈ മധ്വിച്ഛർദ്യാത്/
പൃഥിവ്യാമതിഷിതയ്യദൂധഃ/
പയോ ഗോഷ്വദധാ ഓഷധീഷു/ 333

३४

१. अव द्रप्सो अंशुमतीमतिष्ठत्। इयानः कृष्णो दशभिस्सहस्रैः।
आवत्तमिन्द्रश्शच्या धमन्तम्। अपस्निहितिन्नृमणा अधद्रा।। ३२५
२. वृत्रस्य त्वा श्वसथादीषमाणाः। विश्वे देवा अजहुर्ये सखायः।
मरुत्भिरिन्द्र सख्यन्ते अस्तु। अथेमा विश्वाःपृतना जयासि।। ३२६
३. विधुन्दद्राणं समने बहूनाम्। युवानं सन्तं पलितो जगार।
देवस्य पश्य काव्यं महित्वा। अद्या ममार सह्यस्समान।। ३२७
४. त्वं हत्यत्सप्तभ्यो जायमानः। अशत्रुभ्यो अभवश्शत्रुरिन्द्र।
गूढे द्यावापृथिवी अन्वविन्दः। विभुमत्भ्यो भुवनेभ्यो रणन्धाः।। ३२८
५. मेळिन्नत्वा वज्रिणं भृष्टिमन्तम्। पुरुधस्मानं वृषभं स्थिरप्स्नुम्।
करोष्यर्यस्तरुषीर्दुवस्युः। इन्द्र द्युक्षं वृत्रहणं गृणीषे।। ३२९
६. प्र वो महे महे वृधे भरद्ध्वम्। प्र चेतसे प्रसुमतिङ्कृणुध्वम्।
विशःपूर्वीःप्रचश चर्षणिप्राः।। ३३०

७. शुनं हुवेम मघवानमिन्द्रम्। अस्मिन्भरे नृतमं वाजसातौ।
शृण्वन्तमुग्रमूतये समत्सु। घ्नन्तं वृत्राणि सञ्जितन्धनानि।। ३३१
८. उ दु ब्रह्माण्यैरतश्रवस्या। इन्द्रं समर्ये महया वसिष्ठ।
आयो विश्वानि श्रवसा ततान। उपश्रोताम ईवतो वचांसि।। ३३२
९. चक्रय्यदस्याप्स्वा निषत्तम्। उतोतदस्मै मध्विच्चच्छद्यात्।
पृथिव्यामतिषितय्यदूधः। पयो गोष्वदधा ओषधीषु।। ३३३

35

1. ത്യമൂഷു വാജിനന്തേവജൂതം/
സഹോവാനന്തരുതാരം രഥാനാം/
അരിഷ്ടനേമിം പൃതനാജമാശും/
സ്വസ്തയേ താർക്ഷ്യമിഹാ ഹുവേമ/ 334
2. ത്രാതാരമിന്ദ്രമവിതാരമിന്ദ്രം/
ഹവേ ഹവേ സുഹവം ശൂരമിന്ദ്രം/
ഹുവേ നു ശക്രം പുരുഹൂതമിന്ദ്രം/
ഇദം ഹവിർമഘവാ വേത്വിന്ദ്രഃ/ 335
3. യജാമഹ ഇന്ദ്രം വജ്രദക്ഷിണം/
ഹരീണാം രഥ്യാം വിവ്രതാനാം/
പ്ര ശ്മശ്രുഭിർദോധുവദൂർധ്വധാ ഭുവദ്/
വിസേനാഭിർഭയമാനോ വിരാധസാ/ 336
4. സത്രാഹണന്ദാധൃഷിം തുമ്രമിന്ദ്രം/
മഹാമപാരം വൃഷഭം സുവജ്രം/
ഹന്താ യോ വൃത്രം സനിതോത വാജം/
ദാതാ മഘാനി മഘവാ സുരാധാഃ/ 337
5. യോ നോ വനുഷ്യന്നഭിദാതി മർതഃ/
ഉഗണാ വാ മന്യമാനസ്തുരോ വാ/
ക്ഷിധീ യുധാ ശവസാ വാതമിന്ദ്ര/
അഭി ഷ്യാമ വൃഷമണസ്തോതാഃ/ 338
6. യം വൃത്രേഷു ക്ഷിതയസ്പർധമാനാഃ/
യം യുക്തേഷു തുരയന്തോ ഹവന്തേ/
യം ശൂരസാതൗ യമപാമുപജ്മൻ/
യം വിപ്രാസോ വാജയന്തേ സ ഇന്ദ്രഃ/ 339
7. ഇന്ദ്രാ പർവതാ ബൃഹതാ രഥേന/
വാമീരിഷ ആവഹതം സുവീരാഃ/
വീതം ഹവ്യാന്യധ്വരേഷു ദേവാ/
വർധേഥാം ഗീർഭിരിളയാ മദന്താ/ 340

8. ഇന്ദ്രായ ഗിരോ അനിശിതസർഗാഃ/
അപഃ പ്രൈരയത്സഗരസ്യ ബുധ്നാത്/
യോ അക്ഷേണേവ ചക്രിയൗ ശചീഭിഃ/
വിഷ്വക്തസ്തംഭ പൃഥിവീമുതദ്യാം/ 341
9. ആ ത്വാ സഖായസ്സഖ്യാ വവൃത്യുഃ/
തിരഃ പുരുചിദർണവാഞ്ജഗമ്യാഃ/
പിതുർനപാതമാദധീത വേധാഃ/
അസ്മിൻ ക്ഷയേ പ്രതരാന്ദീദ്യാനഃ/ 342
10. കോ അദ്യ യുങ്ക്തേ ധുരി ഗാ ഋതസ്യ/
ശിമീവതോ ഭാമിനോ ദുർഹൃണായൂൻ/
ആസന്നേഷാമപ്സുവാ ഹോമയൂഭൂൻ/
യ ഏഷാം ഭൃത്യാമൃണധത്സജീവാത്/ 343

३५

१. त्यमूषु वाजिनन्देवजूतम्। सहोवानन्तरुतारं रथानाम्।
अरिष्टनेमिं पृतनाजमाशुम्। स्वस्तये तार्क्ष्यमिहा हुवेम।। ३३४
२. त्रातारमिन्द्रमवितारमिन्द्रम्। हवे हवे सुहवं शूरमिन्द्रम्।
हुवे नुशक्रं पुरुहूतमिन्द्रम्। इदं हविर्मघवा वेत्विन्द्रः।। ३३५
३. यजामह इन्द्रं वज्रदक्षिणम्। हरीणां रथ्यां विव्रतानाम्।
प्र श्मश्रुभिर्दोधुवदूर्ध्वधा भुवद्। विसेनाभिर्भयमानो विराधसा।। ३३६
४. सत्राहणन्दाधृषिन्तुम्रमिन्द्रम्। महामपारं वृषभं सवज्रम्।
हन्ता यो वृत्रं सनितोत वाजम्। दाता मघानि मघवा सुराधाः।। ३३७
५. यो नो वनुष्यन्नभिदाति मर्तः। उगणा वा मन्यमानस्तुरो वा।
क्षिधी युधा शवसा वातमिन्द्र। अभिष्याम वृषमणस्त्वोताः।। ३३८
६. यं वृत्रेषु क्षितयस्पर्धमानाः। यं युक्तेषु तुरयन्तो हवन्ते।
यं शूरसातौ यमपामुपज्मन्। यं विप्रासो वाजयन्ते स इन्द्रः।। ३३९
७. इन्द्रा पर्वता बृहता रथेन। वामीरिष आवहतं सुवीराः।
वीतं हव्यान्यध्वरेषु देवा। वर्धेथाङ्गीर्भिरिळया मदन्ता।। ३४०
८. इन्द्राय गिरो अनिशित सर्गाः। अपःप्रैरयत् सगररस्य बृध्नात्।
यो अक्षेणेव चक्रियौ शचीभिः। विष्वक्तस्तम्भ पृथिवीमुतद्याम्।। ३४१
९. आ त्वा सखायस्सख्या ववृत्युः। तिरःपुरुचिदर्णवाञ्जगम्याः।
पितुर्नपातमादधीत वेधाः। अस्मिन् क्षये प्रतरान्दीद्यानः।। ३४२

१०.को अद्य युङ्क्ते धुरि गा ऋतस्य। शिमीवतो भामिनो दुर्ह्रणायून्।
आसन्नेषामप्सुवा होमयूभून्। य एषां भृत्यामृणधत्स जीवात्।। ३४३

36

1. ഗായന്തി ത്വാ ഗായത്രിണഃ/ അർചന്ത്യർകമർകിണഃ/
ബ്രഹ്മാണസ്ത്വാ ശതക്രതോ/ ഉദ്വംശമിവ യേമിരേ/ 344
2. ഇന്ദ്രം വിശ്വാ അവീവൃധൻ/ സമുദ്രവ്യചസങ്ഗിരഃ/
രഥീതമം രഥീനാം/ വാജാനാം സത്പതിമ്പതിം/ 345
3. ഇമമിന്ദ്ര സുതം പിബ/ ജ്യേഷ്ഠമമർത്യം മദം/
ശുക്രസ്യ ത്വാഭ്യക്ഷരൻ/ ധാരാ ഋതസ്യ സാദനേ/ 346
4. യദിന്ദ്ര ചിത്രമ ഇഹ ന/ അസ്തിത്വാദാതമദ്രിവഃ/
രാധസ്തന്നോ വിദദ്വസോ/ ഉഭയാ ഹസ്ത്യാഭര/ 347
5. ശ്രുധീഹവന്തിരശ്ച്യാഃ/ ഇന്ദ്ര യസ്ത്വാ സപര്യതി/
സുവീര്യസ്യ ഗോമതഃ/ രായസ്പൂർധിമഹം അസി/ 348
6. അസാവി സോമ ഇന്ദ്ര തേ/ ശവിഷ്ഠധൃഷ്ണവാഗഹി/
ആ ത്വാ പൃണക്തുവിന്ദ്രിയം/ രജഃ സൂര്യോ ന രശ്മിഭിഃ/ 349
7. ഏന്ദ്ര യാഹി ഹരിഭിഃ/ ഉപകണ്വസ്യ സുഷ്ടുതിം/
ദേവാ അമുഷ്യ ശാസതഃ/ ദിവൈയ്യയ ദിവാവസോ/ 350
8. ആ ത്വാ ഗിരോ രഥീരിവ/ അസ്ഥുസ്സുതേഷു ഗിർവണഃ/
അഭി ത്വാ സമനൂഷത/ ഗാവോ വത്സന്ന ധേനവഃ/ 351
9. ഏതോ ന്വിന്ദ്രം സ്തവാമ/ ശുദ്ധം ശുദ്ധേന സാമ്നാ/
ശുദ്ധൈരുക്ഥൈർവാ വൃധാംസം/
ശുദ്ധൈരാശീർവാന്മമത്തു/ 352
10. യോ രയിം വോ രയിന്തമഃ/ യോ ദ്യുമ്നൈർദ്യുമ്നവത്തമഃ/
സോമസ്സുതസ്സ ഇന്ദ്ര തേ/ അസ്തി സ്വധാപതേ മദഃ/ 353

३६

१. गायन्ति त्वा गायत्रिणः। अर्चन्त्यर्कमर्किणः।
ब्रह्माणस्त्वा शतक्रतो। उद्वंशमिव येमिरे।। ३४४
२. इन्द्रं विश्वा अवीवृधन्। समुद्रव्यचसङ्गिरः।
रथीतमं रथीनाम्। वाजानां सत्पतिम्पतिम्।। ३४५
३. इममिन्द्र सुतं पिब। ज्येष्ठममर्त्यम्मदम्।
शुक्रस्य त्वाभ्यक्षरन्। धारा ऋतस्य सादने।। ३४६
४. यदिन्द्र चित्रम इह न। अस्तित्वादातमद्रिवः।
राधस्तन्नो विदद्वसो। उभया हस्त्याभर।। ३४७

५. श्रुधीहवन्तिरश्च्याः। इन्द्र यस्त्वा सपर्यति।
सुवीर्यस्य गोमतः। रायस्पूर्धिमहम् असि।। ३४८
६. असावि सोम इन्द्र ते। शविष्ठधृष्णवागहि।
आ त्वा पृणक्तुविन्द्रियम्। रजःसूर्यो न रश्मिभिः।। ३४९
७. एन्द्र याहि हरिभिः। उपकण्वस्य सुष्टुतिम्।
देवा अमुष्य शासतः। दिवैय्यय दिवावसो।। ३५०
८. आ त्वा गिरो रथीरिव। अस्थुस्सुतेषु गिर्वणः।
अभित्वा समनूषत। गावो वत्सन्न धेनवः।। ३५१
९. एतोन्विन्द्रं स्तवाम। शुद्धं शुद्धेन साम्ना।
शुद्धैरुक्थैर्वा वृध्वांसम्। शुद्धैराशीर्वान्ममत्तु।। ३५२
१०. यो रयिं वो रयिन्तमः। यो द्युम्नैर्द्युम्नवत्तमः।
सोमस्सुतस्स इन्द्र ते। अस्ति स्वधापते मदः।। ३५३

37

1. പ്രത്യസ്മൈ പിപീഷതേ/ വിശ്വാനി വിദുഷേ ഭര/
അരങ്ഗമായ ജഗ്മയേ/ അപശ്ചാദ്ഘ്വനേ² നരഃ/ 354
2. ആ നോ വയോ വയശ്ശയം/ മഹാന്തം ഗഹ്വരേഷ്ഠാം/
മഹാന്തം പൂർവിണേഷ്ഠാം/ ഉഗ്രം വചോ അപാവധീഃ/ 355
3. ആ ത്വാ രഥയ്യഥോതയേ/ സുമ്നായ വർതയാമസി/
തുവികൂർമിമൃതീഷഹം/ ഇന്ദ്രം ശവിഷ്ഠ സത്പതിം/ 356
4. സപൂർവ്യാ മഹോനാം/ വേനഃ ക്രതുഭിരാനജേ/
യസ്യ ദ്വാരാ മനുഷ്പിതാ/ ദേവേഷു ധിയ ആനജേ/ 357
5. യദീവഹന്ത്യാശവഃ/ ഭ്രാജമാനാ രഥേഷ്വാ/
പിബന്തോ മദിരം മധു/ തത്ര ശ്രവാംസി കൃണ്വതേ/ 358
6. ത്യമുവോ അപ്രഹണം/ ഗൃണീഷേ ശവസസ്പതിം/
ഇന്ദ്രം വിശ്വാസാഹന്നരം/ ശചിഷ്ഠം വിശ്വവേദസം/ 359
7. ദധിഗ്രാവിണ്ണോ ആകാരിഷം/ ജിഷ്ണോരശ്വസ്യ വാജിനഃ/
സുരഭി നോ മുഖാ കരത്/ പ്ര ന ആയൂംഷി താരിഷത്/ 360
8. പുരാം ഭിന്ദുർയുവാ കവിഃ/ അമിതൗജാ അജായത/
ഇന്ദ്രോ വിശ്വസ്യ കർമണഃ/ ധർതാ വജ്രീ പുരുഷ്ടുതഃ/ 361

३७

१. प्रत्यस्मै पिपीषते। विश्वानि विदुषे भर।
अरङ्गमाय जग्मये। अपश्चाद्दघ्वने नरः।। ३५४

२. आ नो वयो वयश्शयम्। महान्तङ्गह्वरेष्ठाम्।
महान्तं पूर्विणेष्ठाम्। उग्रम् वचो अपावधीः।। ३५५
३. आ त्वा रथय्यथोतये। सुम्नाय वर्तयामसि।
तुविकूर्मिमृतीषहम्। इन्द्रं शविष्ठ सत्पतिम्।। ३५६
४. सपूर्व्यो महोनाम्। वेनः क्रतुभिरानजे।
यस्य द्वारा मनुष्पिता। देवेषु धिय आनजे।। ३५७
५. यदीवहन्त्याशवः। भ्राजमाना रथेष्वा।
पिबन्तो मदिरं मधु। तत्र श्रवांसि कृण्वते।। ३५८
६. त्यमुवो अप्रहणम्। गृणीषे शवसस्पतिम्।
इन्द्रं विश्वासाहन्नरम्। शचिष्ठं विश्ववेदसम्।। ३५९
७. दधिग्राविण्णो अकारिषम्। जिष्णोरश्वस्य वाजिनः।
सुरभि नो मुखा करत्। प्र न आयूंषि तारिषत्।। ३६०
८. पुरां भिन्दुर्युवा कविः। अमितौजा अजायत।
इन्द्रो विश्वस्य कर्मणः। धर्ता वज्री पुरुष्टुतः।। ३६१

38

1. പ്ര പ്രവസ്ത്രിഷ്ടുഭമിഷം/ വന്ദദ്വീരായേന്ദവേ/
ധിയാ വോ മേധസാതയേ/ പുരന്ധ്യാ വിവാസത/ 362
2. കശ്യപസ്യ സ്വർവിദഃ/ യ ആഹുസ്സയുജാവിതി/
യയോർവിശ്വമപിവ്രതേ/ യജ്ഞന്ധീരോ നിചായ്യ/ 363
3. വിശ്വാനരസ്യ വസ്പതിം/ അനാനതസ്യ ശവസഃ/
ഏവൈശ്ച ചർഷണീനാം/ ഊതീ ഹുവേ രഥാനാം/ 364
4. സഘ്രായസ്തേ ദിവോ നരഃ/ ധിയാ മർതസ്യ ശമ്മതഃ/
ഊതീ സ ബൃഹതോ ദിവഃ/ ദ്വിഷോ അംഹോ ന തരതി/ 365
5. അർചതപ്രാർചത നരഃ/ പ്രിയമേധാസോ അർചത/
അർചന്തു പുത്രകാ ഉത/ പുരമിദ്ധൃഷ്ണ്വർചത/ 366
6. ഉക്ഥമിന്ദ്രായ ശംസ്യം/ വർധനം പുരു നിഃഷിധേ/
ശക്രോ യഥാ സുതേഷു നഃ/ രാരണത്സഖ്യേഷു ച/ 367
7. വിഭോഷ്ട ഇന്ദ്രരാധസഃ/ വിഭ്വീരാതിശ്ശതക്രതോ/
അഥാനോ വിശ്വചർഷണേ/ ദ്യുമ്നം സുദത്രമംഹയ/ 368
8. വയശ്ചിത്തേ പതത്രിണഃ/ ദ്വിപാച്ചതുഷ്പദർജുനി/
ഉഷഃ പ്രാരന്നൃതും രനു/ ദിവോ അന്തേഭ്യസ്പരി/ 369
9. അമീ യേ ദേവാസ്ഥ ന/ മധ്യേ യേ രോചനേ ദിവഃ/
കദ്വ ഋതങ്കദമൃതം/ കാ പ്രത്നാ വ ആഹുതിഃ/ 370

10. ഋചം സാമ യജാമഹേ/ യാഭ്യാം കർമാണി കൃണ്വതേ/
വി തേ സദസി രാജതഃ/ യജ്ഞന്ദേവേഷു വക്ഷതഃ/ 371

३८

१. प्रप्रवस्त्रिष्टुभमिषम्। वन्दद्वीरायेन्दवे।
धिया वो मेधसातये। पुरन्ध्या विवासत।। ३६२
२. कश्यपस्य स्वर्विदः। य आहुस्सयुजाविति।
ययोर्विश्वमपिव्रते। यज्ञन्धीरो निचाय्य।। ३६३
३. विश्वानरस्य वस्पतिम्। अनानतस्य शवसः।
एवैश्च चर्षणीनाम्। ऊती हुवे रथानाम्।। ३६४
४. सघायस्ते दिवो नरः। धिया मर्तस्य शम्मतः।
ऊती स बृहतो दिवः। द्विषो अंहो न तरति।। ३६५
५. अर्चत प्रार्चत नरः। प्रियमेधासो अर्चत।
अर्चन्तु पुत्रका उत। पुरमिद्धृष्ण्वर्चत।। ३६६
६. उक्थमिन्द्राय शंस्यम्। वर्धनं पुरु निष्षिधे।
शक्रो यथा सुतेषु नः। रारणत्सख्येषु च।। ३६७
७. विभोष्ट इन्द्रराधसः। विभ्वीरातिश्शतक्रतो।
अथानो विश्वचर्षणे। द्युम्नं सुदत्रमंहय।। ३६८
८. वयश्चित्ते पतत्रिणः। द्विपाच्चतुष्पदर्जुनि।
उषःप्रारन्नृतुं रनु। दिवो अन्तेभ्यस्परि।। ३६९
९. अमी ये देवास्थ न। मध्ये ये रोचने दिवः।
कद्व ऋतङ्कदंमृतम्। का प्रत्ना व आहुतिः।। ३७०
१०. ऋचं साम यजामहे। याभ्याङ्कर्माणि कृण्वते।
वि ते सदसि राजतः। यज्ञन्देवेषु वक्षतः।। ३७१

39

1. വിശ്വാഃ പൃതനാ അഭിഭൂതരന്നരഃ/
സജൂസ്തതക്ഷുരിന്ദ്രഞ്ജജനുശ്ച രാജസേ/
ക്ര തേ വരേസ്ഥമന്യാമുരിമുത/
ഉഗ്രമോജിഷ്ഠന്തരസം തരസ്വിനം/ 372
2. ശ്രത്തേ ദധാമി പ്രഥമായ മന്യവേ/
അഹന്യദ്ദസ്യുന്നരിയം വിവേരപഃ/

ഉഭേ യത്വാ രോദസീ ധാവതാമനു/
ഭ്യസാ തേ ശുഷ്മാത് പൃഥിവീ ചിദദ്രിവഃ/ 373
3. സമേത വിശ്വാ ഓജസാ പതിന്ദിവഃ/
യ ഏക ഇദ്ഭൂരതിഥിർജനാനാം/
സപൂർവ്യോ നൂതനമാജിഗീഷൻ/
തം വർതനീരനു വാവൃത ഏക ഇത്/ 374
4. ഇമേ ത ഇന്ദ്ര തേ വയം പുരുഷ്ടുത/
യേ ത്വാരഭ്യ ചരാമസി പ്രഭൂവസോ/
ന ഹി ത്വദന്യോ ഗിർവണോ ഗിരസ്സഘത്/
ക്ഷോണീരിവ പ്രതി തദ്ധര്യ നോ വചഃ/ 375
5. ചർഷണീധൃതമ്മഘവാനമുക്ഥ്യം/
ഇന്ദ്രം ഗിരോ ബൃഹതീരഭ്യനൂഷത/
വാവൃധാനം പുരുഹൂതം സുവൃക്തിഭിഃ/
അമർത്യഞ്ജരമാണന്ദിവേ ദിവേ/ 376
6. അച്ഛാ വ ഇന്ദ്രം മതയസ്വർയുവഃ/
സധ്രീചീർവിശ്വാ ഉശതീരനൂഷത/
പരിഷ്വജന്ത ജനയോ യഥാപതിം/
മര്യന്നശുന്ധ്യും മഘവാനമൂതയേ/ 377
7. അഭിത്യമ്മേഷമ്പുരുഹൂതമൃഗ്മിയം/
ഇന്ദ്രങ്ഗീർഭിർമദതാ വസ്വോ അർണവം/
യസ്യ ദ്യാവോ ന വിചരന്തി മാനുഷം/
ഭുജേ മംഹിഷ്ഠമഭിവിപ്രമർചത/ 378
8. ത്യം സുമേഷമ്മഹയാ സ്വർവിദം/
ശതയ്ത്വസ്യ സുഭ്വസ്സാകമീരതേ/
അത്യന്നവാജം ഹവനസ്യദം രഥം/
ഏന്ദ്രം വവൃത്യാമവസേ സുവൃക്തിഭിഃ/ 379
9. ഘൃതവതീ ഭുവനാനാമഭിശ്രിയാ/
ഉർവീ പൃഥ്വീമധുദുഘേ സുപേശസാ/
ദ്യാവാപൃഥിവീ വരുണസ്യ ധർമണാ/
വിഷ്കഭിതേ അജരേ ഭൂരി രേതസാ/ 380
10. ഉഭേ യദിന്ദ്ര രോദസീ ആ പപ്രാഥോഷാ ഇവ/
മഹാന്തന്ത്വാ മഹീനാം സമ്രാജഞ്ചർഷണീനാം/
ദേവീ ജനിത്ര്യജീജനത് ഭദ്രാ ജനിത്ര്യജീജനത് / 381
11. പ്ര മന്ദിനേ പിതുമദർചതാ വചഃ/
യഃ കൃഷ്ണഗർഭാ നിരഹന്ന്യജിശ്വനാ/
അവസ്യവോ വൃഷണം വജ്രദക്ഷിണം/
മരുത്വന്തം സഖ്യായ ഹുവേമഹി/ 382

३९

१. विश्वाःपृतना अभिभूतरन्नरः। सजूस्ततक्षुरिन्द्रञ्जजनुश्च राजसे।
क्र त्वे वरेस्थेमन्यामुरिमुत। उग्रमोजिष्ठन्तरसन्तरस्विनम्।। ३७२

२. श्रत्ते दधामि प्रथमाय मन्यवे। अहन्यद्दस्युन्ररियं विवेरपः।
उभे यत्वा रोदसी धावता मनु। भ्यसा ते शुष्मात् पृथिवी चिदद्रिवः।। ३७३

३. समेत विश्वा ओजसा पतिन्दिवः। य एक इत्भूरतिथिर्जनानाम्।
सपूर्व्यो नूतनमाजिगीषन्। तं वर्तनीरनु वावृत एक इत्।। ३७४

४. इमे त इन्द्र ते वयं पुरुष्टुत। ये त्वारभ्य चरामसि प्रभूवसो।
न हि त्वदन्यो गिर्वणो गिरस्सघत्। क्षोणीरिव प्रतितद्धर्य नो वचः।। ३७५

५. चर्षणीधृतमघवानमुक्थ्यम्। इन्द्रङ्गिरो बृहतीरभ्यनूषत।
वावृधानं पुरहूतं सुवृक्तिभिः। अमर्त्यञ्जरमाणन्दिवे दिवे।। ३७६

६. अच्छा व इन्द्रम्मतयस्वर्युवः। सध्रीचीर्विश्वा उशतीरनूषत।
परिष्वजन्त जनयो यथापतिम्। मर्यन्नशुन्ध्युं मघवानमूतये।। ३७७

७. अभित्यम्मेषम्पुरुहूतमृग्मियम्। इन्द्रङ्गीर्भिर्मदता वस्वो अर्णवम्।
यस्य द्यावो न विचरन्ति मानुषम्। भुजे मंहिष्ठमभिविप्रमर्चत।। ३७८

८. त्यं सुमेषम्महया स्वर्विदम्। शतय्यस्य सुभ्वस्साकमीरते।
अत्यन्नवाजं हवनस्यदं रथम्। एन्द्रं ववृत्यामवसे सुवृक्तिभिः।। ३७९

९. घृतवती भुवनानामभिश्रिया। उर्वी पृथ्वीमधुदुघे सुपेशसा।
द्यावापृथिवी वरुणस्य धर्मणा। विष्कभिते अजरे भूरि रेतसा।। ३८०

१०. उभे यदिन्द्र रोदसी। आ पप्राथोषा इव। महान्तन्त्वा महीनां।
सम्राजञ्चर्षणीनाम्। देवी जनित्र्यजीजनत्। भद्रा जनित्र्यजीजनत्।। ३८१

११. प्र मन्दिने पितुमदर्चता वचः। यः कृष्णगर्भा निरहन्नृजिश्वना।
अवस्यवो वृषणं वज्रदक्षिणम्। मरुत्वन्तं सख्याय हुवेमहि।। ३८२

40

1. സ്വാദോരിത്ഥാ വിഷൂവതഃ/ മധ്വോഃ പിബന്തി ഗൗര്യഃ/
യാ ഇന്ദ്രേണ സയാവരീഃ/ വൃഷ്ണാമദന്തി ശോഭഥാ/
വസ്വീരനുസ്വരാജ്യം/ 383

2. ഇത്ഥാ ഹി സോമ ഇന്മദഃ/ ബ്രഹ്മ ചകാര വർധനം/
ശവിഷ്ഠവജ്രിന്നോജസാ/ പൃഥിവ്യാനിശ്ശശാ അഹിം/
അർചന്നനുസ്വരാജ്യം/ 384

3. ഇന്ദ്രോ മദായ വാവൃധേ/ ശവസേ വൃത്രഹാന്യഭിഃ/
തമിന്മഹത്സ്വാജിഷു/ ഊതിമർഭേ ഹവാമഹേ/
സവാജേഷു പ്രനോവിഷത്/ 385
4. ഇന്ദ്ര തുഭ്യമിദദ്രിവഃ/ അനുത്തം വജ്രിന്വീര്യം/
യദ്ധത്യം മായിനമ്മൃഗം/ തവത്യമ്മായയാവധീഃ/
അർചന്നനുസ്വരാജ്യം/ 386
5. പ്രേഹ്യഭീഹി ധൃഷ്ണുഹി/ ന തേ വജ്രോ നിയംസതേ/
ഇന്ദ്ര നൃമ്ണം ഹി തേ ശവഃ/ ഹനോ വൃത്രഞ്ജയാ അപഃ/
അർചന്നനുസ്വരാജ്യം/ 387
6. യദുദീരത ആ ജയഃ/ ധൃഷ്ണവേ ധീയതേ ധനം/
യുങ്ക്ഷ്വാ മദച്യുതാ ഹരീ/ കം ഹനഃ കം വസൗ ദധഃ/
അസ്മം ഇന്ദ്ര വസൗ ദധഃ/ 388
7. അക്ഷന്നമീ മദന്ത ഹി/ അവപ്രിയാ അധൂഷത/
അസ്തോഷത സ്വഭാനവഃ/ വിപ്രാനവിഷ്ഠയാ മതീ/
യോ ജാന്വിന്ദ്ര തേ ഹരീ/ 389
8. ഉപോ ഷു ശൃണുഹീ ഗിരഃ/ മഘവന്മാതഥാ ഇവ/
കദാ നസ്സൂനൃതാവതഃ/ കര ഇദർഥയാസ ഇത്/
യോ ജാന്വിന്ദ്ര തേ ഹരീ/ 390
9. ചന്ദ്രമാ അപ്സ്വാന്തരാ/ സുപർണോ ധാവതേ ദിവി/
ന വോ ഹിരണ്യനേമയഃ/ പദം വിന്ദന്തി വിദ്യുതഃ/
വിത്തമ്മേ അസ്യ രോദസീ/ 391
10. പ്രതി പ്രിയതമം രഥം/ വൃഷണം വസുവാഹനം/
സ്തോതാവാമശ്വിനാവൃഷിഃ/ സ്തോമേഭിർഭൂഷതി പ്രതി/
മാധ്വീ മമ ശ്രുതം ഹവം/ 392

४०

१. स्वादोरित्था विषूवतः। मधोः पिबन्ति गौर्यः।
या इन्द्रेण सयावरीः। वृष्णा मदन्ति शोभथा। वस्वीरनुस्वराज्यम्।। ३८३
२. इत्था हि सोम इन्मदः। ब्रह्म चकार वर्धनम्।शविष्ठवज्रिन्नोजसा।
पृथिव्यानिश्शशा अहिम्। अर्चन्ननुस्वराज्यम्।। ३८४
३. इन्द्रो मदाय वावृधे। शवसे वृत्रहा नृभिः।
तमिन्महत्स्वाजिषु। ऊतिमर्भे हवामहे। सवाजेषु प्रनोविषत्। ३८५
४. इन्द्र तुभ्यमिदद्रिवः। अनुत्तं वज्रिन्वीर्यम्।
यद्धत्यम्मायिनम्मृगम्। तवत्यम्माययावधीः। अर्चन्ननुस्वराज्यम्।। ३८६
५. प्रेह्यभीहि धृष्णुहि। न ते वज्रो नियंसते।
इन्द्र नृम्णं हि ते शवः। हनो वृत्रञ्जया अपः। अर्चन्ननुस्वराज्यम्।। ३८७

६. यदुदीरत आ जयः। धृष्णवे धीयते धनम्। युङ्क्ष्वा मदच्युता हरी।
कं हनः कं वसौ दधः। अस्मम् इन्द्र वसौ दधः।। ३८८
७. अक्षन्नमी मदन्त हि। अवप्रिया अधूषत।
अस्तोषत स्वभानवः। विप्रानविष्ठया मती। यो जान्विन्द्र ते हरी।। ३८९
८. उपोषु शृणुही गिरः। मघवन्मा तथा इव। कदानस्सूनृतावतः।
कर इदर्थयास इत्। यो जान्विन्द्र ते हरी।। ३९०
९. चन्द्रमा अप्स्वान्तरा। सुपर्णो धावते दिवि। न वो हिरण्यनेमयः।
पदं विन्दन्ति विद्युतः। वित्तम्मे अस्य रोदसी।। ३९१
१०. प्रति प्रियतमं रथम्। वृषणं वसुवाहनम्। स्तोतावामश्विनावृषिः।
स्तोमेभिर्भूषति प्रति। माध्वी मम श्रुतं हवम्।। ३९२

41

1. ആ തേ അഗ്ന ഇധീമഹി/ ദ്യുമന്തന്തേവാജരം/
യദ്ധസ്യാതേ പനീയസീ/ സമിദ്ദീദയതി ദ്യവി/
ഇഷം സ്തോതൃഭ്യ ആഭര/ 393
2. അഗ്നിന്ന സ്രവൃക്തിഭിഃ/ ഹോതാരന്ത്വാ വൃണീമഹേ/
ശീരം പാവകശോചിഷം വിവോമദേ/
യജ്ഞേഷു സ്തീർണബർഹിഷം വിവക്ഷസേ/ 394
3. മഹേ നോ അദ്യ ബോധയ/ ഉഷോ രായേ ദിവിത്മതീ/
യഥാചിന്നോ അബോധയഃ/ സത്യശ്രവസി വായ്യേ/
സുജാതേ അശ്വസൂനൃതേ/ 395
4. ഭദ്രന്നോ അപിവാതയ/ മനോ ദക്ഷമുതക്രതും/
അഥാ തേ സഖ്യേ അന്ധസാ വിവോമദേ/
രണാ ഗാവോ ന യവസേ വിവക്ഷസേ/ 396
5. ക്രത്വാ മഹം അനുഷ്ധ്യഃ/ ഭീമ ആ വാവൃതേ ശവഃ/
ശ്രിയ ഋഷ്വ ഉപാകയോഃ/ നി ശിപ്രീ ഹരിവാന്ദധേ/
ഹസ്തയോർവജ്രമായസം/ 397
6. സ ഘാ തം വൃഷണം രഥം/ അധിതിഷ്ഠാതി ഗോവിദം/
യഃ പാത്രം ഹാരിയോജനം/ പൂർണമിന്ദ്രാ ചികേതതി/
യോ ജാനമിന്ദ്ര തേ ഹരീ/ 398
7. അഗ്നിന്തമ്മന്യേ യോ വസുഃ/ അസ്തയ്യയ്യന്തി ധേനവഃ/
അസ്തമർവന്ത ആ ശവഃ / അസ്തന്നിത്യാസോ വാജിനഃ/
ഇഷം സ്തോതൃഭ്യ ആഭര/ 399
8. ന തമംഹോ ന ദുരിതം/ ദേവാസോ അഷ്ട മർത്യം/
സ ജോഷസോ യമര്യമാ/
മിത്രോ നയന്തി വരുണോ അതി ദ്വിഷഃ/ 400

४१

१. आ ते अग्न इधीमहि। द्युमन्तन्देवाजरम्।
यद्ध स्याते पनीयसी। समिद्दीदयति द्यवि। इषं स्तोतृभ्य आभर।। ३९३

२. आग्निन्न स्ववृक्तिभिः। होतारन्त्वा वृणीमहे।
शीरम्पावकशोचिषं विवोमदे। यज्ञेषु स्तीर्णबर्हिषं विवक्षसे।। ३९४

३. महे नो अद्य बोधय। उषो राये दिवित्मती।
यथाचिन्नो अबोधयः । सत्यश्रवसि वाय्ये। सुजाते अश्वसूनृते।। ३९५

४. भद्रन्नो अपिवातय। मनो दक्षमुतक्रतुम्।
अथा ते सख्ये अन्धसा विवोमदे। रणा गावो न यवसे विवक्षसे।। ३९६

५. क्रत्वा महम् अनुष्वधः। भीम आ वावृते शवः।
श्रिय ऋष्व उपाकयोः। नि शिप्रीहरिवान्दधे। हस्तयोर्वज्रमायसम्।। ३९७

६. सघातं वृषणं रथम्। अधितिष्ठाति गोविदम्।
यःपात्रं हारियोजनम्। पूर्णमिन्द्रा चिकेतति। यो जान्विन्द्र ते हरी।। ३९८

७. अग्निन्तम्मन्ये यो वसुः। अस्तय्यय्यन्ति धेनवः।
अस्तमर्वन्त आ शवः। अस्तन्नित्यासो वाजिनः। इषं स्तोतृभ्य आभर।। ३९९

८. न तमंहो न दुरितम्। देवासो अष्ट मर्त्यम्।
स जोषसो यमर्यमा। मित्रो नयन्ति वरुणो अतिद्विषः।। ४००

42

1. പരിപ്രധന്യ/ ഇന്ദ്രായ സോമ/ സ്വാദുർമിത്രായ/
പൂഷ്ണേ ഭഗായ/ 401

2. പര്യൂഷുപ്രധന്യാ വാജസാതയേ/ പരിവൃത്രാണി സക്ഷണിഃ/
ദ്വിഷസ്തരധിയ ഋണയാ ന ഈരസേ/ 402

3. പവസ്വ സോമ/ മഹാൻ സമുദ്രഃ/ പിതാ ദേവാനാം/
വിശ്വാഭിധാമ/ 403

4. പവസ്വ സോമ/മഹേ ദക്ഷായ/അശ്വോ ന നിക്തഃ/
വാജീ ധനായ/ 404

5. ഇന്ദുഃ പവിഷ്ട/ ചാരുർമദായ/അപാമുപസ്ഥേ/ കവിർഭഗായ/ 405

6. അനു ഹിത്വാ സുതം സോമ മദാമസി/ മഹേ സമര്യരാജ്യേ/
വാജം അഭിപവമാന പ്ര ഗാഹസേ/ 406

7. ക ഈം വ്യക്താഃ/ നരസ്സനീളാഃ/ രുദ്രസ്യ മര്യാഃ/
യഥാ സ്വശ്വാഃ/ 407

8. അഗ്നേ തമദ്യ/ അശ്വന്നസ്തോമൈഃ/
ക്രതുന്ന ഭദ്രം ഹൃദി സ്പൃശം/ഋധ്യാമാ ത ഓഹൈഃ/ 408
9. ആവിർമര്യാ അവാജം വാജിനോഗ്മൻ/
ദേവസ്യസവിതുസ്സവേ/ സ്വർഗാ അർവന്തോ ജയത/ 409
10. പവസ്വ സോമ/ ദ്യുമ്നീ സുധാരഃ/ മഹീനാം അനുപൂർവ്യഃ/ 410

४२

१. परिप्रधन्व। इन्द्राय सोम। स्वादुर्मित्राय। पूष्णे भगाय।। ४०१
२. पर्यूषुप्रधन्वा वाजसातये। परिवृत्राणि सक्षणिः।
द्विषस्तरधिय ऋणया न ईरसे।। ४०२
३. पवस्व सोम। महान् समुद्रः। पिता देवानाम्।। विश्वाभिधाम।। ४०३
४. पवस्व सोम। महे दक्षाय। अश्वो न निक्तः। वाजी धनाय।। ४०४
५. इन्दुः पविष्ट। चारुर्मदाय। अपामुपस्थे। कविर्भगाय।। ४०५
६. अनु हित्वा सुतं सोम मदामसि। महे समर्यराज्ये।
वाजम् अभिपवमान प्र गाहसे।। ४०६
७. क ईं व्यक्ताः। नरस्सनीळाः। रुद्रस्य मर्याः। यथा स्वश्वाः।। ४०७
८. अग्ने तमद्य। अश्वन्नस्तोमैः।
क्रतुन्न भद्रं हृदिस्पृशम्। ऋध्यामा त ओहैः।। ४०८
९. आविर्मर्या अवाजं वाजिनोग्मन्।
देवस्य सवितुस्सवे। स्वर्गा अर्वन्तो जयत।। ४०९
१०. पवस्व सोम। द्युम्नी सुधारः। महीनाम् आनुपूर्व्यः।। ४१०

43

1. ഇന്ദ്ര സുതേഷു സോമേഷു/ ക്രതും പുനീഷ ഉക്ഥ്യം/
വിദേ വൃധസ്യ ദക്ഷസ്യ മഹം ഹി ഷഃ/ 411
2. തമഭിപ്രഗായത/ പുരുഹൂതമ്പുരുഷ്ടുതം/
ഇന്ദ്രങ്ഗീർഭിസ്തവിഷമാവിവാസത/ 412
3. തന്തേ മദങ്ഗൃണീമസി/ വൃഷണം പൃക്ഷു സാസഹിം/
ഉലോകകൃത്നുമദ്രിവോ ഹരിശ്രിയം/ 413
4. യത്സോമമിന്ദ്ര വിഷ്ണവേ/ യദ്വാഘത്രിത ആപ്ത്യേ/
യദ്വാ മരുത്സു മന്ദസേ സമിന്ദുഭിഃ/ 414
5. ഏദുമധോർമദിന്തരം/ സിഞ്ചാധ്വര്യോ അന്ധസാ/
ഏവാ ഹി വീരസ്തവതേ സദാവൃധഃ/ 415

6. ഏന്ദുമിന്ദ്രായ സിഞ്ചത/ പിബാത സോമ്യം മധു/
പ്ര രാധാംസി ചോദയതാ മഹിത്വനാ/ 416
7. ഏതോനവിന്ദ്രം സ്തവാമ/ സഖായസ്തോമ്യന്നരം/
കൃഷ്ടീരേ്യാ വിശ്വാ അഭ്യസ്ത്യേക ഇത്/ 417
8. ഇന്ദ്രായ സാമഗായത/ വിപ്രായ ബൃഹതേ ബൃഹത്/
ബ്രഹ്മകൃതേ വിപശ്ചിതേ പനസ്യവേ/ 418
9. യ ഏക ഇദ്വിദയതേ/ വസുമർതായ ദാശുഷേ/
ഈശാനോ അപ്രതിഷ്കുത ഇന്ദ്രോ അങ്ഗ/ 419
10. സഖായ ആശിഷാമഹേ/ ബ്രഹ്മേന്ദ്രായ വജ്രിണേ/
സ്തുഷ ഊഷു വോ നൃതമായ ധൃഷ്ണവേ/ 420

४३

१. इन्द्र सुतेषु सोमेषु। क्रतुं पुनीष उक्थ्यम्।
विदे वृधस्य दक्षस्य महं हि षः।। ४११
२. तम्वभिप्रगायत। पुरुहूतम्पुरुष्टुतम्।
इन्द्रङ्गीर्भिस्तविषमाविवासत।। ४१२
३. तन्ते मदङ्गृणीमसि। वृषणं पृक्षु सासहिम्।
उलोककृत्नुमद्रिवो हरिश्रियम्।। ४१३
४. यत्सोममिन्द्र विष्णवे। यद्वाघत्रित आप्त्ये।
यद्वा मरुत् सु मन्दसे समिन्दुभिः।। ४१४
५. एदुमधोर्मदिन्तरम्। सिञ्चाध्वर्यो अन्धसा।
एवा हि वीरस्तवते सदावृधः।। ४१५
६. एन्दुमिन्द्राय सिञ्चत। पिबात सोम्यं मधु।
प्र राधांसि चोदयता महित्वना।। ४१६
७. एतोन्विन्द्रं स्तवाम। सखायस्तोम्यन्नरम्।
कृष्टीर्यो विश्वा अभ्यस्त्येक इत्।। ४१७
८. इन्द्राय सामगायत। विप्राय बृहते बृहत्।
ब्रह्मकृते विपश्चिते पनस्यवे।। ४१८
९. य एक इद्विदयते। वसुमर्ताय दाशुषे।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग।। ४१९
१०. सखाय आशिषामहे। ब्रह्मेन्द्राय वज्रिणे।
स्तुष ऊषु वो नृतमाय धृष्णवे।। ४२०

44

1. ഏന്ദ്ര നോ ഗധിപ്രിയ/ സത്രാജിദഗോഹ്യ/
   ഗിരിർന വിശ്വതഃ പൃഥുഃ പതിർദിവഃ/ 421
2. യസ്യ ത്യച്ഛമ്ബരം മദേ/ ദിവോദാസായ രന്ധയൻ/
   അയം സ സോമ ഇന്ദ്ര തേ സുതഃ പിബ/ 422
3. ഗൃണേ തദിന്ദ്ര തേ ശവഃ/ ഉപമാന്ദേവതാതയേ/
   യദ്ധംസി വൃത്രമോജസാ ശചീപതേ/ 423
4. യ ഇന്ദ്ര സോമ പാതമഃ/ മദശ്ശവിഷ്ഠ ചേതതി/
   യേനാഹംസിന്യാത്രിണന്തമീമഹേ/ 424
5. തു ചേതുനായ തത്സുനഃ/ ദ്രാഘീയ ആയുർജീവസേ/
   ആദിത്യാസസ്സമ്മഹസഃ കൃണോതന/ 425
6. വേത്ഥാ ഹി നിരൃതീനാം/ വജ്രഹസ്ത പരിവൃജം/
   അഹരഹഃ ശുന്ധ്യുഃ പരിപദാമിവ/ 426
7. അപാമീവാമപസ്രിധം/ അപ സേധത ദുർമതിം/
   ആദിത്യാസോ യുയോതനാനോ അംഹസഃ/ 427
8. പിബാ സോമമിന്ദ്ര മന്ദതു ത്വാ/
   യന്തേ സുഷാവ ഹര്യശ്വാദ്രിഃ/
   സോതുർബാഹുഭ്യാം സുയതോനാർവാ/ 428

४४

१. एन्द्र नो गधिप्रिय। सत्राजिदगोह्य।
   गिरिर्न विश्वतःपृथुःपतिर्दिवः।। ४२१
२. यस्य त्यच्छम्बरं मदे। दिवोदासाय रन्धयन्।
   अयं स सोम इन्द्र ते सुतःपिब।। ४२२
३. गृणे तदिन्द्र ते शवः। उपमान्देवतातये।
   यद्धंसि वृत्रमोजसा शचीपते।। ४२३
४. य इन्द्र सोमपातमः। मदश्शविष्ठ चेतति।
   येनाहंसिन्यात्रिणन्तमीमहे।। ४२४
५. तु चेतुनाय तत्सुनः। द्राघीय आयुर्जीवसे।
   आदित्यासस्सम्महसः कृणोतन।। ४२५
६. वेत्था हि निरृतीनाम्। वज्रहस्त परिवृजम्।
   अहरहः शुन्ध्युः परिपदामिव।। ४२६
७. अपामीवामपस्त्रिधम्। अप सेधत दुर्मतिम्।
   आदित्यासो युयोतनानो अंहसः।। ४२७

८. घिबा सोममिन्द्र मन्दतु त्वा। यन्ते सुषाव हर्यश्वाद्रिः।
सोतुर्बाहुभ्यां सुयतोनार्वा।। ४२८

45

1. അഭ്രാത്യവ്യോ അനാത്വം/ അനാപിരിന്ദ്ര ജനുഷാ/
സനാദസി യുധേദാപിത്വമിച്ഛസേ/ 429
2. യോ ന ഇദമിദം പുരാ/ പ്രവസ്യ ആനിനായ തമുവസ്തുഷേ/
സഖായ ഇന്ദ്രമൂതയേ/ 430
3. ആ ഗന്താമാരിഷണ്യത/ പ്രസ്ഥാവാനോ മാപസ്ഥാതാ സമന്യവഃ/
ദൃഢാശ്ചിദ്യമയിഷ്ണവഃ/ 431
4. ആയാഹ്യയമിന്ദവേ/ അശ്വപതേ ഗോപത ഉർവരാപതേ/
സോമം സോമപതേ പിബ/ 432
5. ത്വയാ ഹ സ്വിദ്യുജാ വയം/ പ്രതിശ്വസന്തം വൃഷഭ ബ്രുവീമഹി/
സംസ്ഥേ ജനസ്യ ഗോമതഃ/ 433
6. ഗാവശ്ചിത്ഘാ[3] സമന്യവഃ/ സജാത്യേ ന മരുതസ്സുബന്ധവഃ/
രിഹതേ ഉകുഭോ മിഥഃ/ 434
7. ത്വന്ന ഇന്ദ്രാഭര/ ഓജോ നൃമ്ണം ശതക്രതോ വിചർഷണേ/
ആ വീരം പൃതനാസഹം/ 435
8. അധാ ഹീന്ദ്ര ഗിർവണഃ/ ഉപ ത്വാ കാമ ഈമഹേ സസൃഗ്മഹേ/
ഉദേവ ഗ്മന്ത ഉദഭിഃ/ 436
9. സീദന്തസ്തേ വയോ യഥാ/ ഗോശ്രീസ്തേമധോമദിരോ വിവക്ഷണഃ/
അഭിത്വാമിന്ദ്ര നോനുമഃ/ 437
10. വയമുത്വാമപൂർവ്യ/ സ്ഥൂരന്നകച്ചിദ്ഭരന്തോവസ്യവഃ/
വജ്രീംശ്ചിത്രം ഹവാമഹേ/ 438

४५

१. अभ्रातृव्यो अनात्वम्। अनापिरिन्द्र जनुषा सनादसि।
युधेदापित्वमिच्छसे।। ४२९
२. यो न इदमिदं पुरा। प्रवस्य आनिनाय तमुवस्तुषे।
सखाय इन्द्रमूतये।। ४३०
३. आ गन्तामारिषण्यत। प्रस्थावानो मापस्थाता समन्यवः।
दृढाश्चिद्यमयिष्णवः।। ४३१
४. आयाह्ययमिन्दवे। अश्वपते गोपत उर्वरापते। सोमं सोमपते पिब।। ४३२
५. त्वया ह स्विद्युजा वयम्। प्रतिश्वसन्तं वृषभ ब्रुवीमहि।
संस्थे जनस्य गोमतः।। ४३३

६. गावश्चित्घा समन्यवः। सजात्ये न मरुतस्सबन्धवः।
रिहते ककुभो मिथः।। ४३४
७. त्वन्न इन्द्राभर। ओजो नृम्णं शतक्रतो विचर्षणे। आ वीरं पृतनासहम्।। ४३५
८. अधा हीन्द्र गिर्वणः। उपत्वा काम ईमहे ससृग्महे।
उदेव ग्मन्त उदभिः।। ४३६
९. सीदन्तस्ते वयो यथा। गोश्रीस्ते मधोमदिरो विवक्षणः।
अभित्वामिन्द्र नोनुमः।। ४३७
१०. वयमुत्वामपूर्व्य। स्थूरन्नकच्चित्भरन्तोऽवस्यवः।
वज्रींश्चित्रं हवामहे।। ४३८

46

1. വിശ്വതോ ദാവൻ/ വിശ്വതോ ന ആഭര/
യന്ത്യാ ശവിഷ്ഠമീമഹേ/ 439
2. ഏഷ ബ്രഹ്മാ യ ഋത്വിയഃ/
ഇന്ദ്രോ നാമ ശ്രുതോ ഗൃണേ/ 440
3. ബ്രഹ്മാണ ഇന്ദ്രം മഹയന്തോ അർകൈഃ/
അവർധയന്നഹയേ ഹന്തവാ ഉ/ 441
4. അനവസ്തേ രഥമശ്വായ തക്ഷുഃ/
ത്വഷ്ടാ വജ്രം പുരുഹൂതദ്യുമന്തം/ 442
5. ശം പദമ്മഘം രയീഷിണേ/
ന കാമമവ്രതോ ഹിനോതി ന സ്പൃശദ്രയിം/ 443
6. സദാ ഗാവശ്ശുചയോ വിശ്വധായസഃ/
സദാ ദേവ അരേപസഃ/ 444
7. ആയാഹി വനസാ സഹ/
ഗാവസ്സചന്ത വർതനീയദൂധഭിഃ/ 445
8. ഉപപ്രക്ഷേ മധുമതിക്ഷിയന്തഃ/
പുഷ്യേമരയിന്ധീമഹേ ത ഇന്ദ്ര/ 446
9. അർചന്ത്യർകം മരുതസ്വർകാഃ/
ആസ്തോഭതി ശ്രുതോ യുവാസ ഇന്ദ്രഃ/ 447
10. പ്ര വ ഇന്ദ്രായ വൃത്രഹന്തമായ/
വിപ്രായ ഗാഥം ഗായത യഞ്ജുജോഷതേ/ 448

४६

१. विश्वतो दावन् विश्वतो न आभर। यन्त्वा शविष्ठमीमहे।। ४३९
२. एष ब्रह्मा य ऋत्वियः। इन्द्रो नाम श्रुतो गृणे।। ४४०

३. ब्रह्माण इन्द्रं महयन्तो अर्कैः। अवर्धयन्नहये हन्तवा उ।। ४४१
४. अनवस्ते रथमश्वाय तक्षुः। त्वष्टा वज्रं पुरुहूतद्युमन्तम्।। ४४२
५. शं पदं मघं रयीषिणे। न काममव्रतो हिनोति न स्पृशद्रयिम्।। ४४३
६. सदा गावश्शुचयो विश्वधायसः। सदा देवा अरेपसः।। ४४४
७. आयाहि वनसा सह। गावस्सचन्त वर्तनीयदूधभिः।। ४४५
८. उपप्रक्षे मधुमतिक्षियन्तः। पुष्येम रयिन्धीमहे त इन्द्र।। ४४६
९. अर्चन्त्यर्कं मरुतस्वर्काः। आस्तोभति श्रुतो युवास इन्द्रः।। ४४७
१०. प्र व इन्द्राय वृत्रहन्तमाय। विप्राय गाथङ्गायत यज्जुजोषते।। ४४८

47

1. അചേത്യഗ്നിശ്ചികിതിഃ/ ഹവ്യവാഡ് ന സുമദ്രഥഃ/ 449
2. അഗ്നേ ത്വന്നോ അന്തമഃ/
   ഉത ത്രാതാ ശിവോ ഭുവോ വരൂഥ്യഃ/ 450
3. ഭഗോ ന ചിത്രഃ/ അഗ്നിർമഹോനാം/ ദധാതി രത്നം/ 451
4. വിശ്വസ്യ പ്രസ്തോഭ/ പുരോ വാസന്യദിവേഹ നൂനം/ 452
5. ഉഷാ അപസ്വസുഷ്ടമഃ/
   സംവർതയതി വർതനിം സുജാതതാ/ 453
6. ഇമാ നു കം ഭുവനാ സീഷധേമ/
   ഇന്ദ്രശ്ച വിശ്വേ ച ദേവാഃ/ 454
7. ഊർജാ മിത്രോ വരുണഃ പിന്വത ഇളാ/
   പീവരീമിഷം കൃണുഹി ന ഇന്ദ്ര/ 455
8. വിസ്രുതയോ യഥാ പഥഃ/ ഇന്ദ്ര ത്വദ്യന്തു രാതയഃ/ 456
9. അയാ വാജന്നേവഹിതം സനേമ/ മദേമ ശതഹിമാസ്സുവീരാഃ/ 457
10. ഇന്ദ്രോ വിശ്വസ്യ രാജതി/ 458

४७

१. अचेत्यग्निश्चिकितिः। हव्यवाड् न सुमद्रथः।। ४४९
२. अग्ने त्वन्नो अन्तमः। उत त्राता शिवो भुवो वरूथ्यः।। ४५०
३. भगो न चित्रः। अग्निर्महोनाम्। दधाति रत्नम्।। ४५१
४. विश्वस्य प्रस्तोभ। पुरो वासन्यदिवेह नूनम्।। ४५२
५. उषा अपस्वसुष्टमः। संवर्तयति वर्तनिं सुजातता।। ४५३
६. इमा नु कं भुवना सीषधेम। इन्द्रश्च विश्वे च देवाः।। ४५४
७. ऊर्जा मित्रो वरुणःपिन्वत इळा। पीवरीमिषङ्कृणुहि न इन्द्र।। ४५५
८. विस्रुतयो यथा पथः। इन्द्र त्वद्यन्तु रातयः।। ४५६

९. अया वाजन्देवहितं सनेम। मदेम शतहिमास्सुवीराः।। ४५७
१०. इन्द्रो विश्वस्य राजति।। ४५८

48

1. ത്രികദ്രുകേഷു മഹിഷോ യവാശിരന്തു വിശുഷ്മഃ/
ത്യമ്പത്സോമമപിബദ്വിഷ്ണുനാ സുതയ്യഥാവശം/
സ ഈം മമാദ മഹി കർമ കർതവേ മഹാമുരും/
സൈനം സശ്ചദ്ദേവോ ദേവം സത്യ ഇന്ദുസ്സത്യമിന്ദ്രഃ/ 459
2. അയം സഹസ്രമാനവഃ/ ദൃശഃ കവീനാം മതിർജ്യോതിർവിധർമ/
ബ്രധ്നസ്സമീചീരുഷസസ്സമൈരയത്/ അരേപസസ്സചേതസഃ/
സ്വസരേ മന്യുമന്തശ്ചിതാ ഗോഃ/ 460
3. ഏന്ദ്ര യാഹ്യുപനഃ പരാവതഃ/നായമച്ഛാ വിദഥാനീവ സത്പതിഃ/
അസ്താ രാജേവ സത്പതിഃ/ഹവാമഹേ ത്വാ പ്രയസ്വന്തസ്സുതേഷ്വാ/
പുത്രാസോ ന പിതരം വാജസാതയേ/മംഹിഷ്ഠം വാജസാതയേ/461
4. തമിന്ദ്രം ജോഹവീമി മഘവാനമുഗ്രം/
സത്രാദധാനമപ്രതിഷ്കുതം ശ്രവാംസി ഭൂരിം/
മംഹിഷ്ഠോ ഗീർഭിരാ ച യജ്ഞിയോ വവർത/
രായേ നോ വിശ്വാ സുപഥാ കൃണോതു വജ്രീ/ 462
5. അഭിത്യന്ദേവം സവിതാരമോണ്യോഃ കവിക്രതും/
അർചാമി സത്യസവം രത്നധാമഭിപ്രിയമ്മതിം/
ഊർധ്വാ യസ്യാമതിർഭാ അദിദ്യുതത്സവീമനി/
ഹിരണ്യപാണിരമിമീത സുക്രതുഃ കൃപാസ്വഃ/ 463
6. തവത്യന്നര്യന്നൃതോപ ഇന്ദ്ര/ പ്രഥമം പൂർവ്യന്ദിവി പ്രവാച്യങ്കൃതം/
യോ ദേവസ്യ ശവസാ പ്രാരിണാ അസും രിണന്നപഃ/
ഭുവോ വിശ്വമഭ്യ ദേവമോജസാ/
വിദേദൂർജം ശതക്രതുർവിദേദിഷം/ 464
7. അസ്തു ശ്രൗഷട് പുരോ അഗ്നിന്ധിയാദധേ/
ആ നൂത്യച്ഛർധോ ദിവ്യം വൃണീമഹേ/
ഇന്ദ്രവായൂ വൃണീമഹേ യദ്ധക്രാണാ വിവസ്വതേ/
നാഭാസന്ദായ നവ്യസേ/ അധ പ്ര നൂനമുപയന്തി ധീതയഃ/
ദേവം അച്ഛ ന ധീതയഃ/ 465
8. പ്ര വോ മഹേ മതയോ യന്തുവിഷ്ണവേ/
മരുത്വതേ ഗിരിജാ ഏവയാ മരുത്/
പ്രശർധായ പ്രയജ്യവേ സുഖാദയേ/
തവസേ ഭന്ദദിഷ്ടയേ/ ധുനിവ്രതായ ശവസേ/ 466
9. അയാ രുചാ ഹരിണ്യാ പുനാനഃ/
വിശ്വാദ്വേഷാംസി തരതി സയുഗ്വഭിഃ സുരോ ന സയുഗ്വഭിഃ/

ധാരാ പൃഷ്ഠസ്യ രോചതേ പുനാനോ അരുഷോ ഹരിഃ/
വിശ്വാ യദ്രൂപാ പരിയാസ്യർകഭിഃ/ 467
10. അഗ്നിം ഹോതാരമ്മന്യേ ദാസ്വന്തം/
വസോസ്സൂനും സഹസാ ജാതവേദസം/
വിപ്രന്ന ജാതവേദസം/ യ ഊർധ്വയാ സ്വധ്വരഃ/
ദേവോ ദേവാച്യാ കൃപാ/ഘൃതസ്യ വിഭ്രാഷ്ടിമനുശുക്രശോചിഷഃ/
ആ ജുഹ്വാനസ്യ സർപിഷഃ/ 468

ഐന്ദ്രം കാണ്ഡം കഴിഞ്ഞു.

४८

१. त्रिकद्रुकेषु महिषो यवाशिरन्तुविशुष्मः।
तृम्पत्सोममपिबद्विष्णुना सुतय्यथावशम्।
स ईं ममाद महि कर्म कर्तवे महामुरुम्।
सैनं सश्चद्देवो देवं सत्य इन्दुस्सत्यमिन्द्रः।। ४५९
२. अयं सहस्रमानवः। दृशः कवीनां मतिर्ज्योतिर्विधर्म।
ब्रध्नस्समीचिरुषसस्समैरयत्। अरेपसस्सचेतसः।
स्वसरे मन्युमन्तश्चिता गोः।। ४६०
३. **एन्द्र** याह्युपनः परावतः। नायमच्छा विदथानीव सत्पतिः।
अस्ता राजेव सत्पतिः। हवामहे त्वा प्रयस्वन्तस्सुतेष्वा।
पुत्रासो न पितरं वाजसातये। मंहिष्ठं वाजसातये।। ४६१
४. तमिन्द्रञ्जोहवीमि मघवानमुग्रम्। सत्रादधानमप्रतिष्कुतं श्रवांसि भूरिम्।
मंहिष्ठो गीर्भिराचयज्ञियोक्वर्त। राये नो विश्वा सुपथा कृणोतु वज्री।। ४६२
५. अभित्यन्देवं सवितारमोण्योः कविक्रतुम्।
अर्चामि सत्यसवं रत्नधामभिप्रियम्मतिम्।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि।
हिरण्यपाणिरमिमीत सुक्रतुः कृपास्वः।। ४६३
६. तव त्यन्नरियन्नृतोप इन्द्र। प्रथमं पूर्व्यन्दिवि प्रवाच्यङ्कृतम्।
यो देवस्य शवसा प्रारिणा असुं रिणन्नपः।
भुवो विश्वमभ्य देवमोजसा। विदेदूर्जं शतक्रतुर्विदेदिषम्।। ४६४
७. अस्तु श्रौषळ् पुरो अग्निन्धिया दधे। आ नूत्यच्छर्धो दिव्यं वृणीमहे।
इन्द्रवायू वृणीमहे। यद्धक्राणा विवस्वते। नाभासन्दाय नव्यसे।
अध प्रनूनमुपयन्ति धीतयः। देवं अच्छ न धीतयः।। ४६५

८. प्र वो महे मतयो यन्तु विष्णवे। मरुत्वते गिरिजा एवया मरुत्।
प्रशर्धाय प्रयज्यवे सुखादये। तवसे भन्ददिष्टये। धुनिव्रताय शवसे।। ४६६

९. अया रुचा हरिण्या पुनानः। विश्वा द्वेषांसि तरति सयुग्वभिः।
सुरो न सयुग्वभिः। धारा पृष्ठस्य रोचते। पुनानो अरुषो हरिः।
विश्वा यद्रूपा परियास्यृक्वभिः। सप्तास्येभिरृक्वभिः।। ४६७

१०. अग्निं होतारम्मन्ये दास्वन्तम्। वसोस्सूनुं सहसा जातवेदसम्।
विप्रन्न जातवेदसम्। य ऊर्ध्वया स्वध्वरः। देवो देवाच्या कृपा।
घृतस्य विभ्राष्टिमनुशुक्रशोचिषः। आ जुह्वानस्य सर्पिषः। ४६८

ऐन्द्रं काण्डं समाप्तम्।

കാണ്ഡം 3 - പവമാനം

काण्डम् - ३ - पवमानम्।

49

1. ഉച്ചാ തേ ജാതമന്ധസാ/ ദിവി സദ്ഭൂമ്യാദദേ/
ഉഗ്രം ശർമ മഹിശ്രവഃ/ 469
2. സ്വാദിഷ്ഠയാ മദിഷ്ഠയാ/ പവസ്വ സോമ ധാരയാ/
ഇന്ദ്രായ പാതവേ സുതഃ/ 470
3. വൃഷാ പവസ്വ ധാരയാ/ മരുത്വതേ ച മത്സരഃ/
വിശ്വാ ദധാന ഓജസാ/ 471
4. യസ്തേ മദോ വരേണ്യഃ/ തേനാപവസ്വാന്ധസാ/
ദേവാവീരഘ്നശംസഹാ/ 472
5. തിസ്രോ വാച ഉദീരതേ/ ഗാവോ മിമന്തി ധേനവഃ/
ഹരിരേതി കനിക്രദത്/ 473
6. ഇന്ദ്രായേന്ദോ മരുത്വതേ/ പവസ്വ മധുമത്തമഃ/
അർകസ്യ യോനിമാസദഃ/ 474
7. അസാവ്യംശുർമദായ/ അപ്സു ദക്ഷോ ഗിരിഷ്ഠാഃ/
ശ്യേനോ ന യോനിമാസദത/ 475
8. പവസ്വ ദക്ഷസാധനഃ/ ദേവേഭ്യഃ പീതയേ ഹരേ/
മരുദ്ഭ്യോ വായവേ മദഃ/ 476
9. പരിസ്വാനോ ഗിരിഷ്ഠാഃ/ പവിത്രേ സോമോ അക്ഷരത്/
മദേഷു സർവധാ അസി/ 477
10. പരിപ്രിയാ ദിവഃ കവിഃ/ വയാംസി നപ്ത്യോർഹിതഃ/
സ്വാനൈര്യാതി കവിക്രതുഃ/ 478

४९

१. उच्चा ते जातमन्धसा। दिवि सत् भूम्याददे। उग्रं शर्म महिश्रवः।। ४६९
२. स्वादिष्ठया मदिष्ठया। पवस्व सोम धारया। इन्द्राय पातवे सुतः।। ४७०
३. वृषा पवस्व धारया। मरुत्वते च मत्सरः। विश्वा दधान ओजसा।। ४७१
४. यस्ते मदो वरेण्यः। तेनापवस्वान्धसा। देवावीरघशंसहा।। ४७२
५. तिस्रो वाच उदीरते। गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत्।। ४७३
६. इन्द्रायेन्दो मरुत्वते। पवस्व मधुमत्तमः। अर्कस्य योनिमासदः।। ४७४
७. असाव्यंशुर्मदाय। अप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत्।। ४७५

८. पवस्व दक्षसाधनः। देवेभ्यःपीतये हरे। मरुत्भ्यो वायवे मदः।। ४७६
९. परिस्वानो गिरिष्ठाः। पवित्रे सोमो अक्षरत्। मदेषु सर्वधा असि।। ४७७
१०. परिप्रिया दिवः कविः। वयांसि नप्त्योरहितः। स्वानर्याति कविक्रतुः।। ४७८

50

1. പ്ര സോമാസോ മദച്യുതഃ/ ശ്രവസേ നോ മഘോനാം/
സുതാ വിദഥേ അക്രമുഃ/ 479
2. പ്ര സോമാസോ വിപശ്ചിതഃ/ അപോ നയന്ത ഊർമയഃ/
വനാനി മഹിഷാ ഇവ/ 480
3. പവസ്വേന്ദോ വൃഷാസുതഃ/ കൃധീ നോ യശസോ ജനേ/
വിശ്വാ അപദ്വിഷോ ജഹി/ 481
4. വൃഷാ ഹ്യസി ഭാനുനാ/ ദ്യുമന്തന്ത്വാ ഹവാമഹേ/
പവമാനസ്വർദൃശം/ 482
5. ഇന്ദുഃ പവിഷ്ട ചേതനഃ/ പ്രിയഃ കവീനാം മതിഃ/
സൃജദശ്വം രഥീരിവ/ 483
6. അസൃക്ഷത പ്രവാജിനഃ/ ഗവ്യ സോമാസോ അശ്വയാ/
ശുക്രാസോ വീരയാ ശവഃ/ 484
7. പവസ്വ ദേവ ആയുഷക്/ ഇന്ദ്രങ്ഗച്ഛതു തേ മദഃ/
വായുമാരോഹ ധർമണാ/ 485
8. പവമാനോ അജീജനത്/ ദിവശ്ചിത്രന്ന തന്യതും/
ജ്യോതിർവൈശ്വാനരം ബൃഹത്/ 486
9. പരിസ്വാനാസ ഇന്ദവഃ/ മദായ ബർഹണാ ഗിരാ/
മധോ അർഷന്തി ധാരയാ/ 487
10. പരി പ്രാസിഷ്യദത്കവിഃ/ സിന്ധോരൂർമാവധിശ്രിതഃ/
കാരും ബിഭ്രത് പുരുസ്പൃഹം/ 488

५०

१. प्रसोमासो मदच्युतः। श्रवसे नो मघोनाम्। सुता विदथे अक्रमुः।। ४७९
२. प्रसोमासो विपश्चितः। अपो नयन्त ऊर्मयः। वनानि महिषा इव।। ४८०
३. पवस्वेन्दो वृषासुतः। कृधी नो यशसो जने। विश्वा अपद्विषो जहि।। ४८१
४. वृषा ह्यसि भानुना। द्युमन्तन्त्वा हवामहे। पवमानस्वर्दृशम्।। ४८२
५. इन्दुःपविष्ट चेतनः। प्रियः कवीनां मतिः। सृजदश्वं रथीरिव।। ४८३
६. असृक्षत प्रवाजिनः। गव्यासोमासो अश्वया। शुक्रासो वीरया शवः।। ४८४
७. पवस्व देव आयुषक्। इन्द्रड्गच्छतु ते मदः। वायुमारोह धर्मणा।। ४८५
८. पवमानो अजीजनत्। दिवश्चित्रन्न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत्।। ४८६

९. परिस्वानास इन्दवः। मदाय बर्हणा गिरा। मधो अर्षन्ति धारया।। ४८७

१०. परि प्रासिष्यदत्कविः। सिन्धोरूर्मावधिश्रितः। कारुं बिभ्रत् पुरुस्पृहम्।। ४८८

51

1. ഉപോഷു ജാതമപ്തുരം/ ഗോഭിർഭങ്ഗം പരിഷ്കൃതം/
ഇന്ദുന്ദേവാ അയാസിഷുഃ/ 489
2. പുനാനോ അക്രമീദഭി/ വിശ്വാമൃധോ വിചർഷണിഃ/
ശുംഭന്തി വിപ്രന്ധീതിഭിഃ/ 490
3. ആവിശൻ കലശം സുതഃ/ വിശ്വാ അർഷന്നഭിശ്രിയഃ/
ഇന്ദുരിന്ദ്രായ ധീയതേ/ 491
4. അസർജി രഥ്യോ യഥാ/ പവിത്രേ ചമ്വോസ്സുതഃ/
കാർഷ്മന്വാജീന്യക്രമീത്/ 492
5. പ്രയദ്ഗാവോ ന ഭൂർണയഃ/ ത്വേഷാ അയാസോ അക്രമുഃ/
ഘ്നന്തഃ കൃഷ്ണാമപത്വചം/ 493
6. അപഘ്നൻ പവസേ മൃധഃ/ ക്രതുവിത്സോമമത്സരഃ/
നുദസ്വാ ദേവയുഞ്ജനം/ 494
7. അയാ പവസ്വ ധാരയാ/ യയാ സൂര്യമരോചയഃ/
ഹിന്വാനോ മാനുഷീരപഃ/ 495
8. സ പവസ്വ യ ആവിഥ/ ഇന്ദ്രം വൃത്രായ ഹന്തവേ/
വവ്രിവാംസം മഹീരപഃ/ 496
9. അയാ വീതീ പരിസ്രവ/ യസ്ത ഇന്ദോ മദേഷ്വാ/
അവാഹന്നവതീർനവ/ 497
10. പരിദ്യുക്ഷം സനദ്രയിം/ ഭരദ്വാജന്നോ അന്ധസാ/
സ്വാനോ അർഷ പവിത്ര ആ/ 498

५१

१. उपोषु जातमप्तुरम्। गोभिर्भङ्गं परिष्कृतम्। इन्दुन्देवा अयासिषुः।। ४८९

२. पुनानो अक्रमीदभिः। विश्वामृधो विचर्षणिः। शुंभन्ति विप्रन्धीतिभिः।। ४९०

३. आविशन् कलशं सुतः। विश्वा अर्षन्नभिश्रियः। इन्दुरिन्द्राय धीयते।। ४९१

४. असर्जि रथ्यो यथा। पवित्रे चम्वोस्सुतः। कार्ष्मन्वाजीन्यक्रमीत्।। ४९२

५. प्र यत्गावो न भूर्णयः। त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णामपत्वचम्।। ४९३

६. अपघ्नन् पवसे मृधः। क्रतुवित्सोममत्सरः। नुदस्वा देवयुञ्जनम्।। ४९४

७. अया पवस्व धारया। यया सूर्यमरोचयः। हिन्वानो मानुषीरपः।। ४९५

८. स पवस्व य आविथ। इन्द्रं वृत्राय हन्तवे। वव्रिवांसं महीरपः।। ४९६

९. अया वीती परिस्रव। यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव।। ४९७

१०. परिद्युक्षं सनद्रयिंम्। भरद्वाजन्नो अन्धसा। स्वानो अर्ष पवित्र आ।। ४९८

52

1. അചിക്രദദ്വൃഷാ ഹരിഃ/ മഹാൻ മിത്രോ ന ദർശതഃ/
സംസൂര്യേണ ദിദ്യുതേ/ 499

2. ആ തേ ദക്ഷം മയോ ഭുവം/ വഹ്നിമദ്യാ വൃണീമഹേ/
പാന്തമാ പുരുസ്പൃഹം/ 500

3. അധ്വര്യോ അദ്രിഭിസ്സുതം/ സോമം പവിത്ര ആനയ/
പുനാഹീന്ദ്രായ പാതവേ/ 501

4. തരത്സമന്ദീ ധാവതി/ ധാരാസുതസ്യാന്ധസഃ/
തരത്സമന്ദീ ധാവതി/ 502

5. ആപവസ്വ സഹസ്രിണം/ രയിം സോമ സുവീര്യം/
അസ്മേ ശ്രവാംസി ധാരയ/ 503

6. അനുപ്രത്നാസ ആയവഃ/ പദന്നവീയോ അക്രമുഃ/
രുചേ ജനന്തസൂര്യം/ 504

7. അർഷാ സോമ ദ്യുമത്തമഃ/ അഭിദ്രോണാനി രോരുവത്/
സീദന്യോനൗ വനേഷ്വാ/ 505

8. വൃഷാ സോമ ദ്യുമം അസി/ വൃഷാ ദേവ വൃഷവ്രതഃ/
വൃഷാ ധർമാണി ദധ്രിഷേ/ 506

9. ഇഷേ പവസ്വ ധാരയാ/ മൃജ്യമാനോ മനീഷിഭിഃ/
ഇന്ദോ രുചാഭി ഗാ ഇഹി/ 507

10. മന്ദ്രയാ സോമധാരയാ/ വൃഷാ പവസ്വ ദേവയുഃ/
അവ്യാവാരേഭിരസ്മയുഃ/ 508

11. അയാ സോമ സുകൃത്യയാ/ മഹാൻ സന്നഭ്യവർധഥാഃ/
മന്ദാന ഇദ്വൃഷായസേ/ 509

12. അയാ വിചർഷണിർഹിതഃ/ പവമാനസ്സചേതതി/
ഹിന്വാന ആപ്യം ബൃഹത്/ 510

13. പ്ര ന ഇന്ദോ മഹേതുനഃ/ ഊർമിന്ന ബിഭ്രദർഷസി/
അഭി ദേവം അയാസ്യഃ/ 511

14. അപഘ്നൻ പവതേമൃധഃ/ അപസോമോ അരാവിണ്ണഃ/
ഗച്ഛന്നിന്ദ്രസ്യ നിഷ്കൃതം/ 512

५२

१. अचिक्रदद्वृषा हरिः। महान् मित्रो न दर्शतः। संसूरयेण दिद्युते।। ४९९

२. आ ते दक्षं मयो भुवम्। वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम्।। ५००

३. अध्वर्यो अद्रिभिस्सुतम्। सोमं पवित्र आनय। पुनाहीन्द्राय पातवे।। ५०१

४. तरत्समन्दी धावति। धारासुतस्यान्धसः। तरत्समन्दी धावति।। ५०२
५. आपवस्व सहस्रिणम्। रयिं सोम सुवीर्यम्। अस्मे श्रवांसि धारय।। ५०३
६. अनुप्रत्नास आयवः। पदन्नवीयो अक्रमुः। रुचे जनन्त सूर्यम्।। ५०४
७. अर्षा सोम द्युमत्तमः। अभिद्रोणानि रोरुवत्। सीदन्योनौ वनेष्वा।। ५०५
८. वृषा सोम द्युमम् असि। वृषा देव वृषौ व्रतः। वृषा धर्माणि दध्रिषे।। ५०६
९. इषे पवस्व धारया। मृज्यमानो मनीषिभिः। इन्दो रुचाभि गा इहि।। ५०७
१०. मन्द्रया सोमधारया। वृषा पवस्व देवयुः। अव्यावारेभिरस्मयुः।। ५०८
११. अया सोम सुकृत्यया। महान् सन्नभ्यवर्धथाः। मन्दान इद्वृषायसे।। ५०९
१२. अया विचर्षणिर्हितः। पवमानस्सचेतति। हिन्वान आप्यं बृहत्।। ५१०
१३. प्र न इन्दो महेतुनः। ऊर्मिन्न बिभ्रदर्षसि। अभि देवं अयास्यः।। ५११
१४. अपघ्नन् पवते मृधः। अपसोमो अराविण्णः। गच्छन्निन्द्रस्य निष्कृतम्।। ५१२

53

1. പുനാനസ്സോമധാരയാ/ അപോ വസാനോ അർഷസി/
ആരത്നധാ യോനിമൃതസ്യ സീദസി/
ഉത്സോ ദേവോ ഹിരണ്യയാ/ 513
2. പരീതോ ഷിഞ്ചതാ സുതം/ സോമോ യ ഉത്തമം ഹവിഃ/
ദധന്വാ യോ നര്യോ അപ്സ്വാന്തരാ/ സുഷാവ സോമമദ്രിഭിഃ/ 514
3. ആ സോമസ്യാനോ അദ്രിഭിഃ/ തിരോ വാരണ്യവ്യയാ/
ജനോ ന പുരിചമ്മോർവിശദ്ധരിഃ/ സദാ വനേഷു ദധ്രിഷേ/ 515
4. പ്രസോമ ദേവവീതയേ/ സിന്ധുർന പിപ്യേ അർണസാ/
അംശോഃ പയസാ മദിരോ ന ജാഗൃവിഃ/
അച്ഛാ കോശം മധുശ്ചുതം/ 516
5. സോമ ഉഷ്ണാണസ്സോതൃഭിഃ/ അധിഷ്ണുഭിരവീനാം/
അശ്വയേവ ഹരിതാ യാതി ധാരയാ/ മന്ദ്രയാ യാതി ധാരയാ/ 517
6. തവാഹം സോമരാരണ/ സഖ്യ ഇന്ദോ ദിവേ ദിവേ/
പുരൂണി ബഭ്രോ നിചരന്തി മാമവ/ പരിധീം രതിതം ഇഹി/ 518
7. മൃജ്യമാനസ്സുഹസ്ത്യാ/ സമുദ്രേ വാചമിന്വസി/
രയിം പിശങ്ഗം ബഹുലം പുരുസ്പൃഹം/ പവമാനാഭ്യർഷസി/ 519
8. അഭിസോമാസ ആയവഃ/ പവന്തേ മദ്യം മദം/
സമുദ്രസ്യാധിവിഷ്ടപേ മനീഷിണഃ/ മത്സരാസോ മദച്യുതഃ/ 520
9. പുനാനസ്സോമ ജാഗൃവിഃ/ അവ്യാവാരൈഃ പരിപ്രിയഃ/
ത്വം വിപ്രോ അഭവോ/ങ്ഗിരസ്തമ/ മധ്വാ യജ്ഞം മിമിക്ഷണഃ/ 521
10. പവമാനാ അസൃക്ഷത/ പവിത്രമതിധാരയാ/
മരുത്വന്തോ മത്സരാ ഇന്ദ്രിയാ ഹയാഃ/ മേധാമഭിപ്രയാംസി ച/ 522

11. പവസ്വ വാജസാതമഃ/ അഭിവിശ്വാനി വാര്യഃ/
    ത്വം സമുദ്രഃ പ്രഥമേ വിധർമൻ/ ദേവേഭ്യസ്സോമമത്സരഃ/ 523
12. ഇന്ദ്രായ പവതേ മദഃ/ സോമോ മരുത്വതേ സുതഃ/
    സഹസ്രധാരോ അത്യവ്യമർഷതി/ തമീമൃജന്ത്യായവഃ/ 524

५३

१. पुनानस्सोमधारया। अपो वसानो अर्षसि।
   आरत्नधा योनिमृतस्य सीदसि। उत्सो देवो हिरण्यया।। ५१३
२. परीतोषिञ्चता सुतम्। सोमो य उत्तमं हविः।
   दधन्वा यो नर्यो अप्स्वान्तरा। सुषाव सोममद्रिभिः।। ५१४
३. आ सोमस्वानो अद्रिभिः। तिरो वारण्यव्यया।
   जनो न पुरिचम्वोर्विशद्धरिः। सदा वनेषु दध्रिषे।। ५१५
४. प्रसोम देववीतये। सिन्धुर्न पिप्ये अर्णसा।
   अंशोःपयसा मदिरो न जागृविः। अच्छा कोशं मधुश्चुतम्।। ५१६
५. सोम उष्वाणस्सोतृभिः। अधिष्णुभिरवीनाम्।
   अश्वयेव हरिता याति धारया। मन्द्रया याति धारया।। ५१७
६. तवाहं सोमरारण। सख्य इन्दो दिवे दिवे।
   पुरूणि बभ्रो निचरन्ति मामव। परिधीं रतितम् इहि।। ५१८
७. मृज्यमानस्सुहस्त्या। समुद्रे वाचमिन्वसि।
   रयिं पिशङ्गं बहुलं पुरुस्पृहम्। पवमानाभ्यर्षसि।। ५१९
८. अभिसोमास आयवः। पवन्ते मद्यं मदम्।
   समुद्रस्याधिविष्टपे मनीषिणः। मत्सरासो मदच्युतः।। ५२०
९. पुनानस्सोम जागृविः। अव्या वारैःपरिप्रियः।
   त्वं विप्रो अभवोऽङ्गिरस्तम। मध्वा यज्ञं मिमिक्षणः।। ५२१
१०. पवमाना असृक्षत। पवित्रमतिधारया।
   मरुत्वन्तो मत्सरा इन्द्रिया हयाः। मेधामभिप्रयांसि च।। ५२२
११. पवस्व वाजसातमः। अभिविश्वानि वार्यः।
   त्वं समुद्रःप्रथमे विधर्मन्। देवेभ्यस्सोममत्सरः।। ५२३
१२. इन्द्राय पवते मदः। सोमो मरुत्वते सुतः।
   सहस्रधारो अत्यव्यमर्षति। तमीमृजन्त्यायवः।। ५२४

54

1. പ്രതുദ്രുവ പരികോശന്നിഷീദ/
നൃഭിഃ പുനാനോ അഭിവാജമർഷ/
അശ്വന്നത്യാ വാജിനമ്മർജയന്തേ/
അച്ഛാ ബർഹീരശനാഭിർനയന്തേ/ 525
2. പ്രകാവ്യമുശനേവ ബ്രുവാണഃ/
ദേവോ ദേവാനാഞ്ജനിമാ വിവക്തി/
മഹിവ്രതശ്ശുചിബന്ധുഃ പാവകഃ/
പദാവരാഹോ അഭ്യേതി രേഭൻ/ 526
3. തിസ്രോ വാച ഈരയതി പ്രവഹ്നിഃ/
ഋതസ്യ ധീതിം ബ്രഹ്മണോ മനീഷാം/
ഗാവോ യന്തി ഗോപതിം പൃച്ഛമാനാഃ/
സോമയ്യന്തി മതയോ വാവശാനാഃ/ 527
4. അസ്യ പ്രേഷാ ഹേമനാ പൂയമാനഃ/
ദേവോ ദേവേഭിസ്സമപൃക്തരസം/
സുതഃ പവിത്രം പരിയേതി രേഭൻ/
മിതേവ സദ്മ പശുമന്തി ഹോതാ/ 528
5. അക്രാൻ സമുദ്രഃ പ്രഥമേ വിധർമൻ/
ജനയൻ പ്രജാ ഭുവനസ്യ ഗോപാഃ/
വൃഷാ പവിത്രേ അധിസാനോ അവ്യേ/
ബൃഹത്സോമോ വാവൃധേ സ്വാനോ അദ്രിഃ/ 529
6. കനിക്രന്തി ഹരിരാസൃജ്യമാനഃ/
സീദന്വനസ്യ ജഠരേ പുനാനഃ/
നൃഭിര്യതഃ കൃണുതേ നിർണിജം ഗാം/
അതോ മതിഞ്ജനയത സ്വധാഭിഃ/ 530
7. ഏഷസ്യ തേ മധുമം ഇന്ദ്രസോമഃ/
വൃഷാ വൃഷ്ണഃ പരി പവിത്രേ അക്ഷാഃ/
സഹസ്രദാശ്ശതദാ ഭൂരിദാ വാ/
ശശ്വത്തമം ബർഹിരാവാജ്യസ്ഥാത്/ 531
8. പവസ്വ സോമം മധുമം ഋതാ വാ/
അപോ വസാനോ അധിസാനോ അവ്യേ/
അവദ്രോണാനി ഘൃതവന്തി രോഹ/
മദിന്തമോ മത്സര ഇന്ദ്ര പാനഃ/ 532
9. സോമഃ പവതേ ജനിതാ മതീനാം/
ജനിതാ ദിവോ ജനിതാ പൃഥിവ്യാഃ/
ജനിതാഗ്നേർജനിതാ സൂര്യസ്യ/
ജനിതേന്ദ്രസ്യ ജനിതോത വിഷ്ണോഃ/ 533

५४

१. प्रतुद्रुव परिकोशन्निषीद। नृभिःपुनानो अभिवाजमर्ष।
अश्वन्नत्वा वाजिनम्मर्जयन्ते। अच्छा बर्हीरशनाभिर्नयन्ते।। ५२५
२. प्रकाव्यमुशनेव ब्रुवाणः। देवो देवानाञ्जनिमा विवक्ति।
महिव्रतश्शुचिबन्धुःपावकः। पदावराहो अभ्येति रेभन्।। ५२६
३. तिस्रो वाच ईरयति प्रवह्निः। ऋतस्य धीतिं ब्रह्मणो मनीषाम्।
गावो यन्ति गोपतिं पृच्छमानाः। सोमय्यन्ति मतयो वावशानाः।। ५२७
४. अस्य प्रेषा हेमना पूयमानः। देवो देवेभिरसमपृक्तरसम्।
सुतःपवित्रं परियेति रेभन्। मितेव सत्म पशुमन्ति होता।। ५२८
५. अक्रान् समुद्रःप्रथमे विधर्मन्। जनयन् प्रजा भुवनस्य गोपाः।
वृषा पवित्रे अधिसानो अव्ये। बृहत्सोमो वावृधे स्वानो अद्रिः।। ५२९
६. कनिक्रन्ति हरिरासृज्यमानः। सीदन्वनस्य जठरे पुनानः।
नृभिर्यतः कृणुते निर्णिजं गाम्। अतो मतिञ्जनयत स्वधाभिः।। ५३०
७. एषस्य ते मधुमम् इन्द्रसोमः। वृषा वृष्णःपरि पवित्रे अक्षाः।
सहस्रदाश्शतदा भूरिदा वा। शश्वत्तमं बर्हिरावाज्यरथात्।। ५३१
८. पवस्व सोमं मधुमं ऋता वा। अपो वसानो अधिसानो अव्ये।
अवद्रोणानि घृतवन्ति रोह। मदिन्तमो मत्सर इन्द्र पानः।। ५३२
९. सोमःपवते जनिता मतीनाम् । जनिता दिवो जनिता पृथिव्याः।
जनिताग्नेर्जनिता सर्यस्य। जनितेन्द्रस्य जनितोत विष्णोः।। ५३३

55

1. അഭി ത്രിപൃഷ്ഠം വൃഷണം വയോധാം/
അങ്ഗോഷിണമവാവശന്തവാണീഃ/
വനാ വസാനോ വരുണോ ന സിന്ധുഃ/
വിരത്നധാ ദയതേ വാര്യാണി/ 534
2. പ്ര സേനാനീഃ ശൂരോ അഗ്രേ രഥാനാം/
ഗവ്യന്നേതി ഹര്ഷതേ അസ്യ സേനാ/
ഭദ്രാൻ കൃണ്വന്നിന്ദ്രഹവാൻ സഖിഭ്യഃ/
ആ സോമോ വസ്ത്രാ രഭസാനി ദത്തേ/ 535
3. പ്ര തേ ധാരാ മധുമതീരസൃഗ്രൻ/
വാരയ്യത്പൂതോ അത്യേഷ്യവ്യം/
പവമാനപവസേ ധാമ ഗോനാം/
ജനയൻ സൂര്യമപിന്വോ അർകൈഃ/ 536

4. പ്ര ഗായതാഭ്യർചാമ ദേവാൻ/
സോമം ഹിനോത മഹതേ ധനായ/
സ്വാദുഃ പവതാമതിവാരമവ്യം/
ആസീദതു കലശന്ദേവ ഇന്ദുഃ/ 537
5. പ്ര ഹിന്വാനോ ജനിതാ രോദസ്യോഃ/
രഥോ ന വാജം സനിഷ്ഠന്നയാസീത്/
ഇന്ദ്രങ്ഗച്ഛന്നായുധാ സംശിശാനഃ/
വിശ്വാവസുഹസ്തയോരാദധാനഃ/ 538
6. തക്ഷദ്യദീ മനസാ വേനതോ വാക്/
ജ്യേഷ്ഠസ്യ ധർമന്യുക്ഷോരനീകേ/
ആദീമായന്വരമാവാവശാനാഃ/
ജുഷ്ടം പതിം കലശേ ഗാവ ഇന്ദും/ 539
7. സാകമുക്ഷാ മർജയന്ത സ്വസാരഃ/
ദശ ധീരസ്യ ധീതയോ ധനുത്രീഃ/
ഹരിഃ പര്യദ്രവജ്ജാ സൂര്യസ്യ/
ദ്രോണന്നനക്ഷേ അത്യോ ന വാജീ/ 540
8. ഇന്ദുർവാജീ പവതേ ഗോന്യോഘാഃ/
ഇന്ദ്രേ സോമസ്സഹ ഇന്വൻ മദായ/
ഹന്തി രക്ഷോ ബാധതേ പര്യരാതിം/
വരിവഃ കൃണ്വൻ വൃജനസ്യ രാജാ/ 541
9. അധി യദസ്മിന്വാജിനീവ ശുഭഃ/
സ്പർധന്തേ ധിയസ്സൂരേ ന വിശഃ/
അപോ വൃണാനഃ പവതേ കവീയാൻ/
വ്രജന്നപശുവർധനായ മന്മ/ 542
10. മഹത്തത്സോമോ മഹിഷശ്ചകാര/
അപാമ്യുദ്ഗർഭോ/വൃണീത ദേവാൻ/
അദധാദിന്ദ്രേ പവമാന ഓജഃ/
അജനയത്സൂര്യേ ജ്യോതിരിന്ദുഃ/ 543
11. അപാമി വേദൂർമയസ്തർതുരാണാഃ/
പ്ര മനീഷാ ഈരതേ സോമമച്ഛ/
നമസ്യന്തീരുപചയന്തി സഞ്ച/
ആ ച വിശന്ത്യുശതീരുശന്തം/ 544
12. അയാ പവാ പവസൈനാ വസൂനി/
മാംശ്ചത്വ ഇന്ദോ സരസി പ്രധന്വ/
ബ്രധ്നശ്ചിദ്യസ്യ വാതോ ന ജൂതിം/
പുരുമേധശ്ചിത്തകവേനരന്ധത്/ 545

13. അസർജി വക്വാ രഥ്യേ യഥാജൗ/
ധിയാ മനോതാ പ്രഥമാ മനീഷാ/
ദശ സ്വസാരോ അധിസാനോ അവ്യേ/
മൃജന്തി വഹ്നിം സദനേഷ്വച്ഛ/ 546

५५

१. अभि त्रिपृष्ठं वृषणं वयोधाम्। अङ्गोषिणमवावशन्तवाणीः।
वना वसानो वरुणो न सिन्धुः। विरत्नधा दयते वार्याणि।। ५३४
२. प्र सेनानीःशूरो अग्रे रथानाम्। गव्यन्नेति हर्षते अस्य सेना।
भद्रान् कृण्वन्निन्द्रहवान् सखिभ्यः। आ सोमो वस्त्रा रभसानि दत्ते।। ५३५
३. प्रते धारा मधुमतीरसृग्रन्। वारय्यत्पूतो अत्येष्यव्यम्।
पवमानपवसे धाम गोनाम्। जनयन् सूर्यमपिन्वो अर्कैः।। ५३६
४. प्र गायताभ्यर्चाम देवान्। सोमं हिनोत महते धनाय।
स्वादुःपवतामतिवारमव्यम्। आसीदतु कलशन्देव इन्दुः।। ५३७
५. प्र हिन्वानो जनिता रोदस्योः। रथो न वाजं सनिषन्नयासीत्।
इन्द्रङ्गच्छन्नायुधा संशिशानः। विश्वावसुहस्तयोरादधानः।। ५३८
६. तक्षद्यदी मनसा वेनतो वाक्। ज्येष्ठस्य धर्मन्युक्षोरनीके।
आदीमायन्वरमावावशानाः। जुष्टं पतिङ्कलशे गाव इन्दुम्।। ५३९
७. साकमुक्षो मर्जयन्त स्वसारः। दश धीरस्य धीतयो धनुत्रीः।
हरिःपर्यद्रवज्जा सूर्यस्य। द्रोणन्ननक्षे अत्यो न वाजी।। ५४०
८. इन्दुर्वाजी पवते गोन्योघाः। इन्द्रे सोमस्सह इन्वन् मदाय।
हन्ति रक्षो बाधते पर्यरातिम्। वरिवः कृण्वन्वृजनस्य राजा।। ५४१
९. अधि यदस्मिन्वाजिनीव शुभः। स्पर्धन्ते धियस्सूरे न विशः।
अपो वृणानःपवते कवीयान्। व्रजन्नपशुवर्धनाय मन्म।। ५४२
१०. महत्तत्सोमो महिषश्चकार। अपाय्यत्गर्भोऽवृणीत देवान्।
अदधादिन्द्रे पवमान ओजः। अजनयत्सूर्ये ज्योतिरिन्दुः।। ५४३
११. अपामि वेदूर्मयस्तर्तुराणाः। प्र मनीषा ईरते सोममच्छ।
नमस्यन्तीरुपचयन्ति सञ्च। आ च विशन्त्युशतीरुशन्तम्।। ५४४
१२. अया पवा पवस्वैना वसूनि। मांश्चत्वा इन्दो सरसि प्रधन्व।
ब्रध्नश्चिद्यस्य वातो न जूतिम्। पुरुमेधश्चित्तकवेनरन्धत्।। ५४५
१३. असर्जि वक्वा रथ्ये यथाजौ। धिया मनोता प्रथमा मनीषा।
दशस्वसारो अधिसानो अव्ये। मृजन्ति वह्निं सदनेष्वच्छ।। ५४६

56

1. പുരോജിതീ വോ അന്ധസഃ/ സുതായ മാദയിത്നവേ/
അപശ്വാനം ശ്ഞഥിഷ്ടന/ സഖായോ ദീർഘജിഹ്വ്യം/ 547
2. അയം പൂഷാരയിർഭഗഃ/ സോമഃ പുനാനോ അർഷതി/
പതിർവിശ്വസ്യ ഭൂമനഃ/ വ്യഖ്യദ്രോദസീ ഉഭേ/ 548
3. ആ ഹര്യതായ ധൃഷ്ണവേ/ ധനുഷ്ടന്വന്തി പൗംസ്യം/
ശുക്രാ വിയന്ത്യസുരായ നിർണിജേ/
വിപാമഗ്രേ മഹീ യുവഃ/ 549
4. പരിത്യം ഹര്യതം ഹരിം/ ബഭ്രും പുനന്തി വാരേണ/
യോ ദേവാന്വിശ്വം ഇത്പരി/ മദേന സഹ ഗച്ഛതി/ 550
5. സുതാസോ മധുമത്തമാഃ/ സോമാ ഇന്ദ്രായ മന്ദിനഃ/
പവിത്രവന്തോ അക്ഷരൻ/ ദേവാൻ ഗച്ഛന്തു വോ മദാഃ/ 551
6. സോമാഃ പവന്ത ഇന്ദവഃ/ അസ്മഭ്യം ഗാതുവിത്തമാഃ/
മിത്രാ സ്വാനാ അരേപസഃ/ സ്വാധ്യസ്വർവിദഃ/ 552
7. അഭീ നോ വാജസാതമം/ രയിമർഷ ശതസ്പൃഹം/
ഇന്ദോ സഹസ്രഭർണസം/ തുവിദ്യുമ്നം വിഭാസഹം/ 553
8. അഭീ നവന്തേ അദ്രുഹഃ/ പ്രിയമിന്ദ്രസ്യ കാമ്യം/
വത്സന്ന പൂർവ ആയുനി/ ജാതം രിഹന്തി മാതരഃ/ 554
9. പ്രസുന്വാനായാന്ധസഃ/ മർതോ ന വഷ്ട തദ്വചഃ/
അപശ്വാനമരാധസം/ ഹതാ മഖന്ന ഭൃഗവഃ/ 555

५६

१. पुरोजिती वो अन्धसः। सुताय मादयित्नवे।
अपश्वानं श्ञथिष्टन। सखायो दीर्घजिह्व्यम्।। ५४७
२. अयं पूषारयिर्भगः। सोमःपुनानो अर्षति।
पतिर्विश्वस्य भूमनः। व्यख्यद्रोदसी उभे।। ५४८
३. आ हर्यताय धृष्णवे। धनुष्टन्वन्ति पौंस्यम्।
शुक्रा वियन्त्यसुराय निर्णिजे। विपामग्रे मही युवः।। ५४९
४. परित्यं हर्यतं हरिम्। बभ्रुं पुनन्ति वारेण।
ये देवान्विश्वम् इत्परि। मदेन सह गच्छति।। ५५०
५. सुतासो मधुमत्तमः। सोमा इन्द्राय मन्दिनः।
पवित्रवन्तो अक्षरन।। देवान् गच्छन्तु वो मदाः।। ५५१
६. सोमाः पवन्त इन्दवः। अस्मभ्यङ्गातुवित्तमाः।
मित्रा स्वाना अरेपसः। स्वाध्यस्वर्विदः।। ५५२

७. अभि नो वाजसातमम्। रयिमर्ष शतस्पृहम्।
इन्दो सहस्रभर्णसम्। तु वि द्युम्नं विभासहम्।। ५५३
८. अभी नवन्ते अद्रुहः। प्रियमिन्द्रस्य काम्यम्।
वत्सन्न पूर्व आयुनि। जातं रिहन्ति मातरः।। ५५४
९. प्रसुन्वानायान्धसः। मर्तो न वष्ट तद्वचः।
अपश्वानमराधसम्। हता मखन्न भृगवः।। ५५५

57

1. അഭിപ്രിയാണി പവതേ ചനോഹിതഃ/
നാമാനി യഹ്വാ അധി യേഷു വർധതേ/
ആസൂര്യസ്യ ബൃഹതോ ബൃഹന്നധി/
രഥം വിഷ്വഞ്ചമരുഹദ്വിചക്ഷണഃ/ 556
2. അചോദസോ നോ ധന്വന്ത്വിന്ദവഃ/
പ്രസ്വാനാസോ ബൃഹദ്ദേവേഷു ഹരയഃ/
വിചിദശ്നാനാ ഇഷയോ അരാതയഃ/
അര്യോ നസ്സന്തു സനിഷന്തു നോ ധിയഃ/ 557
3. ഏഷ പ്രകോശേ മധുമം അചിക്രദത്/
ഇന്ദ്രസ്യ വജ്രോ വപുഷാം വപുഷ്ടമഃ/
അഭീമൃതസ്യ സുദുഘാ ഘൃതശ്ചുതഃ/
വാ ശ്രാ അർഷന്തി പയസാ ച ധേനവഃ/ 558
4. പ്രോ അയാസീദിന്ദുരിന്ദ്രസ്യ നിഷ്കൃതം/
സഖാ സഖ്യുർന പ്രമിനാതി സങ്ഗിരം/
മര്യ ഇവ യുവതിഭിസ്സമർഷതി/
സോമഃ കലശേ ശതയാമനാപഥാ/ 559
5. ധർതാ ദിവഃ പവതേ കൃത്വിയോ രസഃ/
ദക്ഷോ ദേവാനാമനുമാദ്യോ നൃഭിഃ/
ഹരിസ്സൃജാനോ അത്യോ ന സത്വഭിഃ/
വൃഥാ പാജാംസി കൃണുഷേ നദീഷ്വാ/ 560
6. വൃഷാ മതീനാം പവതേ വിചക്ഷണഃ/
സോമോ അഹ്നാം പ്രതരീതോഷസാന്ദിവഃ/
പ്രാണാ സിന്ധൂനാം കലശം അചിക്രദത്/
ഇന്ദ്രസ്യ ഹാർദ്യാവിശന്മനീഷിഭിഃ/ 561
7. അസാവി സോമോ അരുഷോ വൃഷാഹരിഃ/
രാജേവ ദസ്മോ അഭിഗാ അചിക്രദത്/
പുനാനോ വാരമത്യേഷ്യവ്യയം/
ശ്യേനോ ന യോനിം ഘൃതവന്തമാസദത്/ 562

8. പ്ര ദേവമച്ഛാ മധുമന്ത ഇന്ദവഃ/
അസിഷ്യദന്ത ഗാവ ആ ന ധേനവഃ/
ബർഹിഷദോ വചനാവന്ത ഊധഭിഃ/
പരിസ്രുതമുസ്രിയാ നിർണിജന്ധിരേ/ 563
9. ത്രിരസ്മൈ സപ്തധേനവോ ദുദുഹ്രിരേ/
സത്യാമാശിരം പരമേ വ്യോമനി/
ചത്വാര്യന്യാ ഭുവനാനി നിർണിജേ/
ചാരുണി ചക്രേ യദൃതൈരവർധത/ 564
10. ഇന്ദ്രായ സോമസുഷുതഃ പരിസ്രവ/
അപാമീവാ ഭവതു രക്ഷസാ സഹ/
മാ തേ രസസ്യ മത്സത ദ്വയാവിനഃ/
ദ്രവിണസ്വന്ത ഇഹ സന്ത്വിന്ദവഃ/ 565
11. അഞ്ജതേ വ്യഞ്ജതേ സമഞ്ജതേ/
ക്രതും രിഹന്തി മധ്വാഭ്യഞ്ജതേ/
സിന്ധോരുച്ഛ്വാസേ പതയന്തമുക്ഷണം/
ഹിരണ്യപാവാഃ പശുമപ്സു ഗൃഭ്ണതേ/ 566
12. പവിത്രന്തേ വിതതം ബ്രഹ്മണസ്പതേ/
പ്രഭുർഗാത്രാണി പര്യേഷി വിശ്വതഃ/
അതപ്തതനൂർന തദാമോ അശ്നുതേ/
ശൃതാസ ഇദ്വഹന്തസ്സ്തദാശത/ 567

५७

१. अभिप्रियाणि पवते चनोहितः। नामानि यह्वो अधि येषु वर्धते।
आसूर्यस्य बृहतो बृहन्नधि। रथं विष्वञ्चमरुहद्विचक्षणः।। ५५६
२. अचोदसो नो धन्वन्त्विन्दवः। प्रस्वानासो बृहद्देवेषु हरयः।
विचिदश्नाना इषयो अरातयः। अर्यो नस्सन्तु सनिषन्तु नो धियः।। ५५७
३. एष प्रकोशे मधुमम् अचिक्रदत्। इन्द्रस्य वज्रो वपुषां वपुष्टमः।
अभीमृतस्य सुदुघा घृतश्चुतः। वा श्रा अर्षन्ति पयसा च धेनवः।। ५५८
४. प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतम्। सखा सख्युर्न प्रमिनाति सङ्गिरम्।
मरिय इव युवतिभिस्समर्षति। सोमः कलशे शतयामनापथा।। ५५९
५. धर्ता दिवःपवते कृत्वियो रसः। दक्षो देवानामनुमाद्यो नृभिः।
हरिस्सृजानो अत्यो न सत्वभिः। वृथा पाजांसि कृणुषे नदीष्वा।। ५६०
६. वृषा मतीनां पवते विचक्षणः। सोमो अह्नां प्रतरीतोषसान्दिवः।
प्राणा सिन्धूनाङ्कलशम् अचिक्रदत्। इन्द्रस्य हार्द्याविशन्मनीषिभिः।। ५६१

७. असावि सोमो अरुषो वृषाहरिः। राजेव दस्मो अभिगा अचिक्रदत्।
पुनानो वारमत्येष्यव्ययम्। श्येनो न योनिङ्घृतवन्तमासदत्।। ५६२
८. प्र देवमच्छा मधुमन्त इन्दवः। असिष्यदन्त गाव आ न धेनवः।
बर्हिषदो वचनावन्त ऊधभिः। परिस्रुतमुस्रिया निर्णिजन्धिरे।। ५६३
९. त्रिरस्मै सप्तधेनवो ददुह्रिरे। सत्यामाशिरं परमे व्योमनि।
चत्वार्यन्या भुवनानि निर्णिजे। चारूणि चक्रे यदृतैरवर्धत।। ५६४
१०. इन्द्राय सोमसुषुतःपरिस्रव। अपामीवा भवतु रक्षसा सह।
मा ते रसस्य मत्सत द्वयाविनः। द्रविणस्वन्त इह सन्त्विन्दवः।। ५६५
११. अञ्जते व्यञ्जते समञ्जते। क्रतुं रिहन्ति मध्वाभ्यञ्जते।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणम्। हिरण्यपावाः पशुमप्सु गृभ्णते।। ५६६
१२. पवित्रन्ते विततं ब्रह्मणस्पते। प्रभुर्गात्राणि पर्येषि विश्वतः।
अतप्ततनूर्न तदामो अश्नुते। शृतास इद्वहन्तस्सन्तदा शत।। ५६७

58

1. ഇന്ദ്രമച്ഛ സുതാ ഇമേ/ വൃഷണയ്യന്തു ഹരയഃ/
ശ്രുഷ്ടേ ജാതാസ ഇന്ദവ സ്വർവിദഃ/ 568
2. പ്രധന്വാ സോമ ജാഗൃവിഃ/ ഇന്ദ്രായേന്ദോ പരിസ്രവ/
ദ്യുമന്തം ശുഷ്മമാഭരാ സ്വർവിദം/ 569
3. സഖായ ആ നിഷീദത/ പുനാനായ പ്രഗായത/
ശിശുന്നയജ്ഞൈഃ പരിഭൂഷതശ്രിയേ/ 570
4. തം വസ്സഖായോ മദായ/ പുനാനമഭിഗായത/
ശിശുന്നഹവ്യൈസ്സ്വദയന്ത ഗൂർതിഭിഃ/ 571
5. പ്രാണാ ശിശുർമഹീനാം/ ഹിന്വന്ന്യതസ്യ ദീധിതിം/
വിശ്വാ പരിപ്രിയാ ഭുവദധദ്രിതാ/ 572
6. പവസ്വ ദേവ വീതയേ/ ഇന്ദോ ധാരാഭിരോജസാ/
ആ കലശം മധുമാൻ സോമനസ്സദഃ/ 573
7. സോമഃ പുനാന ഊർമിണാ/ അവ്യം വാരം വിധാവതി/
അഗ്രേ വാചഃ പവമാനഃ കനിക്രദത്/ 574
8. പ്ര പുനാനായ വേധസേ/ സോമായ വച ഉച്യതേ/
ഭൃതിന്നഭരാമതിഭിർജുജോഷതേ/ 575
9. ഗോമന്ന ഇന്ദോ അശ്വവത്/ സുതസ്സുദക്ഷ ധനിവഃ/
ശുചിഞ്ച വർണമധിഗോഷു ധാരയ/ 576
10. അസ്മഭ്യന്ത്വാ വസുവിദം/ അഭിവാണീരനൂഷത/
ഗോഭിഷ്ടേ വർണമഭിവാസയാമസി/ 577

11. പവതേ ഹര്യതോഹരിഃ/ അതിഹ്വരാംസി രംഹ്യാ/
അഭ്യർഷസ്തോതൃഭ്യോ വീരവദ്യശഃ/ 578
12. പരികോശം മധുശ്ചുതം/ സോമഃ പുനാനോ അർഷതി/
അഭിവാണീരൃഷീണാം സപ്താനൂഷത/ 579

५८

१. इन्द्रमच्छ सुता इमे। वृषणय्यन्तु हरयः।
श्रुष्टे जातास इन्दव स्वर्विदः।। ५६८
२. प्र धन्वा सोम जागृविः। इन्द्रायेन्दो परिस्रव।
द्युमन्तं शुष्ममा भरा स्वर्विदम्।। ५६९
३. सखाय आ निषीदत। पुनानाय प्रगायत।
शिशुन्न यज्ञैःपरिभूषतश्रिये।। ५७०
४. तं वस्सखायो मदाय। पुनानमभिगायत।
शिशुन्न हव्यैस्स्वदयन्त गूर्तिभिः।। ५७१
५. प्राणा शिशुर्महीनाम्। हिन्वन्नृतस्य दीधितिम्।
विश्वा परिप्रिया भुवदधद्विता।। ५७२
६. पवस्व देव वीतये। इन्दो धाराभिरोजसा।
आ कलशं मधुमान् सोमनस्सदः।। ५७३
७. सोमःपुनान ऊर्मिणा। अव्यं वारं विधावति।
अग्रे वाचःपवमानः कनिक्रदत्।। ५७४
८. प्र पुनानाय वेधसे। सोमाय वच उच्यते।
भृतिन्न भरामतिभिर्जुजोषते।। ५७५
९. गोमन्न इन्दो अश्ववत्। सुतस्सुदक्ष धनिवः।
शुचिञ्च वर्णमधिगोषु धारय।। ५७६
१०. अस्मभ्यन्त्वा वसुविदम्। अभिवाणीरनूषत।
गोभिष्टे वर्णमभिवासयामसि।। ५७७
११. पवते हर्यतो हरिः। अतिह्वरांसि रंह्या।
अभ्यर्षस्तोतृभ्यो वीरवद्यशः।। ५७८
१२. परिकोशं मधुश्चुतम्। सोमः पुनानो अर्षति।
अभिवाणीरृषीणां सप्तानूषत।। ५७९

59

1. പവസ്വ മധുമത്തമഃ/
ഇന്ദ്രായ സോമ ക്രതുവിത്തമോ മദഃ/
മഹിദ്യുക്ഷതമോ മദഃ/ 580
2. അഭിദ്യുമ്നം ബൃഹദ്യശഃ/
ഇഷസ്പതേ ദിദീഹി ദേവ ദേവയും/
വികോശം മധ്യമയ്യുവ/ 581
3. ആസോതാ പരിഷിഞ്ജത/
അശ്വന്നസ്തോമമപ്തുരം/
രജസ്തുരം വനപ്രക്ഷമുദപ്രുതം/ 582
4. ഏതമുത്യമ്മദച്യുതം/
സഹസ്രധാരം വൃഷഭന്തിവോദുഹം/
വിശ്വാവസൂനി ബിഭ്രതം/ 583
5. സസുന്വേ യോ വസൂനാം/
യോ രായാമാനേതായ ഇഡാനാം/
സോമോ യസ്സുക്ഷിതീനാം/ 584
6. ത്വം ഹ്യാങ്ഗ ദൈവ്യ/
പവമാനജനിമാനി ദ്യുമത്തമഃ/
അമൃതത്വായ ഘോഷയൻ/ 585
7. ഏഷസ്യ ധാരയാ സുതഃ/
അവ്യാവാരേഭിഃ പവതേ മദിന്തമഃ/
ക്രീഡന്നൂർമിരപാമിവ/ 586
8. യ ഉസ്രിയാ അപി യാ അന്തരശ്മനി/
നിർഗാ അകൃന്തദോജസാ/
അഭിവ്രജന്തത്നിഷേ ഗവ്യമശ്വ്യം/
വർമീവ ധൃഷ്ണവാരുജ/ 587

പവമാനം കാണ്ഡം കഴിഞ്ഞു.

५९

१. पवस्व मधुमत्तमः। इन्द्राय सोम क्रतुवित्तमो मदः।
महि द्युक्षतमो मदः।। ५८०
२. अभिद्युम्नं बृहद्यशः। इषस्पते दिदीहि देव देवयुम्।
विकोशं मध्यमय्युव।। ५८१
३. आसोता परिषिञ्जत। अश्वन्नस्तोममप्तुरं रजस्तुरम्।
वनप्रक्षमुदप्रुतम्।। ५८२

४. एतमुत्यम्मदच्युतम्। सहस्रधारं वृषभन्दिवो दुहम्।
विश्वावसूनि बिभ्रतम्।। ५८३

५. ससुन्वे यो वसूनाम्। यो रायामानेताय इडानाम्।
सोमो यस्सुक्षितीनाम्।। ५८४

६. त्वं ह्याङ्ग दैव्य। पवमानजनिमानि द्युमत्तमः।
अमृतत्वाय घोषयन्।। ५८५

७. एषस्य धारया सुतः। अव्यावारेभिःपवते मदिन्तमः। क्रीडन्नूर्मिरपामिव।। ५८६

८. य उस्रिया अपि या अन्तरश्मनि। निर्गा अकृन्तदोजसा।
अभिव्रजन्तत्निषे गव्यमश्व्यम्। वर्मीव धृष्णवारुज। ५८७

पवमानं काण्डं समाप्तम्।

കാണ്ഡം 4 - ദ്വാദശാഹം

काण्डम् - ४ - द्वादशाहम्।

60

1. നമഃ പിതൃഭ്യഃ പൂർവസദ്ഭ്യഃ/ നമസ്സാകന്നിഷദ്ഭ്യഃ/
   യുഞ്ജേ വാചം ശതപദീം/ 588
2. ഗായേ സഹസ്രവർതനിം/ ഗായത്രത്രൈഷ്ടുഭഞ്ജഗത്/
   വിശ്വാരൂപാണി സംഭൃതം/ ദേവാ ഓകാംസി ചക്രിരേ/ 589
3. ഉപാസ്മൈ ഗായതാ നരഃ/ പവമാനായേന്ദവേ/
   അഭിദേവം ഇയക്ഷതേ/ 59
4. അഭി തേ മധുനാ പയഃ/ അഥർവാണോ അശിശ്രയുഃ/
   ദേവന്ദേവായ ദേവയും/ 591
5. സ നഃ പവസ്വ ശങ്ഗവേ/ ശഞ്ജനായ ശമർവതേ/
   ശം രാജന്നോഷധീഭ്യഃ/ 592
6. ദവിദ്യുതത്യാ രുചാ/ പരിഷ്ടോഭന്ത്യാ കൃപാ/
   സോമാശ്ശുക്രാ ഗവാശിരഃ/ 593
7. ഹിന്വാനോ ഹേതൃഭിർഹിതഃ/ ആ വാജം വാജ്യക്രമീത്/
   സീദന്തോ വനുഷോ യഥാ/ 594
8. ഋധക്സോമ സ്വസ്തയേ/ സഞ്ജഗ്മാനോ ദിവാ കവേ/
   പവസ്വ സൂര്യോ ദൃശേ/ 595
9. പവമാനസ്യ തേ കവേ/ വാജിൻ സർഗാ അസൃക്ഷത/
   അർവന്തോ ന ശ്രവസ്യവഃ/ 596
10. അച്ഛാ കോശം മധുശ്ചുതം/ അസൃഗ്രം വാരേ അവ്യയേ/
    അവാവശന്തധീതയഃ/ 597
11. അച്ഛാ സമുദ്രമിന്ദവഃ/ അസ്തങ്ഗാവോ ന ധേനവഃ/
    അഗ്മന്നൃതസ്യ യോനിമാ/ 598

६०

१. नमःपितृभ्यःपूर्वसत्भ्यः। नमस्साकन्निषत्भ्यः। युञ्जे वाचं शतपदीम्।। ५८८
२. गाये सहस्रवर्तनीम्। गायत्रन्त्रैष्टुभञ्जगत्।
   विश्वारूपाणि संभृतम्। देवा ओकांसि चक्रिरे।। ५८९
३. उपास्मै गायता नरः। पवमानायेन्दवे। अभिदेवम् इयक्षते।। ५९०
४. अभि ते मधुना पयः। अथर्वाणो अशिश्रयुः। देवन्देवाय देवयुम्।। ५९१
५. स नःपवस्व शङ्गवे। शञ्जनाय शमर्वते। शं राजन्नोषधीभ्यः।। ५९२

६. दविद्युतत्या रुचा। परिष्टोभन्त्या कृपा। सोमाश्शुक्रा गवाशिरः।। ५९३
७. हिन्वानो हेतृभिर्हितः। आ वाजं वाज्यक्रमीत्। सीदन्तो वनुषो यथा।। ५९४
८. ऋधक्सोम स्वस्तये। सञ्जग्मानो दिवा कवे। पवस्व सूर्यो दृशे।। ५९५
९. पवमानस्य ते कवे। वाजिन् सर्गा असृक्षत। अर्वन्तो न श्रवस्यवः।। ५९६
१०. अच्छा कोशं मधुश्चुतम्। असृग्रं वारे अव्यये। अवावशन्तधीतयः।। ५९७
११. अच्छा समुद्रमिन्दवः। अस्तङ्गावो न धेनवः। अग्मन्नृतस्य योनिमा।। ५९८

61

1. അഗ്ന ആയാഹി വീതയേ/ ഗൃണാനോ ഹവ്യദാതയേ/
നിഹോതാ സത്സി ബർഹിഷി/ 598
2. തന്ത്വാ സമിദ്ഭിരങ്ഗിരഃ/ ഘൃതേന വർധയാമസി/
ബൃഹച്ഛോചാ യവിഷ്ഠ്യ/ 600
3. സ നഃ പൃഥുശ്രവായ്യം/ അച്ഛാ ദേവവിവാസതി/
ബൃഹദഗ്നേ സുവീര്യം/ 601
4. ആ നോ മിത്രാ വരുണാ/ ഘൃതൈർഗവ്യൂതിമുക്ഷതം/
മധ്വാ രജാംസി സുക്രതൂ/ 602
5. ഉരുശംസാ നമോവൃധാ/ മഹനാ ദക്ഷസ്യ രാജഥഃ/
ദ്രാഘിഷ്ഠാഭിശ്ശുചിവ്രതാ/ 603
6. ഗൃണാനാ ജമദഗ്നിനാ/ യോനാവൃതസ്യ സീദതം/
പാതം സോമമൃതാവൃധാ/ 604
7. ആയാഹി സുഷുമാഹിതേ/ ഇന്ദ്ര സോമം പിബാ ഇമം/
ഏദം ബർഹിസ്സദോ മമ/ 605
8. ആ ത്വാ ബ്രഹ്മയുജാ ഹരീ/ വഹതാമിന്ദ്രകേശിനാ/
ഉപബ്രഹ്മാണി ന ശൃണു/ 606
9. ബ്രഹ്മാണസ്ത്വാ യുജാ വയം/ സോമപാമിന്ദ്ര സോമിനഃ/
സുതാവന്തോ ഹവാമഹേ/ 607
10. ഇന്ദ്രാഗ്നീ ആഗതം സുതം/ ഗീർഭിർനഭോ വരേണ്യം/
അസ്യ പാതന്ധിയേഷിതാ/ 608
11. ഇന്ദ്രാഗ്നീ ജരിതുസ്സചാ/ യജ്ഞോ ജിഗാതി ചേതനഃ/
അയാ പാതമിമം സുതം/ 609
12. ഇന്ദ്രമഗ്നിം കവിച്ഛദാ/ യജ്ഞസ്യ ജൂത്യാവൃണേ/
താ സോമസ്യേഹ തൃമ്പതാം/ 610

६१

१. अग्न आयाहि वीतये। गृणानो हव्यदातये। निहोता सत्सि बर्हिषि।। ५९९
२. तन्त्वा समिद्भिरङ्गिरः। घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य।। ६००

३. स नः पृथुश्रवाय्यम्। अच्छा देवविवासति। बृहदग्ने सुवीर्यम्।। ६०१
४. आ नो मित्रा वरुणा। घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू।। ६०२
५. उरुशंसो नमोवृधा। मह्ना दक्षस्य राजथः। द्राघिष्ठाभिश्शुचिव्रता।। ६०३
६. गृणाना जमदग्निना। योनावृतस्य सीदतम्। पातं सोममृतावृधा।। ६०४
७. आयाहि सुषुमाहिते। इन्द्र सोमं पिबा इमम्। एदं बर्हिस्सदो मम।। ६०५
८. आ त्वा ब्रह्मयुजाहरी। वहतामिन्द्रकेशिना। उपब्रह्माणि नश्शृणु। ६०६
९. ब्रह्माणस्त्वा युजा वयम्। सोमपामिन्द्र सोमिनः। सुतावन्तो हवामहे।। ६०७
१०. इन्द्राग्नी आगतं सुतम्। गीर्भिर्नभो वरेण्यम्। अस्य पातन्धियेषिता।। ६०८
११. इन्द्राग्नीजरितुस्सचा। यज्ञो जिगाति चेतनः। अया पातमिमं सुतम्।। ६०९
१२. इन्द्रमग्निं कविच्छदा। यज्ञस्य जूत्यावृणे। ता सोमस्येह तृम्पताम्।। ६१०

62

1. ഉച്ചാ തേ ജാതമന്ധസാ/ ദിവി സദ്ഭൂമ്യാദദേ/
ഉഗ്രം ശർമ മഹിശ്രവഃ/ 611
2. സ ന ഇന്ദ്രായ യജ്യവേ/ വരുണായ മരുദ്ഭ്യഃ/
വരിവോവിത്പരിസ്രവ/ 612
3. ഏനാ വിശ്വാന്യർയ ആ/ ദ്യുമ്നാനി മാനുഷാണാം/
സിഷാസന്തോ വനാമഹേ/ 613
4. പുനാനസ്സോമധാരയാ/ അപോ വസാനോ അർഷസി/
ആ രത്നധാ യോനിമൃതസ്യ സീദസി /
ഉത്സോ ദേവോ ഹിരണ്യയാ/ 614
5. ദുഹാന ഊധർദിവ്യം മധുപ്രിയം/ പ്രത്നം സധസ്ഥമാസദത്/
ആ പൃച്ഛ്യന്ധരുണം വാജ്യർഷസി/നൃഭിർധൗതോ വിചക്ഷണഃ/ 615
6. പ്ര തുദ്രവ പരികോശന്നിഷീദ/ നൃഭിഃ പുനാനോ അഭിവാജമർഷ/
അശ്വന്നത്യാ വാജിനമ്മർജയന്തേ/
അച്ഛാ ബർഹീരശനാഭിർനയന്തേ/ 616
7. സ്വായുധഃ പവതേ ദേവ ഇന്ദുഃ/
അശസ്തിഹാ വൃജനാ രക്ഷമാണഃ/
പിതാ ദേവാനാഞ്ജനിതാ സുദക്ഷഃ/
വിഷ്ടംഭോ ദിവോ ധരുണഃ പൃഥിവ്യാഃ/ 617
8. ഋഷിർവിപ്രഃ പുര ഏതാ ജനാനാം/
ഋഭുർധീര ഉശനാ കാവ്യേന/
സചിദ്വിവേദ നിഹിതയ്യദാസാം/
അപീച്യാങ്ഗുഹ്യന്നാമ ഗോനാം/ 618

६२

१. उच्चा ते जातमन्धसा। दिवि सत्भूम्याददे। उग्रं शर्म महिश्रवः।। ६११
२. स न इन्द्राय यज्यवे। वरुणाय मरुत्भ्यः। वरिवोवित्परिस्रव।। ६१२
३. एना विश्वान्यर्य आ। द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे।। ६१३
४. पुनानस्सोमधारया। अपोवसानो अर्षसि।
आ रत्नधा योनिमृतस्य सीदसि। उत्सो देवो हिरण्यया।। ६१४
५. दुहान ऊधर्दिव्यं मधुप्रियम्। प्रत्नं सधस्थमासदत्।
आ पृच्छ्यन्धरुणं वाज्यर्षसि। नृभिर्धौतो विचक्षणः।। ६१५
६. प्र तुद्रव परिकोशन्निषीद। नृभिःपुनानो अभिवाजमर्ष।
अश्वन्नत्वा वाजिनम्मर्जयन्ते। अच्छा बर्हीरशनाभिर्नयन्ते।। ६१६
७. स्वायुधःपवते देव इन्दुः। अशस्तिहा वृजना रक्षमाणः।
पिता देवानाञ्जनिता सुदक्षः। विष्टंम्भो दिवो धरुणःपृथिव्याः।। ६१७
८. ऋषिर्विप्रःपुर एता जनानाम्। ऋभुर्धीर उशना काव्येन।
सचिद्विवेद निहितय्यदासाम् । अपीच्याङ्गुह्यन्नाम गोनाम्।। ६१८

63

1. അഭിത്യാ ശൂര നോ നുമഃ/ അദുഗ്ധാ ഇവ ധേനവഃ/
ഈശാനമസ്യ ജഗതസ്പർദൃശം/ഈശാനമിന്ദ്ര തസ്ഥുഷഃ/ 619
2. നത്വാ വം അന്യോ ദിവ്യോ ന പാർഥിവഃ/ ന ജാതോ ന ജനിഷ്യതേ/
അശ്വായന്തോ മഘവന്നിന്ദ്രവാജിനഃ/ ഗവ്യന്തസ്ത്വാ ഹവാമഹേ/ 620
3. കയാനശ്ചിത്ര ആഭുവത്/ ഊതിസ്സദാവൃധസ്സഖാ/
കയാശചിഷ്ഠയാ വൃതഃ/ 621
4. കസ്ത്വാസത്യോ മദാനാം/ മംഹിഷ്ഠോ മത്സദന്ധസഃ/
ദൃഢാചിദാരുജേവസു/ 622
5. അഭീഷുണസ്സഖീനാം/ അവിതാ ജരിതൃണാം/
ശതം ഭവാസ്യൂതയേ/ 623
6. തം വോ ദസ്മമൃതീഷഹം/ വസോർമന്ദാനമന്ധസാ/
അഭിവത്സന്ന സ്വസരേഷു ധേനവഃ/ ഇന്ദ്രങ്ഗീർഭിർനവാമഹേ/ 624
7. ദ്യുക്ഷം സുദാനുന്തവിഷീഭിരാവൃതം/ ഗിരിന്ന പുരുഭോജസം/
ക്ഷുമന്തം വാജം ശതിനം സഹസ്രിണം/ മക്ഷൂ ഗോമന്തമീമഹേ/ 625
8. തരോഭിർവോ വിദദ്വസും/ ഇന്ദ്രം സബാധ ഊതയേ/
ബൃഹദ്ഗായന്തസ്സുതസോമേ അധ്വരേ/
ഹുവേ ഭരന്നകാരിണം/ 626

9. ന യന്ദുധ്രാവരന്തേ നസ്ഥിരാമുരഃ/ മദേഷു ശിപ്രമന്ധസഃ/
യ ആദൃത്യാ ശശമാനായ സുന്വതേ/ ദാതാ ജരിത്ര ഉക്ഥ്യം/ 627

६३

१. अभित्वा शूर नो नुमः। अदुग्धा इव धेनवः।
ईशानमस्य जगतस्वर्दृशम्। ईशानमिन्द्र तस्थुषः।। ६१९

२. नत्वा वम् अन्यो दिव्यो न पार्थिवः। न जातो न जनिष्यते।
अश्वायन्तो मघवन्निन्द्रवाजिनः। गव्यन्तस्त्वा हवामहे।। ६२०

३. कयानश्चित्र आभुवत्। ऊतिस्सदावृधस्सखा। कयाशचिष्ठया वृतः।। ६२१

४. कस्त्वासत्यो मदानाम्। मंहिष्ठो मत्सदन्धसः। दृढाचिदारुजेवसु।। ६२२

५. अभीषुणस्सखीनाम्। अविता जरितॄणाम्। शतं भवास्यूतये।। ६२३

६. तंवो दस्ममृतीषहम्। वसोर्मन्दानमन्धसा।
अभिवत्सन्न स्वसरेषु धेनवः। इन्द्रङ्गीर्भिर्नवामहे।। ६२४

७. द्युक्षं सुदानुन्तविषीभिरावृतम्। गिरिन्न पुरुभोजसम्।
क्षुमन्तं वाजं शतिनं सहस्रिणम्। मक्षू गोमन्तमीमहे।। ६२५

८. तरोभिर्वो विदद्वसुम्। इन्द्रं सबाध ऊतये।
बृहद्गायन्तस्सुतसोमे अध्वरे। हुवे भरन्नकारिणम्।। ६२६

९. न यन्दुध्रावरन्तें नस्थिरामुरः। मदेषु शिप्रमन्धसः।
य आदृत्या शशमानाय सुन्वते। दाता जरित्र उक्थ्यम्।। ६२७

64

1. സ്വാദിഷ്ഠയാ മദിഷ്ഠയാ/ പവസ്വ സോമധാരയാ/
ഇന്ദ്രായ പാതവേ സുതഃ/ 628

2. രക്ഷോഹാ വിശ്വചർഷണിഃ/ അഭി യോനിമയോ ഹതേ/
ദ്രോണേ സധസ്ഥമാസദത്/ 629

3. വരിവോ ധാതമോ ഭുവഃ/ മംഹിഷ്ഠോ വൃത്രഹന്തമഃ/
പർഷിരാധോ മഘോനാം/ 630

4. അയാ പവസ്വ ദേവയുഃ/ രേഭൻ പവിത്രം പര്യേഷി വിശ്വതഃ/
മധോർധാരാ അസൃക്ഷത/ 631

5. പവതേ ഹര്യതോ ഹരിഃ/ അതിഹ്വരാംസി രംഹ്യാ/
അഭ്യർഷസ്തോതൃഭ്യോ വീരവദ്യശഃ/ 632

6. പുരോജിതീവോ അന്ധസഃ/ സുതായ മാദയിത്നവേ/
അപശ്യാനം ശ്ഞഥിഷ്ടന/സഖായോ ദീർഘജിഹ്വ്യം/ 633

7. യോ ധാരയാ പാവകയാ/പരിപ്രസ്യന്ദതേ സുതഃ/
ഇന്ദുരശ്വോ ന കൃത്വിയഃ/ 634
8. തന്ദുരോഷമഭീനരഃ/ സോമം വിശ്വാച്യാധിയാ/
യജ്ഞായ സന്ത്വദ്രയഃ/ 635
9. അഭിപ്രിയാണി പവതേ ചനോഹിതഃ/
നാമാനി യഹ്വോ അധി യേഷു വർധതേ/
ആസൂര്യസ്യ ബൃഹതോ ബൃഹന്നധി/
രഥം വിശ്വഞ്ചമരുഹദ്വിചക്ഷണഃ/ 636
10. ഋതസ്യ ജിഹ്വാ പവതേ മധുപ്രിയം/
വക്താ പതിർധിയോ അസ്യാ അദാഭ്യഃ/
ദധാതി പുത്രഃ പിത്രോരപീച്യം/
നാമ തൃതീയമധിരോചനന്ദിവഃ/ 637
11. അവദ്യുതാനഃ കലശം അചിക്രദത്/
നൃഭിർയ്യമാണഃ കോശ ആ ഹിരണ്യയീ/
അധി ത്രിപൃഷ്ഠ ഉഷസോ വിരാജസി/ 638
12. യജ്ഞാ യജ്ഞാ വോ അഗ്നയേ/ ഗിരാ ഗിരാ ച ദക്ഷസേ/
പ്ര പ്രവയമമൃതഞ്ജാതവേദസം/പ്രിയം മിത്രന്ന ശംസിഷം/ 639
13. ഊർജോ ന പാതം സഹിനായമസ്മയുഃ/ ദാശേമ ഹവ്യദാതയേ/
ഭുവദ്വാജേഷ്വവിതാ ഭുവദ്വൃധഃ/ ഉത ത്രാതാ തനൂനാം/ 640

६४

१. स्वादिष्ठया मदिष्ठया। पवस्व सोमधारया। इन्द्राय पातवे सुतः।। ६२८
२. रक्षोहा विश्वचर्षणिः। अभि योनिमयो हते। द्रोणे सधस्थमासदत्।। ६२९
३. वरिवो धातमो भुवः। मंहिष्ठो वृत्रहन्तमः। पर्षिराधो मघोनाम्।। ६३०
४. अया पवस्व देवयुः। रेभन् पवित्रं पर्येषि विश्वतः। मधोर्धारा असृक्षत।। ६३१
५. पवते हर्यतो हरिः। अतिह्वरांसि रंह्या। अभ्यर्षस्तोतृभ्यो वीरवद्यशः।। ६३२
६. पुरोजितीवो अन्धसः। सुताय मादयित्नवे।
अपश्वानं श्नथिष्टन। सखायो दीर्घजिह्व्यम्।। ६३३
७. यो धारया पावकया। परिप्रस्यन्दते सुतः। इन्दुरश्वो न कृत्वियः।। ६३४
८. तन्दुरोषमभीनरः सोमं विश्वाच्याधिया। यज्ञाय सन्त्वद्रयः।। ६३५
९. अभिप्रियाणि पवते चनोहितः। नामानि यह्वो अधि येषु वर्धते।
आसूर्यस्य बृहतो बृहन्नधि। रथं विश्वञ्च मरुहद्विचक्षणः।। ६३६
१०. ऋतस्य जिह्वा पवते मधुप्रियम्। वक्ता पतिर्धियो अस्या अदाभ्यः।
दधाति पुत्रःपित्रोरपीच्यम्। नाम तृतीयमधिरोचनन्दिवः।। ६३७

११. अवद्युतानः कलशं अचिक्रदत्। नृभिर्येमाणः कोश आ हिरण्ययी।
अभी ऋतस्य दोहना अनूषत। अधि त्रिपृष्ठ उषसो विराजसि।। ६३८
१२. यज्ञा यज्ञा वो अग्नये। गिरा गिरा च दक्षसे।
प्र प्रवयममृतञ्जातवेदसम्। प्रियं मित्रन्न शंसिषम्।। ६३९
१३. ऊर्जो न पातं सहिनायमस्मयुः। दाशेम हव्यदातये।
भुवद्वाजेष्वविता भुवद्वृधः। उत त्राता तनूनाम्।। ६४०

1. ഏഹ്യൂഷു ബ്രവാണി തേ/ അഗ്ന ഇത്ഥേതരാ ഗിരഃ/
ഏഭിർവർധാസ ഇന്ദുഭിഃ/ 641
2. യത്ര ക്വ ച തേ മനഃ/ ദക്ഷന്ദധസ ഉത്തരം/
തത്രാ യോനിങ്കൃണവസേ/ 642
3. ന ഹി തേ പൂർതമക്ഷിപത്/ ഭുവന്നേമാനാപതേ/
അഥാ ദുവോ വനവസേ/ 643
4. വയമുത്വാമപൂർവ്യ/ സ്ഥൂരന്നകച്ചിദ് ഭരന്തോ/വസ്യവഃ/
വജ്രീംശ്ചിത്രം ഹവാമഹേ/ 644
5. ഉപ ത്വാ കർമന്നൂതയേ സനോ ഷ്ണുവാ/ ഉഗ്രശ്ചക്രാമ യോ ധൃഷത്/
ത്വാമിദ്ധ്യവിതാരം വവൃമഹേ/ സഖായ ഇന്ദ്ര സാനസിം/ 645
6. അധാ ഹീന്ദ്ര ഗിർവണഃ/ ഉപ ത്വാ കാമ ഈമഹേ സസൃഗ്മഹേ/
ഉദേവ ഗ്മന്ത ഉദഭിഃ/ 646
7. വാർണത്വായവ്യാഭിഃ/ വർധന്തി ശൂര ബ്രഹ്മാണി/
വാവൃധ്വാംസഞ്ചിദദ്രിവോ ദിവേ ദിവേ/ 647
8. യുഞ്ജന്തിഹരീ ഇഷിരസ്യ ഗാഥയാ/
ഉരൗ രഥ ഉരു യുഗേ വചോ യുജാ/ ഇന്ദ്ര വാഹാ സ്വർവിദാ/ 648
9. ഇന്ദ്ര ജുഷസ്വ പ്രവഹ/ ആ യാഹി ശൂര ഹരിഹ/
പിബാ സുതസ്യ മതിർന/ മധോശ്ചകാനശ്ചാരുർമദായ/ 649
10. ഇന്ദ്ര ജഠരന്നവ്യന്ന/ പൃണസ്വ മധോർദിവോന/
അസ്യ സുതസ്യ സ്വാർണ/ ഉപ ത്വാ മദാസ്സുവാചോ അസ്ഥുഃ/ 650
11. ഇന്ദ്രസ്തുരാഷാൺമിത്രോ ന/ ജഘാന വൃത്രയ്യതിർന/
ബിഭേദ ബലം ഭൃഗുർന/ സസാഹേ ശത്രൂൻ മദേ സോമസ്യ/ 651

१. एह्यूषु ब्रवाणि ते। अग्न इत्थेतरा गिरः। एभिर्वर्धास इन्दुभिः।। ६४१
२. यत्र क्व च ते मनः। दक्षन्दधस उत्तरम्। तत्रा योनिङ्कृणवसे।। ६४२
३. न हि ते पूर्तमक्षिपत्। भुवन्नेमानां पते। अथा दुवो वनवसे।। ६४३

४. वयमुत्वाम पूर्व्य। स्थूरन्नकच्चित्भरन्तोऽवस्यवः। वज्रींश्चित्रं हवामहे।। ६४४
५. उप त्वा कर्मन्नूतये सनो युवा। उग्रश्चक्राम यो धृषत्।
त्वामिद्ध्यवितारं ववृमहे। सखाय इन्द्र सानसिम्।। ६४५
६. अधा हीन्द्र गिर्वणः। उप त्वा काम ईमहे ससृग्महे।
उदेव ग्मन्त उदभिः।। ६४६
७. वार्णत्वायव्याभिः। वर्धन्ति शूर ब्रह्माणि। वावृध्वांसञ्चिदद्रिवो दिवे दिवे।। ६४७
८. युञ्जन्ति हरी इषिरस्य गाथया। उरौ रथ उरु युगे वचो युजा।
इन्द्र वाहा स्वर्विदा।। ६४८
९. इन्द्र जुषस्व प्रवह। आ याहि शूर हरिह।
पिबा सुतस्य मतिर्न। मधोश्चकानश्चारुर्मदाय।। ६४९
१०. इन्द्र जठरन्नव्यन्न। पृणस्व मधोर्दिवोन।
अस्य सुतस्य स्वार्ण। उप त्वा मदास्सुवाचो अस्थुः।। ६५०
११. इन्द्रस्तुराषाण्मित्रो न। जघान वृत्रय्यतिर्न।
बिभेद बलं भृगुर्न। ससाहे शत्रून् मदे सोमस्य।। ६५१

1. പാന്തമാവോ അന്ധസഃ/ ഇന്ദ്രമഭിപ്രഗായത/
വിശ്വാസാഹം ശതക്രതും/ മംഹിഷ്ഠഞ്ചർഷണീനാം/ 652
2. പുരുഹൂതം പുരുഷ്ടുതം/ ഗാഥാന്യാം സനശ്രുതം/
ഇന്ദ്ര ഇതി ബ്രവീനത/ 653
3. ഇന്ദ്ര ഇന്നോ മഹോനാം/ ദാതാവാജാനാന്പൃതുഃ/
മഹം അഭിജ്ഞുവായമത്/ 654
4. പ്ര വ ഇന്ദ്രായ മാദനം/ ഹര്യശ്വായ ഗായത/
സഖായസ്സോമ പാവ്നേ/ 655
5. ശംസേദുക്ഥം സുദാനവേ/ ഉതദ്യുക്ഷയ്യഥാ നരഃ/
ചകൃമാ സത്യരാധസേ/ 656
6. ത്വ ന്ന ഇന്ദ്ര വാജയുഃ/ ത്വങ്ഗവ്യുശ്ശതക്രതോ/
ത്വം ഹിരണ്യയുർവസോ/ 657
7. വയമുത്വാ തദിദർഥാഃ/ ഇന്ദ്രത്വായന്തസ്സഖായഃ/
കണ്വാ ഉക്ഥേഭിർജരന്തേ/ 658
8. നഘേമന്യദാപപന/ വജ്രിന്നപസോനവിഷ്ടൗ/
തവേദുസ്തോമൈശ്ചികേത/ 659
9. ഇച്ഛന്തി ദേവാസ്സുന്വന്തം/ ന സ്വപ്നായ സ്പൃഹയന്തി/
യന്തി പ്രമാദമതന്ദ്രാഃ/ 660

10. ഇന്ദ്രായ മദ്വനേ സുതം/ പരിഷ്ടോഭന്തു നോ ഗിരഃ/
അർകമർചന്തു കാരവഃ/ 661
11. യസ്മിന്വിശ്വാ അധിശ്രിയഃ/ രണന്തി സപ്ത സംസദഃ/
ഇന്ദ്രം സുതേ ഹവാമഹേ/ 662
12. ത്രികദ്രുകേഷു ചേതനം/ ദേവാസോ യജ്ഞമത്നത/
തമിദ്വർധന്തു നോ ഗിരഃ/ 663

६६

१. पान्तमावो अन्धसः। इन्द्रमभिप्रगायत।
विश्वासाहं शतक्रतुम्। मंहिष्ठञ्चर्षणीनाम्।। ६५२
२. पुरुहूतम्पुरुष्टुतम्। गाथान्यां सनश्रुतम्। इन्द्र इति ब्रवीनत।। ६५३
३. इन्द्र इन्नो महोनाम्। दातावाजानान्नृतुः। महम् अभिज्ञुवायमत्।। ६५४
४. प्र व इन्द्राय मादनम्। हर्यश्वाय गायत। सखायस्सोम पाव्ने।। ६५५
५. शंसेदुक्थं सुदानवे। उतद्युक्षय्यथा नरः। चकृमा सत्यराधसे।। ६५६
६. त्वन्न इन्द्र वाजयुः। त्वङ्गव्युश्शतक्रतो। त्वं हिरण्ययुर्वसो।। ६५७
७. वयमुत्वा तदिदर्थाः। इन्द्रत्वायन्तस्सखायः। कण्वा उक्थेभिर्जरन्ते।। ६५८
८. नघेमन्यदापपन। वज्रिन्नपसोनविष्टौ। तवेदुस्तोमैश्चिकेत।। ६५९
९. इच्छन्ति देवास्सुन्वन्तम्। न स्वप्नाय स्पृहयन्ति। यन्ति प्रमादमतन्द्राः।। ६६०
१०. इन्द्राय मद्वने सुतम्। परिष्टोभन्तु नो गिरः। अर्कमर्चन्तु कारवः।। ६६१
११. यस्मिन्विश्वा अधिश्रियः। रणन्ति सप्त संसदः। इन्द्रं सुते हवामहे।। ६६२
१२. त्रिकद्रुकेषु चेतनम्। देवासो यज्ञमत्नत। तमिद्वर्धन्तु नो गिरः।। ६६३

67

1. അയന്ത ഇന്ദ്ര സോമഃ/ നിപൂതോ അധി ബർഹിഷി/
ഏഹീമസ്യ ദ്രവാ പിബ/ 664
2. ശാചി ഗോ ശാചി പൂജന/ അയം രണായ തേ സുതഃ/
ആഖണ്ഡല പ്ര ഹൂയസേ/ 665
3. യസ്തേ ശൃങ്ഗവൃഷോണപാത്/ പ്രണപാത്കുണ്ഡപായ്യഃ/
ന്യസ്മിന്ദധ്ര ആ മനഃ/ 666
4. ആ തൂ ന ഇന്ദ്ര ക്ഷുമന്തം/ ചിത്രങ്ഗ്രാഭം സങ്ഗൃഭായ/
മഹാഹസ്തീ ദക്ഷിണേന/ 667
5. വിദ്മാ ഹിത്വാ തുവികൂർമിം/ തുവിദേഷ്ണന്തുവീമഘം/
തുവിമാത്രമവോഭിഃ/ 668
6. ന ഹി ത്വാ ശൂരദേവാഃ/ന മർതാസോ ദിത്സന്തം/
ഭീമന്നഗാം വാരയന്തേ/ 669

7. അഭി ത്വാ വൃഷഭാ സുതേ/ സുതം സൃജാമി പീതയേ/
തൃംപാ വ്യശ്ഞുഹീ മദം/ 670
8. മാ ത്വാ മൂരാ അവിഷ്യവഃ/ മോപഹസ്വാന ആദഭൻ/
മാ കീം ബ്രഹ്മദ്വിഷം വനഃ/ 671
9. ഇഹ ത്വാ ഗോ പരീണസം/ മഹേ മന്ദന്തു രാധസേ/
സരോ ഗൗരോ യഥാ പിബ/ 672
10. ഇദം വസോ സുതമന്ധഃ/ പിബാ സുപൂർണമുദരം/
അനാഭയിന്നരിമാ തേ/ 673
11. നൃഭിർധൗതസ്സുതോ അശ്ഞൈഃ/ അവ്യാവാരൈഃപരിപൂതഃ/
അശ്വാ നനിക്തോ നദീഷു/ 674
12. തന്തേ യവയ്യഥാ ഗോഭിഃ/ സ്വാദുമകർമ ശ്രീണന്തഃ/
ഇന്ദ്ര ത്വാസ്മിൻ സധമാദേ/ 675

६७

१. अयन्त इन्द्र सोमः। निपूतो अधि बर्हिषि। एहीमस्य द्रवा पिब।। ६६४
२. शाचि गो शाचि पूजन। अयं रणाय ते सुतः। आखण्डल प्र हूयसे।। ६६५
३. यस्ते शृङ्गवृषो णपात्। प्रणपात्कुण्डपाय्यः। न्यस्मिन्दध्र आ मनः।। ६६६
४. आ तू न इन्द्र क्षुमन्तम्। चित्रङ्ग्राभं सङ्गृभाय। महाहस्ती दक्षिणेन। ६६७
५. विद्मा हित्वा तुविकूर्मिम्। तुविदेष्णन्तुवूमघम्। तुविमात्रमवोभिः।। ६६८
६. न हि त्वा शूरदेवाः। न मर्तासो दित्सन्तम्। भीमन्नगां वारयन्ते।। ६६९
७. अभि त्वा वृषभा सुते। सुतं सृजामि पीतये। तृम्पा व्यश्नुही मदम्।। ६७०
८. मा त्वा मूरा अविष्यवः। मोपहस्वान आदभन्। मा कीं ब्रह्मद्विषं वनः।। ६७१
९. इह त्वा गो परीणसम्। महे मन्दन्तु राधसे। सरो गौरो यथा पिब।। ६७२
१०. इदं वसो सुतमन्धः। पिबा सुपूर्णमुदरम्। अनाभयिन्नरिमा ते।। ६७३
११. नृभिर्धौतस्सुतो अश्नैः। अव्यावारैःपरिपूतः। अश्वो ननिक्तो नदीषु।। ६७४
१२. तन्त्ते यवय्यथा गोभिः। स्वादुमकर्म श्रीणन्तः। इन्द्र त्वास्मिन्सधमादे।। ६७५

68

1. ഇദം ഹ്യന്വോജസാ/ സുതം രാധാനാം പതേ/
പിബാ ത്വാസ്യ ഗിർവണഃ/ 676
2. പ്ര തേ അശ്ഞോതു കുക്ഷ്യോഃ/ പ്രേന്ദ്ര ബ്രഹ്മണാ ശിരഃ/
പ്ര ബാഹൂ ശൂര രാധസാ/ 677
3. യസ്തേ അനുസ്വധാമസത്/ സുതേ നിയച്ഛ തന്വം/
സ ത്വാ മമത്തു സോമ്യ/ 678

4. ആ ത്വേതാ നിഷീദത/ ഇന്ദ്രമഭിപ്രഗായത/
സഖായസ്തോമവാഹസഃ/ 679
5. പുരൂതമം പുരൂണാം/ ഈശാനാം വാര്യാണാം/
ഇന്ദ്രം സോമേ സചാ സുതേ/ 680
6. സഘാനോ യോഗ ആഭുവത്/ സരായേ സ പുരന്ധ്യാം/
ഗമദ്വാജേഭിരാസനഃ/ 681
7. യോഗേ യോഗേ തവസ്തരം/ വാജേ വാജേ ഹവാമഹേ/
സഖായ ഇന്ദ്രമൂതയേ/ 682
8. ആ ഘാ ഗമദ്യദിശ്രവത്/ സഹസ്രിണീഭിരൂതിഭിഃ/
വാജേഭിരുപനോ ഹവം/ 683
9. അനുപ്രത്നസ്യൗകസഃ/ ഹുവേതുവിപ്രതിന്നരം/
യന്തേ പൂർവം പിതാ ഹുവേ/ 684
10. ഇന്ദ്ര സുതേഷു സോമേഷു/ ക്രതും പുനീഷ ഉക്ഥ്യം/
വിദേ വൃധസ്യ ദക്ഷസ്യ മഹം ഹിഷഃ/ 685
11. സപ്രഥമേ വ്യോമനി/ ദേവാനാം സദനേ വൃധഃ/
സുപാരസ്സുശ്രവസ്തമസ്സമപ്സുജിത്/ 686
12. തമുഹുവേ വാജസാതയേ/ ഇന്ദ്രംഭരായ ശുഷ്മിണം/
ഭവാനസ്സുമ്നേ അന്തമസ്സഖാവൃധേ/ 687

६८

१. इदं ह्यन्वोजसा। सुतं राधानाम्पते। पिबा त्वास्य गिर्वणः।। ६७६
२. प्र ते अश्नोतु कुक्ष्योः। प्रेन्द्र ब्रह्मणा शिरः। प्र बाहू शूरराधसा।। ६७७
३. यस्ते अनुस्वधामसत्। सुते नियच्छ तन्वम्। स त्वा ममत्तु सोम्य।। ६७८
४. आ त्वेता निषीदत। इन्द्रमभिप्रगायत। सखायस्तोमवाहसः।। ६७९
५. पुरूतमं पुरूणाम्। ईशानां वार्याणाम्। इन्द्रं सोमे सचा सुते।। ६८०
६. सघानो योग आभुवत्। सराये स पुरन्ध्याम्। गमद्वाजेभिरासनः।। ६८१
७. योगे योगे तवस्तरम्। वाजे वाजे हवामहे। सखाय इन्द्रमूतये।। ६८२
८. आ घा गमद्यदिश्रवत्। सहस्त्रिणीभिरूतिभिः। वाजेभिरुप नो हवम्।। ६८३
९. अनुप्रत्नस्यौकसः। हुवे तुविप्रतिन्नरम्। यन्ते पूर्वं पिता हुवे।। ६८४
१०. इन्द्र सुतेषु सोमेषु। क्रतुं पुनीष उक्थ्यम्। विदे वृधस्य दक्षस्य महं हिषः।। ६८५
११. सप्रथमे व्योमनि। देवानां सदने वृधः। सुपारस्सुश्रवस्तमस्समप्सुजित्। ६८६
१२. तमुहुवे वाजसातये। इन्द्रम्भराय शुष्मिणम्। भवानस्सुम्ने अन्तमस्सखावृधे।। ६८७

69

1. ഏനാവോ അഗ്നിന്നമസാ/ ഊർജോ ന പാതമാഹുവേ/
പ്രിയഞ്ചേതിഷ്ഠമരതിം സ്വാധ്വരം/ വിശ്വസ്യ ദൂതമമൃതം/ 688
2. സ യോജതേ അരുഷാ വിശ്വഭോജസാ/ സദുദ്രവത്സ്വാഹുതഃ/
സു ബ്രഹ്മാ യജ്ഞസ്സുശമീവസൂനാം/ദേവം രാധോ ജനാനാം/ 689
3. പ്രതിവോ ദർശ്യായതീ/ ഉച്ഛന്തീ ദുഹിതാ ദിവഃ/
അപോ മഹീ വൃണുതേ ചക്ഷുഷാതമഃ/
ജ്യോതിഃ കൃണോതി സൂനരീ/ 690
4. ഉദുസ്രിയാസ്സൃജതേ സൂര്യസ്സചാ/ ഉദ്യന്നക്ഷത്രമർചിവത്/
തവേദുഷോ വ്യുഷി സൂര്യസ്യ ച/ സംഭക്തേന ഗമേമഹി/ 691
5. ഇമാ ഉ വാന്ദിവിഷ്ടയഃ/ ഉസ്രാ ഹവന്തേ അശ്വിനാ/
അയം വാമഹ്വയവസേ ശചീവസൂ/ വിശം വിശം ഹി ഗച്ഛഥഃ/ 692
6. യുവഞ്ചിത്രന്ദദഥുർഭോജനന്നരാ/ ചോദേഥാം സൂനൃതാവതേ/
അർവാഗ്രഥം സമനസാ നിയച്ഛതം/ പിബതം സോമ്യം മധു/ 693

६९

१. एनावो अग्निन्नमसा। ऊर्जो न पातमाहुवे।
प्रियञ्चेतिष्ठमरतिं स्वध्वरम्। विश्वस्य दूतममृतम्।। ६८८
२. स योजते अरुषा विश्वभोजसा। सदुद्रवत्स्वाहुतः।
सु ब्रह्मा यज्ञस्सुशमीवसूनाम्। देवं राधो जनानाम्।। ६८९
३. प्रतिवो दर्श्यायती। उच्छन्ती दुहिता दिवः।
अपो मही वृणुते चक्षुषातमः। ज्योतिः कृणोति सूनरी।। ६९०
४. उदुस्रियास्सृजते सूर्यस्सचा। उद्यन्नक्षत्रमर्चिवत्।
तवेदुषो व्युषि सूर्यस्य च। संभक्तेन गमेमहि।। ६९१
५. इमा उ वान्दिविष्टयः। उस्रा हवन्ते अश्विना।
अयं वामह्वयवसे शचीवसू। विशं विशं हि गच्छथः।। ६९२
६. युवञ्चित्तन्ददथुर्भोजनन्नरा। चोदेथां सूनृतावते।
अर्वाग्रथं समनसा नियच्छतम्। पिबतं सोम्यं मधु।। ६९३

70

1. അസ്യ പ്രത്നാമനുദ്യുതം/ ശുക്രന്ദുദുഹ്രേ അഹ്രയഃ/
പയസ്സഹസ്രസാമൃഷിം/ 694
2. അയം സൂര്യ ഇവോപദൃക്/ അയം സരാംസി ധാവതി/
സപ്ത പ്രവത ആദിവം/ 695

3. അയം വിശ്വാനി തിഷ്ഠതി/ പുനാനോ ഭുവനോപരി/
സോമോ ദേവോ ന സൂര്യഃ/ 696
4. ഏഷ പ്രത്നേ ന ജന്മനാ/ ദേവോ ദേവേഭ്യസ്സുതഃ/
ഹരിഃ പവിത്രേ അർഷതി/ 697
5. ഏഷ പ്രത്നേ ന മന്മനാ/ ദേവോ ദേവേഭ്യസ്പരി/
കവിർവിപ്രേണ വാവൃധേ/ 698
6. ദുഹാനഃ പ്രത്നമിത്പയഃ/ പവിത്രേ പരിഷിച്യസേ/
ക്രന്ദന്നേവം അജീജനഃ/ 699
7. ഉപ ശിക്ഷാപതസ്ഥുഷഃ/ ഭിയസമാധേഹി ശത്രവേ/
പവമാനവിദാരയിം/ 700
8. ഉപോഷു ജാതമപ്തുരം/ ഗോഭിർഭങ്ഗം പരിഷ്കൃതം/
ഇന്ദുന്നേവാ അയാസിഷുഃ/ 701
9. ഉപാസ്മൈ ഗായതാ നരഃ/ പവമാനായേന്ദവേ/
അഭിദേവം ഇയക്ഷതേ/ 702
10. പ്ര സോമാസോ വിപശ്ചിതഃ/ അപോ നയന്ത ഊർമയഃ/
വനാനി മഹിഷാ ഇവ/ 703

७०

१. अस्य प्रत्नामनुद्यतम्। शुक्रन्दुदुह्रे अह्रयः। पयस्सहस्रसामृषिम्।। ६९४
२. अयं सूर्य इवोपदृक्। अयं सरांसि धावति। सप्त प्रवत आदिवम्।। ६९५
३. अयं विश्वानि तिष्ठति। पुनानो भुवनोपरि। सोमो देवो न सूर्यः।। ६९६
४. एष प्रत्ने न जन्मना। देवो देवेभ्यस्सुतः। हरिःपवित्रे अर्षति।। ६९७
५. एष प्रत्ने न मन्मना। देवो देवेभ्यस्परि। कविर्विप्रेण वावृधे।। ६९८
६. दुहानःप्रत्नमित्पयः। पवित्रे परिषिच्यसे। क्रन्दन्देवं अजीजनः।। ६९९
७. उप शिक्षापतस्थुषः। भियसमाधेहि शत्रवे। पवमानविदारयिम्।। ७००
८. उपोषु जातमप्तुरम्। गोभिर्भङ्गं परिष्कृतम्। इन्दुन्देवा अयासिषुः।। ७०१
९. उपास्मै गायता नरः। पवमानायेन्दवे। अभिदेवं इयक्षते।। ७०२
१०. प्र सोमासो विपश्चितः। अपो नयन्त ऊर्मयः। वनानि महिषा इव।। ७०३

71

1. അഭിദ്രോണാനി ബഭ്രവഃ/ ശുക്രാ ഋതസ്യ ധാരയാ/
വാജം ഗോമന്തമക്ഷരൻ/ 704
2. സുതാ ഇന്ദ്രായ വായവേ/ വരുണായ മരുദ്ഭ്യഃ/
സോമാ അർഷന്തു വിഷ്ണവേ/ 705

3. പ്ര സോമ ദേവവീതയേ/ സിന്ധുർന പിപ്യേ അർണസാ/
അംശോഃ പയസാ മദിരോ ന ജാഗ്യവിഃ/
അച്ഛാ കോശം മധുശ്ചുതം/ 706
4. ആ ഹര്യതോ അർജുനോ അത്കേ അവ്യത/
പ്രിയസ്സൂനുർന മർജ്യഃ/
തമീം ഹിന്വന്ത്യപസോ യഥാ രഥം/ നദീഷ്ടാ ഗഭസ്ത്യോഃ/ 707
5. പ്ര സോമാസോ മദച്യുതഃ/ ശ്രവസേ നോ മഘോനാം/
സുതാ വിദഥേ അക്രമുഃ/ 708
6. പവതേ ഹര്യതോ ഹരിഃ/ അതി ഹ്വരാംസി രംഹ്യാ/
അഭ്യർഷസ്തോത്യഭ്യോ വീരവദ്യശഃ/ 709
7. പ്ര സുന്വാനായാന്ധസഃ/ മർതോ ന വഷ്ട തദ്വചഃ/
അപശ്വാനമരാധസം/ ഹതാ മഖന്ന ഭൃഗവഃ/ 710

७१

१. अभिद्रोणानि बभ्रवः। शुक्रा ऋतस्य धारया। वाजं गोमन्तम क्षरन्।। ७०४
२. सुता इन्द्राय वायवे। वरुणाय मरुत्भ्यः। सोमा अर्षन्तु विष्णवे।। ७०५
३. प्र सोम देववीतये। सिन्धुर्न पिप्ये अर्णसा।
अंशोःपयसा मदिरो न जागृविः। अच्छा कोशं मधुश्चुतम्।। ७०६
४. आ हर्यतो अर्जुनो अत्के अव्यत। प्रियस्सूनुर्न मर्ज्यः।
तमीं हिन्वन्त्यपसो यथा रथम्। नदीष्वा गभस्त्योः।। ७०७
५. प्र सोमासो मदच्युतः। श्रवसे नो मघोनाम्। सुता विदथे अक्रमुः।। ७०८
६. पवते हर्यतो हरिः। अति ह्वरांसि रंह्या। अभ्यर्षस्तोतृभ्यो वीरवद्यशः।। ७०९
७. प्र सुन्वानायान्धसः। मर्तो न वष्ट तद्वचः।
अपश्वानमराधसम्। हता मखन्न भृगवः।। ७१०

1. പവസ്വ വാചോ അഗ്രിയഃ/ സോമ ചിത്രാഭിരൂതിഭിഃ/
അഭി വിശ്വാനി കാവ്യാ/ 711
2. ത്വം സമുദ്രിയാ അപഃ/ അഗ്രിയോ വാച ഈരയൻ/
പവസ്വ വിശ്വ ചർഷണേ/ 712
3. തുഭ്യമിമാ ഭുവനാ കവേ/ മഹിമ്നേ സോമ തസ്ഥിരേ/
തുഭ്യന്ധാവന്തി ധേനവഃ/ 713
4. പവസ്വേന്ദോ വൃഷാ സുതഃ/ കൃധീനോ യശസോ ജനേ/
വിശ്വാ അപദ്വിഷോ ജഹി/ 714

5. യസ്യ തേ സഖ്യേ വയം/ സാസഹ്യാമ പൃതന്യതഃ/
തവേന്ദോ ദ്യുമ്ന ഉത്തമേ/ 715
6. യാ തേ ഭീമാന്യായുധാ/ തിഗ്മാനി സന്തി ധൂർവണേ/
രക്ഷാ സമസ്യ നോ നിദേ/ 716
7. വൃഷാ സോമ ദ്യുമം അസി/ വൃഷാ ദേവ വൃഷൗ വ്രതഃ/
വൃഷാ ധർമാണി ദധ്രിഷേ/ 717
8. വൃഷ്ണസ്തേ വൃഷ്ണ്യംശവഃ/ വൃഷാ വനം വൃഷാ സുതേ/
സ ത്വം വൃഷന്വൃഷേദസി/ 718
9. അശ്വോ ന ചക്രദദ്വൃഷാ/ സങ്ഗാ ഇന്ദോ സമർവതഃ/
വി നോ രായേ ദുരോ വൃധി/ 719
10. വൃഷാ ഹ്യസി ഭാനുനാ/ ദ്യുമന്തന്ത്വാ ഹവാമഹേ/
പവമാനസ്വർദൃശം/ 720
11. യദദ്ഭിഃ പരിഷിച്യസേ/ മർമൃജ്യമാന ആയുഭിഃ/
ദ്രോണേ സധസ്ഥമശ്നുഷേ/ 721
12. ആ പവസ്വ സുവീര്യം/ മന്ദമാനഃ സ്വായുധ/
ഇഹോ ഷ്വിന്ദവാ ഗഹി/ 722
13. പവമാനസ്യ തേ വയം/ പവിത്രമഭ്യുന്ദതഃ/
സഖിത്വമാ വൃണീമഹേ/ 723
14. യേ തേ പവിത്രമൂർമയഃ/ അഭിക്ഷരന്തി ധാരയാ/
തേഭിർനസ്സോമമൃഡയ/ 724
15. സ നഃ പുനാന ആഭര/ രയിം വീരവതീമിഷം/
ഈശാനസ്സോമവിശ്വതഃ/ 725

७२

१. पवस्व वाचो अग्रियः। सोम चित्राभिरूतिभिः। अभि विश्वानि काव्या।। ७११
२. त्वं समुद्रिया अपः। अग्रियो वाच ईरयन्। पवस्व विश्व चर्षणे।। ७१२
३. तुभ्यमिमा भुवना कवे। महिम्ने सोम तस्थिरे। तुभ्यन्धावन्ति धेनवः।। ७१३
४. पवस्वेन्दो वृषा सुतः। कृधीनो यशसो जने। विश्वा अपद्विषो जहि।। ७१४
५. यस्य ते सख्ये वयम्। सासह्याम पृतन्यतः। तवेन्दो द्युम्न उत्तमे।। ७१५
६. या ते भीमान्यायुधा। तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदे।। ७१६
७. वृषा सोम द्युमम् असि। वृषा देव वृषौ व्रतः। वृषा धर्माणि दध्रिषे।। ७१७
८. वृष्णस्ते वृष्ण्यंशवः। वृषा वनं वृषा सुते। स त्वं वृषन्वृषेदसि।। ७१८
९. अश्वो न चक्रदद्वृषा। सङ्गा इन्दो समर्वतः। वि नो राये दुरो वृधि।। ७१९
१०.वृषा ह्यसि भानुना। द्युमन्तन्त्वा हवामहे। पवमानस्वर्दृशम्।। ७२०
११.यदत्भिःपरिषिच्यसे। मर्मृज्यमान आयुभिः। द्रोणे सधस्थमश्नुषे।। ७२१

१२.आ पवस्व सुवीर्यम्। मन्दमानस्वायुध। इहोष्विन्दवा गहि।। ७२२
१३.पवमानस्य ते वयम्। पवित्रमभ्युन्दतः। सखित्वमा वृणीमहे।। ७२३
१४.ये ते पवित्रमूर्मयः। अभिक्षरन्ति धारया। तेभिर्नस्सोममृडय।। ७२४
१५.स नःपुनान आभर। रयिं वीरवतीमिषम्। ईशानस्सोमविश्वतः।। ७२५

73

1. അഗ്നിന്ദൂതം വൃണീമഹേ/ ഹാതാരം വിശ്വവേദസം/
അസ്യ യജ്ഞസ്യ സുക്രതും/ 726
2. അഗ്നിമഗ്നിം ഹവീമഭിഃ/ സദാ ഹവന്ത വിശ്പതിം/
ഹവ്യവാഹം പുരുപ്രിയം/ 727
3. അഗ്നേ ദേവം ഇഹാവഹ/ ജജ്ഞാനോ വൃക്തബർഹിഷഃ/
അസി ഹോതാ ന ഈഡ്യഃ/ 728
4. മിത്രം വയം ഹവാമഹേ/ വരുണം സോമപീതയേ/
ജജ്ഞാനാ പൂതദക്ഷസാ/ 729
5. ഋതേന യാ വൃതാവൃധൗ/ ഋതസ്യ ജ്യോതിഷസ്പതീ/
താ മിത്രാവരുണാ ഹുവേ/ 73
6. വരുണഃ പ്രാവിതാ ഭുവത്/ മിത്രോ വിശ്വാഭിരൂതിഭിഃ/
കരതാന്നസ്സുരാധസഃ/ 731
7. ഇന്ദ്രമിദ്ഗാഥിനോ ബൃഹത്/ ഇന്ദ്രമർകേഭിരർകിണഃ/
ഇന്ദ്രം വാണീരനൂഷത/ 732
8. ഇന്ദ്ര ഇദ്ധര്യോസ്സചാ/ സമ്മിശ്ല ആ വചോ യുജാ/
ഇന്ദ്രോ വജ്രീ ഹിരണ്യയഃ/ 733
9. ഇന്ദ്ര വാജേഷു നോവ/ സഹസ്രപ്രധനേഷു ച/
ഉഗ്ര ഉഗ്രാഭിരൂതിഭിഃ/ 734
10. ഇന്ദ്രേ അഗ്നാ നമോ ബൃഹത്/ സുവൃക്തിമേരയാമഹേ/
ധിയാ ധേനാ അവസ്യവഃ/ 735
11. താ ഹി ശശ്വന്ത ഈളതേ/ ഇത്ഥാ വിപ്രാസ ഊതയേ/
സബാധോ വാജസാതയേ/ 736
12. താവാങ്ഗീർഭിർവിപന്യുവഃ/ പ്രയസ്വന്തോ ഹവാമഹേ/
മേധസാതാ സനിഷ്യവഃ/ 737

७३

१. अग्निन्दूतं वृणीमहे। होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्।। ७२६
२. अग्निमग्निं हवीमभिः। सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम्।। ७२७
३. अग्ने देवम् इहावह। जज्ञानो वृक्तबर्हिषः। असि होता न ईड्यः।। ७२८
४. मित्रं वयं हवामहे। वरुणं सोमपीतये। जज्ञाना पूतदक्षसा।। ७२९

५. ऋतेन या वृतावृधौ। ऋतस्य ज्योतिषस्पती। ता मित्रावरुणा हुवे।। ७३०
६. वरुणःप्राविता भुवत्। मित्रो विश्वाभिरूतिभिः। करतान्नस्सुराधसः।। ७३१
७. इन्द्रमित्गाथिनो बृहत्। इन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत।। ७३२
८. इन्द्र इद्धर्योस्सचा। सम्मिश्ल आ वचो युजा। इन्द्रो वज्री हिरण्ययः।। ७३३
९. इन्द्र वाजेषु नोव। सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः।। ७३४
१०. इन्द्रे अग्ना नमो बृहत्। सुवृक्तिमेरयामहे। धिया धेना अवस्यवः।। ७३५
११. ता हि शश्वन्त ईळते। इत्था विप्रास ऊतये। सबाधो वाजसातये।। ७३६
१२. तावाङ्गीर्भिर्विपन्युवः। प्रयस्वन्तो हवामहे। मेधसाता सनिष्यवः।। ७३७

74

1. വൃഷാ പവസ്വ ധാരയാ/മരുത്വതേ ച മത്സരഃ/
വിശ്വാ ദധാന ഓജസാ/ 738
2. തന്ത്വാ ധർതാരമോണ്യോഃ/ പവമാനസ്വർദൃശം/
ഹിന്വേ വാജേഷു വാജിനം/ 739
3. അയാ ചിത്തോ വി പാനയാ/ ഹരിഃ പവസ്വ ധാരയാ/
യുജം വാജേഷു ചോദയ/ 740
4. വൃഷാ ശോണോ അഭി കനിക്രദത് ഗാഃ/
നദയന്നേഷി പൃഥിവീമുതദ്യാം/
ഇന്ദ്രസ്യേവ വഗ്നുരാ ശ്രൃണ്വ ആജൗ/
പ്രചോദന്നർഷസി വാചമേമാം/ 741
5. രസായ്യഃ പയസാ പിന്വമാനഃ/ ഈരയന്നേഷി മധുമന്തമംശും/
പവമാനസ്സന്തനിമേഷി കൃണ്വൻ/
ഇന്ദ്രായ സോമ പരിഷിച്യമാനഃ/ 742
6. ഏവാ പവസ്വ മദിരോ മദായ/ ഉദഗ്രാഭസ്യ നമയന്വധസ്നും/
പരിവർണം ഭരമാണോ രുശന്തം/
ഗവ്യുർനോ അർഷ പരിസോമസിക്തഃ/ 743
7. ത്വാമിദ്ധി ഹവാമഹേ/ സാതൗ വാജസ്യ കാരവഃ/
ത്വാം വൃത്രേഷ്വിന്ദ്ര സത്പതിന്നരഃ/ ത്വാങ്കാഷ്ഠാ സ്വർവതഃ/ 744
8. സത്വന്നശ്ചിത്രവജ്രഹസ്തധൃഷ്ണുയാ/ മഹസ്തവാനോ അദ്രിവഃ/
ഗാമശ്വം രഥ്യമിന്ദ്രസങ്കിര/ സത്രാവാജന്നജിഗ്യുഷേ/ 745
9. അഭിപ്രവസ്സുരാധസം/ ഇന്ദ്രമർച യഥാ വിദേ/
യോ ജരിതൃഭ്യോ മഘവാ പുരോവസുഃ/
സഹസ്രേണേവ ശിക്ഷതി/ 746
10. ശതാനീകേവ പ്രജിഗാതി ധൃഷ്ണുയാ/ ഹന്തി വൃത്രാണി ദാശുഷേ/
ഗിരേരിവ പ്രരസാ അസ്യ പിന്വിരേ/ ദത്രാണി പുരുഭോജസഃ/ 747

11. ത്വാമിദാഹ്യോ നരഃ/ അപീപ്യന്വജ്രിൻ ഭൂർണയഃ/
സ ഇന്ദ്രസ്തോമവാഹ സ ഇഹ ശ്രുധി/ ഉപസ്വസരമാഗഹി/ 748
12. മത്സ്വാ സുശിപ്രിൻ ഹരിവസ്തമീമഹേ/ ത്വയാ ഭൂഷന്തി വേധസഃ/
തവ ശ്രവാംസ്യുപമാന്യുക്ഥ്യ/ സുതേഷ്വിന്ദ്ര ഗിർവണഃ/ 749

७४

१. वृषा पवस्व धारया। मरुत्वते च मत्सरः। विश्वा दधान ओजसा।। ७३८
२. तन्त्वा धर्तारमोण्योः। पवमानस्वर्दृशम्। हिन्वे वाजेषु वाजिनम्।। ७३९
३. अया चित्तो वि पानया। हरिःपवस्व धारया। युजं वाजेषु चोदय।। ७४०
४. वृषा शोणो अभि कनिक्रदत् गाः। नदयन्नेषि पृथिवीमुत द्याम्।
इन्द्रस्येव वग्नुरा शृण्व आजौ। प्रचोदन्नर्षसि वाचमेमाम्।। ७४१
५. रसाय्यःपयसा पिन्वमानः। ईरयन्नेषि मधुमन्तमंशुम्।
पवमानस्सन्तनिमेषि कृण्वन्। इन्द्राय सोम परिषिच्यमानः।। ७४२
६. एवा पवस्व मदिरो मदाय। उदग्राभस्य नमयन्वधस्नुम्।
परिवर्णं भरमाणो रुशन्तम्। गव्युर्नो अर्ष परिसोमसिक्तः।। ७४३
७. त्वामिद्धि हवामहे। सातौ वाजस्य कारवः।
त्वां वृत्रेष्विन्द्र सत्पतिन्नरः। त्वाङ्काष्ठा स्वर्वतः।। ७४४
८. सत्वन्नश्चित्रवज्रहस्तधृष्णुया। महस्तवानो अद्रिवः।
गामश्वं रथ्यमिन्द्रसङ्किर। सत्रावजन्नजिग्युषे।। ७४५
९. अभिप्रवस्सुराधसम्। इन्द्रमर्च यथा विदे।
यो जरितृभ्यो मघवा पुरोवसुः सहस्रेणेव शिक्षति।। ७४६
१०. शतानीकेव प्रजिगाति धृष्णुया। हन्ति वृत्राणि दाशुषे।
गिरेरिव प्ररसा अस्य पिन्विरे। दत्राणि पुरुभोजसः।। ७४७
११. त्वामिदाह्यो नरः। अपीप्यन् वज्रिन् भूर्णयः।
स इन्द्रस्तोमवाह स इह श्रुधि। उपस्वसरमागहि।। ७४८
१२. मत्स्वा सुशिप्रिन् हरिवस्तमीमहे। त्वया भूषन्ति वेधसः।
तव श्रवांस्युपमान्युक्थ्य। सुतेष्विन्द्र गिर्वणः।। ७४९

75

1. യസ്തേ മദോ വരേണ്യഃ/ തേനാപവസ്യാന്ധസാ/
ദേവാവീരഘ്നശംസഹാ/ 750
2. ജഘ്നിർവൃത്രമമിത്രിയം/ സസ്നിർവാജന്ദിവേ ദിവേ/
ഗോഷാതിരശ്വസാ അസി/ 751

3. സമ്മിശ്ലോ അരുഷോ ഭുവഃ/ സൂപസ്ഥാഭിർന ധേനുഭിഃ/
സീദഞ്ഛ്യേനോ ന യോനിമാ/ 752
4. പവസ്വ മധുമത്തമഃ/ ഇന്ദ്രായ സോമ ക്രതുവിത്തമോ മദഃ/
മഹി ദ്യുക്ഷതമോ മദഃ/ 753
5. ഇന്ദ്രമച്ഛ സുതാ ഇമേ/ വൃഷണയ്യന്തു ഹരയഃ/
ശ്രുഷ്ടേ ജാതാസ ഇന്ദവസ്വർവിദഃ/ 754
6. അയം പൂഷാരയിർഭഗഃ/ സോമഃ പുനാനോ അർഷതി/
പതിർവിശ്വസ്യ ഭൂമനഃ/ വ്യഖ്യദ്രോദസീ ഉഭേ/ 755
7. സമുപ്രിയാ അനൂഷത/ ഗാവോ മദായ ഘൃഷ്വയഃ/
സോമാസഃ കൃണ്വതേ പഥഃ/ പവമാനാസ ഇന്ദവഃ/ 756
8. യ ഓജിഷ്ഠസ്തമാഭര/ പവമാനശ്രവായ്യം/
യഃ പഞ്ചചർഷണീരഭി/ രയിയ്യേന വനാമഹേ/ 757
9. വൃഷാ മതീനാം പവതേ വിചക്ഷണഃ/
സോമോ അഹ്നാം പ്രതരീതോഷസാന്ദിവഃ/
പ്രാണാ സിന്ധൂനാം കലശം അചിക്രദത്/
ഇന്ദ്രസ്യ ഹാർദ്യാവിശൻ മനീഷിഭിഃ/ 758
10. മനീഷിഭിഃ പവതേ പൂർവ്യഃ കവിഃ/
നൃഭിർയതഃ പരികോശം അസിഷ്യദത്/
ത്രിതസ്യ നാമ ജനയൻ മധു ക്ഷരൻ/
ഇന്ദ്രസ്യ വായും സഖ്യായ വർധയൻ/ 759
11. അയം പുനാന ഉഷസോ അരോചയത്/
അയം സിന്ധുഭ്യോ അഭവദുലോകകൃത്/
അയന്ത്രിസ്സുപ്ത ദുദുഹാന ആശിരം/
സോമോ ഹൃദേ പവതേ ചാരുമത്സരഃ/ 760
12. ഏവാ ഹ്യസി വീരയുഃ/ ഏവാ ശൂര ഉത സ്ഥിരഃ/
ഏവാ തേ രാധ്യം മനഃ/ 761
13. ഏവാ രാതി സ്തുവീമഘ/ വിശ്വേഭിർധായി ധാതൃഭിഃ/
അധാ ചിദിന്ദ്ര നസ്സചാ/ 762
14. മോഷു ബ്രഹ്മേവ തന്ദ്രയുഃ/ ഭുവോ വാജാനാം പതേ/
മത്സ്വാ സുതസ്യ ഗോമതഃ/ 763
15. ഇന്ദ്രം വിശ്വാ അവീവൃധൻ/ സമുദ്രവ്യചസങ്ഗിരഃ/
രഥീതമം രഥീനാം/ വാജാനാം സത്പതിം പതിം/ 764
16. സഖ്യേ ത ഇന്ദ്ര വാജിനഃ/ മാ ഭേമ ശവസസ്പതേ/
ത്വാമഭിപ്രനോനുമഃ/ ജേതാരമപരാജിതം/ 765
17. പൂർവീരിന്ദ്രസ്യ രാതയഃ/ ന വിദസ്യന്ത്യൂതയഃ/
യദാ വാജസ്യ ഗോമതഃ/ സ്തോതൃഭ്യോ മംഹതേ മഘം/ 766

७५

१. यस्ते मदो वरेण्यः। तेनापवस्वान्धसा। देवावीरघशंसहा।। ७५०

२. जघ्निर्वृत्रममित्रियम्। सस्निर्वाजन्दिवे दिवे। गोषातिरश्वसा असि।। ७५१

३. सम्मिश्लो अरुषो भुवः। सूपस्थाभिर्न धेनुभिः। सीदञ्छ्येनो न योनिमा।।७५२

४. पवस्व मधुमत्तमः। इन्द्राय सोम क्रतुवित्तमो मदः।
महि द्युक्षतमो मदः।। ७५३

५. इन्द्रमच्छ सुता इमे। वृषणय्यन्तु हरयः।
श्रुष्टे जातास इन्दवस्वर्विदः।। ७५४

६. अयं पूषारयिर्भगः। सोमःपुनानो अर्षति।
पतिर्विश्वस्य भूमनः। व्यख्यद्रोदसी उभे।। ७५५

७. समुप्रिया अनूषत। गावो मदाय घृष्वयः।
सोमासः कृण्वते पथः। पवमानास इन्दवः।। ७५६

८. य ओजिष्ठस्तमाभर। पवमानश्रवाय्यम्।
यःपञ्चचर्षणीरभि। रयिं येन वनामहे।। ७५७

९. वृषा मतीनाम्पवते विचक्षणः। सोमो अह्नां प्रतरीतोषसान्दिवः।
प्राणा सिन्धूनाङ्कलशम् अचिक्रदत्। इन्द्रस्य हार्द्याविशन् मनीषिभिः।। ७५८

१०. मनीषिभिःपवते पूर्व्यः कविः। नृभिर्यतः परिकोशम् असिष्यदत्।
त्रितस्य नाम जनयन्मधु क्षरन्। इन्द्रस्य वायुं सख्याय वर्धयन्।। ७५९

११. अयं पुनान उषसो अरोचयत्। अयं सिन्धुभ्यो अभवदुलोककृत्।
अयन्त्रिस्सप्त दुदुहान आशिरम्। सोमो ह्रदे पवते चारुमत्सरः।। ७६०

१२. एवा ह्यसि वीरयुः। एवा शूर उत स्थिरः। एवा ते राध्यं मनः।। ७६१

१३. एवा राति स्तुवीमघ। विश्वेभिर्धायि धातृभिः। अंधा चिदिन्द्र नस्सचा।।७६२

१४. मोषु ब्रह्मेव तन्द्रयुः। भुवो वाजानां पते। मत्स्वा सुतस्य गोमतः।। ७६३

१५. इन्द्रं विश्वा अवीवृधन्। समुद्रव्यचसङ्गिरः।
रथीतमं रथीनाम्। वाजानां सत्पतिं पतिम्।। ७६४

१६. सख्ये त इन्द्र वाजिनः। मा भेम शवसस्पते।
त्वामभिप्रनोनुमः। जेतारमपराजितम्।। ७६५

१७. पूर्वीरिन्द्रस्य रातयः। न विदस्यन्त्यूतयः।
यदा वाजस्य गोमतः। स्तोतृभ्यो मंहते मघम्।। ७६६

76

1. ഏതേ അസൃഗ്രമിന്ദവഃ/ തിരഃ പവിത്രമാശവഃ/
വിശ്വാന്യഭിസൗഭഗാ/ 767
2. വിഘ്നന്തോ ദുരിതാ പുരു/ സുഗാതോകായ വാജിനഃ/
ക്മനാ കൃണ്വന്തോ അർവതഃ/ 768
3. കൃണ്വന്തോ വരിവോ ഗവേ/ അഭ്യർഷന്തി സുഷ്ടുതിം/
ഇളാമസ്മഭ്യം സയ്യതം/ 769
4. രാജാ മേധാഭിരീയതേ/ പവമാനോ മനാവധി/
അന്തരിക്ഷേണ യാതവേ/ 770
5. ആനസ്സോമ സഹോ ജുവഃ/ രൂപന്ന വർചസേ ഭര/
സുഷ്വാണോ ദേവവീതയേ/ 771
6. ആ ന ഇന്ദോ ശതഗ്വിനം/ ഗവാം പോഷം സ്വശ്വിയം/
വഹാ ഭഗത്തിമൂതയേ/ 772
7. തന്വാ നൃമ്ണാനി ബിഭ്രതം/ സധസ്ഥാനി മഹോ ദിവഃ/
ചാരും സുകൃത്യ യേമഹേ/ 773
8. സംവൃക്ത ധൃഷ്ണുമുക്ഥ്യം/ മഹാമഹിവ്രതം മദം/
ശതം പുരോരുരുക്ഷണിം/ 774
9. അതസ്ത്വാ രയിമഭി/ രാജാനം സുക്രതോ ദിവഃ/
സുപർണോ അവ്യഥീഭര/ 775
10. വിശ്വസ്മാ ഇത് സ്വർദൃശേ/ സാധാരണം രജസ്തുരം/
ഗോപാമൃതസ്യ വിർഭരത്/ 776
11. അധാ ഹിന്വാന ഇന്ദ്രിയം/ ജ്യായോ മഹിത്വമാനശേ/
അഭിഷ്ടികൃദ്വിചർഷണിഃ/ 777
12. ഇഷേ പവസ്വ ധാരയാ/ മൃജ്യമാനോ മനീഷിഭിഃ/
ഇന്ദോ രുചാഭി ഗാ ഇഹി/ 778
13. പുനാനോ വരിവസ്കൃധി/ ഊർജഞ്ജനായ ഗിർവണഃ/
ഹരേ സൃജാന ആശിരം/ 779
14. പുനാനോ ദേവവീതയേ/ ഇന്ദ്രസ്യ യാഹി നിഷ്കൃതം/
ദ്യുതാനോ വാജിഭിർഹിതഃ/ 780

७६

१. एते असृग्रमिन्दवः। तिरःपवित्रमाशवः। विश्वान्यभिसौभगा।। ७६७
२. विघ्नन्तो दुरिता पुरु। सुगातोकाय वाजिनः। क्मना कृण्वन्तो अर्वतः।। ७६८
३. कृण्वन्तो वरिवो गवे। अभ्यर्षन्ति सुष्टुतिम्। इळामस्मभ्यं सय्यतम्।। ७६९
४. राजा मेधाभिरीयते। पवमानो मनावधि। अन्तरिक्षेण यातवे।। ७७०
५. आनस्सोम सहो जुवः। रूपन्नवर्चसे भर। सुष्वाणो देववीतये।। ७७१

६. आ न इन्दो शतग्विनम्। गवां पोषं स्वश्वियम्। वहा भगत्तिमूतये।। ७७२
७. तन्त्वा नृम्णानि बिभ्रतम्। सधस्थानि महो दिवः। चारुं सुकृत्य येमहे।। ७७३
८. संवृक्त धृष्णुमुक्थ्यम्। महामहिव्रतं मदम्। शतं पुरोरुरुक्षणिम्।। ७७४
९. अतस्त्वा रयिमभि। राजानं सुक्रतो दिवः। सुपर्णो अव्यथीभर।। ७७५
१०. विश्वस्मा इत् स्वर्दृशे। साधारणं रजस्तुरम्। गोपामृतस्य विर्भरत्।। ७७६
११. अधा हिन्वान इन्द्रियम्। ज्यायो महित्वमानशे। अभिष्टिकृद्विचर्षणिः।। ७७७
१२. इषे पवस्व धारया। मृज्यमानो मनीषिभिः। इन्दो रुचाभि गा इहि।। ७७८
१३. पुनानो वरिवस्कृधि। ऊर्जञ्जनाय गिर्वणः। हरे सृजान आशिरम्।। ७७९
१४. पुनानो देववीतये। इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभिर्हितः।। ७८०

77

1. അഗ്നിനാഗ്നിസ്സമിധ്യതേ/ കവിർഗൃഹപതിർയുവാ/
ഹവ്യവാട് ജുഹ്വാസ്യഃ/ 781
2. യസ്ത്വാമഗ്നേ ഹവിഷ്പതിഃ/ ദൂതന്ദേവ സപര്യതി/
തസ്യ സ്മ പ്രാവിതാ ഭവ/ 782
3. യോ അഗ്നിന്ദേവവീതയേ/ ഹവിഷ്മം ആ വിവാസതി/
തസ്മൈ പാവകമൃഡയ/ 783
4. മിത്രം ഹുവേ പൂതദക്ഷം/ വരുണഞ്ചരിശാദസം/
ധിയം ഘൃതാചീം സാധന്താ/ 784
5. ഋതേന മിത്രാവരുണൗ/ ഋതാ വൃധാവൃതസ്പൃശാ/
ക്രതും ബൃഹന്തമാശാഥേ/ 785
6. കവീനോ മിത്രാവരുണാ/ തുവിജാതാ ഉരുക്ഷയാ/
ദക്ഷന്ദധാതേ അപസം/ 786
7. ഇന്ദ്രേണ സംഹിദൃക്ഷസേ/ ഞ്ജഗ്മാനോ അബിഭ്യുഷാ/
മന്ദൂ സമാനവർചസാ/ 787
8. ആദഹ സ്വധാമനു/ പുനർഗർഭത്വമേരിരേ/
ദധാനാ നാമ യജ്ഞിയം/ 788
9. വീഴുചിദാരു ജത്നുഭിഃ/ ഗുഹാചിദിന്ദ്ര വഹ്നിഭിഃ/
അവിന്ദ്ര ഉസ്രിയാ അനു/ 789
10. താ ഹുവേ യയോരിദം/ പപ്മേ വിശ്വം പുരാകൃതം/
ഇന്ദ്രാഗ്നീനമർധതഃ/ 790
11. ഉഗ്രാ വിഘ്നനിനാമൃധഃ/ ഇന്ദ്രാഗ്നീ ഹവാമഹേ/
താ നോ മൃഡാ ത ഈദൃശേ/ 791
12. ഹഥോ വൃത്രാണ്യാര്യാ/ ഹഥോ ദാസാനി സത്പതീ/
ഹഥോ വിശ്വാ അപ ദ്വിഷഃ/ 792

७७

१. अग्निनाग्निस्समिध्यते। कविर्गृहपतिर्युवा। हव्यवाळ् जुह्वास्यः।। ७८१
२. यस्त्वामग्ने हविष्पतिः। दूतन्देव सपर्यति। तस्य स्म प्राविता भव।। ७८२
३. यो अग्निन्देववीतये। हविष्मम् आ विवासति। तस्मै पावकमृडय। ७८३
४. मित्रं हुवे पूतदक्षम्। वरुणञ्चरिशादसम्। धियं घृताचीं साधन्ता।। ७८४
५. ऋतेन मित्रावरुणौ। ऋता वृधावृतस्पृशा। क्रतुं बृहन्तमाशाथे।। ७८५
६. कवीनो मित्रावरुणा। तुवीजाता उरुक्षया। दक्षन्दधाते अपसम्।। ७८६
७. इन्द्रेण संहिदृक्षसे। सञ्जग्मानो अबिभ्युषा। मन्दू समानवर्चसा।। ७८७
८. आदह स्वधामनु। पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम्।। ७८८
९. वीळुचिदारु जत्नुभिः। गुहाचिदिन्द्र वह्निभिः। अविन्द उस्रिया अनु।। ७८९
१०.ता हुवे ययोरिदम्। पप्मे विश्वं पुरा कृतम्। इन्द्राग्नीनमर्धत।। ७९०
११.उग्रा विघनिनामृधः। इन्द्राग्नी हवामहे। ता नो मृडात ईदृशे।। ७९१
१२.हथो वृत्राण्यार्या। हथो दासानि सत्पती। हथो विश्वा अप द्विषः।। ७९२

78

1. അഭിസോമാസ ആയവഃ/ പവന്തേ മദ്യം മദം/
സമുദ്രസ്യാധിവിഷ്ടപേ മനീഷിണഃ/ മത്സരാസോ മദച്യുതഃ/ 793
2. തരത്സമുദ്രം പവമാന ഊർമിണാ/ രാജാ ദേവ ഋതം ബൃഹത്/
അർഷാ മിത്രസ്യ വരുണസ്യ ധർമണാ/
പ്രഹിന്വാന ഋതം ബൃഹത്/ 794
3. നൃഭിരേയമാണോ ഹര്യതോ വിചക്ഷണഃ/
രാജാ ദേവസ്സമുദ്രിയഃ/ 795
4. തിസ്രോ വാച ഈരയതി പ്രവഹ്നിഃ/
ഋതസ്യ ധീതിം ബ്രഹ്മണോ മനീഷാം/
ഗാവോ യന്തി ഗോപതിം പൃച്ഛമാനാഃ/
സോമയ്യന്തി മതയോ വാവശാനാഃ/ 796
5. സോമങ്ഗാവോ ധേനവോ വാവശാനാഃ/
സോമം വിപ്രാമതിഭിഃ പൃച്ഛമാനാഃ/
സോമസ്സുത ഋച്യതേ പൂയമാനഃ/
സോമേഅർകാസ്ത്രിഷ്ടുഭസ്സുന്നവന്ത/ 797
6. ഏവാനസ്സോമ പരിഷിച്യമാനഃ/
ആപവസ്വ പൂയമാന സ്വസ്തി/
ഇന്ദ്രമാവിശ ബൃഹതാ മദേന/
വർധയാ വാചഞ്ജനയാ പുരന്ധിം/ 798

7. യദ്യാവ ഇന്ദ്ര തേ ശതം/ ശതം ഭൂമീരുതസ്യുഃ/
   ന ത്വാ വജ്രിൻ സഹസ്രം സൂര്യാ അനു/
   ന ജാതമഷ്ടരോദസീ/ 799
8. ആ പപ്രാഥ മഹിനാ വൃഷ്ണ്യാ വൃഷൻ/
   വിശ്വാ ശവിഷ്ഠ ശവസാ/
   അസ്മം അവ മഘവൻ ഗോമതിവ്രജേ/
   വജ്രീംശ്ചിത്രാഭിരൂതിഭിഃ/ 800
9. വയങ്ഘത്വാ സുതാവന്തഃ/ ആപോ ന വൃക്ത ബർഹിഷഃ/
   പവിത്രസ്യ പ്രസ്രവണേഷു വൃത്രഹൻ/
   പരിസ്തോതാര ആസതേ/ 801
10. സ്വരന്തി ത്വാ സുതേ നരഃ/ വസോ നിരേക ഉക്ഥിനഃ/
    കദാ സുതന്തൃഷാണ ഓക ആഗമഃ/ ഇന്ദ്ര സ്വബ്ദീവ വംസഗഃ/ 802
11. കണ്വേഭിർധൃഷ്ണവാ ധൃഷത്/ വാജന്ദർഷി സഹസ്രിണം/
    പിശങ്ഗരൂപം മഘവൻ വിചർഷണേ/ മക്ഷൂ ഗോമന്തമീമഹേ/ 803
12. തരണിരിത്സിഷാസതി/ വാജം പുരന്ധ്യാ യുജാ/
    ആവ ഇന്ദ്രം പുരുഹൂതന്നമേ ഗിരാ/ നേമിന്തഷ്ടേവ സുദ്രുവം/ 804
13. ന ദുഷ്ടുതിർദ്രവിണോദേഷു ശസ്യതേ/
    ന സ്രേധന്തം രയിർനശത്/
    സുശക്തിരിന്മഘവംസ്തുഭ്യം മാവതേ/ ദേഷ്ണയ്യത്പാര്യേ ദിവി/805

७८

१. अभिसोमास आयवः। पवन्ते मद्यं मदम्।
   समुद्रस्याधिविष्टपे मनीषिणः। मत्सरासो मदच्युतः।। ७९३
२. तरत्समुद्रं पवमान ऊर्मिणा। राजा देव ऋतं बृहत्।
   अर्षा मित्रस्य वरुणस्य धर्मणा। प्रहिन्वान ऋतं बृहत्।। ७९४
३. नृभिर्येमाणो हर्यतो विचक्षणः। राजा देवस्समुद्रियः।। ७९५
४. तिस्रो वाच ईरयति प्रवह्निः। ऋतस्य धीतिं ब्रह्मणो मनीषाम्।
   गावो यन्ति गोपतिं पृच्छमानाः। सोमय्यन्ति मतयो वावशानाः।। ७९६
५. सोमङ्गावो धेनवो वावशानाः। सोमं विप्रामतिभिः पृच्छमानाः।
   सोमस्सुत ऋच्यते पूयमानः। सोमे अर्कास्त्रिष्टुभस्सन्नवन्त।। ७९७
६. एवानस्सोम परिषिच्यमानः। आपवस्व पूयमान स्वस्ति।
   इन्द्रमाविश बृहता मदेन। वर्धया वाचञ्जनया पुरन्धिम्।। ७९८
७. यद्याव इन्द्र ते शतम्। शतं भूमीरुतस्युः।
   नत्वा वज्रिन् सहस्रं सूर्या अनु। न जातमष्टरोदसी।। ७९९

८. आ पप्राथ महिना वृष्ण्या वृषन्। विश्वा शविष्ठ शवसा।
अस्मम् अव मघवन् गोमतिव्रजे। वज्रींश्चित्राभिरूतिभिः।। ८००

९. वयङ्घत्वा सुतावन्तः। आपो न वृक्तबर्हिषः।
पवित्रस्य प्रस्रवणेषु वृत्रहन्। परिस्तोतार आसते।। ८०१

१०. स्वरन्ति त्वा सुते नरः। वसो निरेक उक्थिनः।
कदा सुतन्तृषाण ओक आगमः। इन्द्र स्वबदीव वंसगः।। ८०२

११. कण्वेभिर्धृष्णवा धृषत्। वाजन्दर्षि सहस्रिणम्।
पिशङ्गरूपं मघवन् विचर्षणे। मक्षू गोमन्तमीमहे।। ८०३

१२. तरणिरित्सिषासति। वाजं पुरन्ध्या युजा।
आव इन्द्रं पुरुहूतन्नमे गिरा। नेमिन्तष्टेव सुद्रुवम्।। ८०४

१३. न दुष्टुतिर्द्रविणोदेषु शस्यते। न स्रेधन्तं रयिर्नशत्।
सुशक्तिरिन्मघवंस्तुभ्यं मावते। देष्णय्यत्पार्ये दिवि।। ८०५

79

1. തിസ്രോ വാച ഉദീരതേ/ ഗാവോ മിമന്തി ധേനവഃ/
ഹരിരേതി കനിക്രദത്/ 806

2. അഭി ബ്രഹ്മീരനൂഷത/ യഹ്വീ ഋതസ്യ മാതരഃ/
മർജയന്തീർദിവശ്ശിശും/ 807

3. രായേ സമുദ്രാംശ്ചതുരഃ/ അസ്മഭ്യം സോമ വിശ്വതഃ/
ആ പവസ്വ സഹസ്രിണഃ/ 808

4. ആ സോത പരിഷിഞ്ചത/ അശ്വന്നസ്തോമമപ്തുരം/
രജസ്തുരം വനപ്രക്ഷമുദപ്രുതം/ 809

5. സഖായ ആ നിഷീദത/ പുനാനായ പ്രഗായത/
ശിശുന്നയജ്ഞൈഃ പരിഭൂഷത ശ്രിയേ/ 810

6. സുതാസോ മധുമത്തമാഃ/ സോമാ ഇന്ദ്രായ മന്ദിനഃ/
പവിത്രവന്തോ അക്ഷരൻ/ ദേവാൻ ഗച്ഛന്തു വോ മദാഃ/ 811

7. ഇന്ദുരിന്ദ്രായ പവതേ/ ഇതി ദേവാസോ അബ്രുവൻ/
വാചസ്പതിർമഖസ്യതേ/ വിശ്വസ്യേശാന ഓജസാ/ 812

8. സഹസ്രധാരഃ പവതേ/ സമുദ്രോ വാചമീങ്ഖയഃ/
സോമഃ പതീരയീണാം/ സഖേന്ദ്രസ്യ ദിവേ ദിവേ/ 813

9. പവിത്രന്തേ വിതതം ബ്രഹ്മണസ്പതേ/
പ്രഭുർഗാത്രാണി പര്യേഷി വിശ്വതഃ/
അതപ്തതനൂർണതദാമോ അശ്നുതേ/
ശൃതാസ ഇദ്വഹന്തസ്സ്നന്തദാശത/ 814

10. തപോഷ്പവിത്രം വിതതന്ദിവസ്പദേ/
ശോചന്തോ അസ്യ തന്തവോ വ്യസ്ഥിരൻ/
അവന്ത്യസ്യ പവീതാരമാശവഃ/
ദിവസ്പൃഷ്ഠമധിതിഷ്ഠന്തി തേജസാ/ 815
11. അരൂരുചദുഷസഃ പൃശ്നിരഗ്രയുഃ/
ഉക്ഷാമിമാതി ഭുവനേഷു വാജയുഃ/
മായാവിനോ മമിരേ അസ്യ മായയാ/
നൃചക്ഷസഃ പിതരോ ഗർഭമാദധുഃ/ 816
12. പ്ര മംഹിഷ്ഠായ ഗായത/ ഋതാവ്നേ ബൃഹതേ ശുക്രശോചിഷേ/
ഉപസ്തുതാസോ അഗ്നയേ/ 817
13. ആവംസതേ മഘവാ വീരവദ്യശഃ/ സമിദ്ധോ ദ്യുമ്ന്യാഹുതഃ/
കുവിന്നോ അസ്യ സുമതിർനവീയസീ/ അച്ഛാ വാജേഭിരാഗമത്/ 818
14. തന്തേ മദങ്ഗൃണീമസി/ വൃഷണം പൃക്ഷുസാസഹിം/
ഉലോകകൃത്നുമദ്രിവോ ഹരിശ്രിയം/ 819
15. യേന ജ്യോതീംഷ്യായവേ/ മനവേ ച വിവേദിഥ/
മന്ദാനോ അസ്യ ബർഹിഷോ വിരാജസി/ 820
16. തദദ്യാ ചിത്ത ഉക്ഥിനഃ/ അനുഷ്ടുവന്തി പൂർവഥാ/
വൃഷപത്നീരപോ ജയാ ദിവേ ദിവേ/ 821
17. ശ്രുധീഹവന്തിരശ്ര്യാഃ/ ഇന്ദ്ര യസ്ത്വാ സപര്യതി/
സുവീര്യസ്യ ഗോമതഃ/ രായസ്പൂർധിമഹം അസി/ 822
18. യസ്ത ഇന്ദ്ര നവീയസീം/ ഗിരം മന്ദ്രാമജീജനത്/
ചികിത്വിൻ മനസന്ധിയം/ പ്രത്നാമൃതസ്യ പിപ്യുഷീം/ 823
19. തമുഷ്ടവാമ യങ്ഗിരഃ/ ഇന്ദ്രമുക്ഥാനി വാവൃധുഃ/
പുരൂണ്യസ്യ പൗംസ്യാ/ സിഷാസന്തോ വനാമഹേ/ 824

७९

१. तिस्रो वाच उदीरते। गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत्।। ८०६
२. अभि ब्रह्मीरनूषत। यह्वी ऋतस्य मातरः। मर्जयन्तीर्दिवश्शिशुम्।। ८०७
३. राये समुद्रांश्चतुरः। अस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणः।। ८०८
४. आ सोत परिषिञ्चत। अश्वन्नस्तोममप्तुरं रजस्तुरम्। वनप्रक्षमुदप्रुतम्।। ८०९
५. सखाय आ निषीदत। पुनानाय प्रगायत। शिशुन्नयज्ञैःपरिभूषत श्रिये।। ८१०
६. सुतासो मधुमत्तमाः। सोमा इन्द्राय मन्दिनः।
पवित्रवन्तो अक्षरन्। देवान् गच्छन्तु वो मदाः।। ८११
७. इन्दुरिन्द्राय पवते। इति देवासो अब्रुवन्।
वाचस्पतिर्मखस्यते। विश्वस्येशान ओजसा।। ८१२

८. सहस्रधारःपवते। समुद्रो वाचमीङ्खयः।
सोमःपतीरयीणाम्। सखेन्द्रस्य दिवे दिवे।। ८१३
९. पवित्रन्ते विततं ब्रह्मणस्पते। प्रभुर्गात्राणि पर्येषि विश्वतः।
अतप्ततनूर्णतदामो अश्नुते। शृतास इद्वहन्तस्सन्तदाशत।। ८१४
१०. तपोष्पवित्रं विततन्दिवस्पदे। शोचन्तो अस्य तन्तवो व्यस्थिरन्।
अवन्त्यस्य पवीतारमाशवः। दिवस्पृष्ठमधितिष्ठति तेजसा।। ८१५
११. अरूरुचदुषसःपृश्निरग्रयुः। उक्षामिमाति भुवनेषु वाजयुः।
मायाविनो ममिरे अस्य मायया। नृचक्षसःपितरो गर्भमादधुः।। ८१६
१२. प्र मंहिष्ठाय गायत। ऋताव्ने बृहते शुक्रशोचिषे।
उपस्तुतासो अग्नये।। ८१७
१३. आवंसते मघवा वीरवद्यशः। समिद्धो द्युम्न्याहुतः।
कुविन्नो अस्य सुमतिर्नवीयसी। अच्छा वाजेभिरागमत्।। ८१८
१४. तन्ते मदङ्गृणीमसि। वृषणं पृक्षुसासहिम्।
उलोककृत्नुमद्रिवो हरिश्रियम्।। ८१९
१५. येन ज्योतींष्यायवे। मनवे च विवेदिथ।
मन्दानो अस्य बर्हिषो विराजसि।। ८२०
१६. तदद्या चित्त उक्थिनः। अनुष्टुवन्ति पूर्वथा।
वृषपत्नीरपो जया दिवे दिवे।। ८२१
१७. श्रुधीहवन्तिरश्च्याः। इन्द्र यस्त्वा सपर्यति।
सुवीर्यस्य गोमतः। रायस्पूर्धिमहम् असि।। ८२२
१८. यस्त इन्द्र नवीयसीम्। गिरं मन्द्रामजीजनत्।
चिकित्विन् मनसन्धियम्। प्रत्नामृतस्य पिप्युषीम्।। ८२३
१९. तमुष्टवाम यज्ञिगरः। इन्द्रमुक्थानि वावृधुः।
पुरूण्यस्य पौंस्या। सिषासन्तो वनामहे।। ८२४

80

1. പ്ര ത അശ്വിനീഃ പവമാന ധേനവഃ/
ദിവ്യാ അസൃഗ്രൻ പയസാ ധരീമണി/
പ്രാന്തരിക്ഷാത് സ്ഥാവിരീസ്തേ അസൃക്ഷത/
യേ ത്വാ മൃജന്ത്യൃഷിഷാണ വേധസഃ/ 825
2. ഉഭയതഃ പവമാനസ്യ രശ്മയഃ/
ധ്രുവസ്യ സതഃ പരിയന്തി കേതവഃ/

യദീ പവിത്രേ അധി മൃജ്യതേ ഹരിഃ/
സത്താനി യോനൗ കലശേഷു സീദതി/ 826
3. വിശ്വാ ധാമാനി വിശ്വചക്ഷ ഋഭ്വസഃ/
പ്ര ഭോഷ്ടേ സതഃ പരിയന്തി കേതവഃ/
വ്യാനശീ പവസേ സോമ ധർമണാ/
പതിർവിശ്വസ്യ ഭുവനസ്യ രാജസി/ 827
4. പവമാനോ അജീജനത്/ ദിവശ്ചിത്രന്ന തന്യതും/
ജ്യോതിർവൈശ്വാനരം ബൃഹത്/ 828
5. പവമാനസ്യ തേ രസഃ/ മദോ രാജന്നദുച്ഛുനഃ/
വിവാരമവ്യമർഷതി/ 829
6. പവമാന രസസ്തവ/ ദക്ഷോ വിരാജതി ദ്യുമാൻ/
ജ്യോതിർവിശ്വം സ്വർദൃശേ/ 830
7. പ്ര യദ്ഗാവോ ന ഭൂർണയഃ/ തോഷാ അയാസോ അക്രമുഃ/
ഘ്നന്തഃ കൃഷ്ണാമപത്യചം/ 831
8. സുവിതസ്യ വനാമഹേ/ അതി സേതുന്ദുരായ്യം/
സാഹ്യാമ ദസ്യുമൗവ്രതം/ 832
9. ശൃണ്വേ വൃഷ്ടേരിവസ്വനഃ/ പവമാനസ്യ ശുഷ്മിണഃ/
ചരന്തി വിദ്യുതോ ദിവി/ 833
10. ആ പവസ്വ മഹീമിഷം/ ഗോമദിന്ദോ ഹിരണ്യവത്/
അശ്വവത് സോമവീരവത്/ 834
11. പവസ്വ വിശ്വചർഷണേ/ ആ മഹീ രോദസീ പൃണ/
ഉഷാസ്സൂര്യോ ന രശ്മിഭിഃ/ 835
12. പരി നശ്ശൂർമയന്ത്യാ/ ധാരയാ സോമ വിശ്വതഃ/
സരാ രസേവ വിഷ്ടപം/ 836
13. ആശുരർഷ ബൃഹന്മതേ/ പരി പ്രിയേണ ധാമ്നാ/
യത്ര ദേവാ ഇതി ബ്രുവൻ/ 837
14. പരിഷ്കൃണ്വന്നനിഷ്കൃതം/ ജനായ യാതയന്നിഷഃ/
വൃഷ്ടിന്ദിവഃ പരിസ്രവ/ 838
15. അയം സയോ ദിവസ്പരി/ രഘുയാമാ പവിത്ര ആ/
സിന്ധോരൂർമാ വ്യക്ഷരത്/ 839
16. സുത ഏതി പവിത്ര ആ/ ത്വിഷിന്ദധാന ഓജസാ/
വിചക്ഷാണോ വിരോചയൻ/ 840
17. അ വിവാസൻ[4] പരാവതഃ/ അഥോ അർവാവതസ്സുതഃ/
ഇന്ദ്രായ സിച്യതേ മധു/ 841
18. സമീചീനാ അനൂഷത/ ഹരിം ഹിന്വന്ത്യദ്രിഭിഃ/
ഇന്ദുമിന്ദ്രായ പീതയേ/ 842
19. ഹിന്വന്തി സൂരമുസ്രയഃ/ സ്വസാരോ ജാമയസ്പതിം/
മഹാമിന്ദും മഹീയുവഃ/ 843

20. പവമാന രുചാരുചാ/ ദേവദേവേഭ്യസ്സുതഃ/
വിശ്വാ വസൂന്യാവിശ/ 844
21. ആ പവമാനസുഷ്ടുതിം/ വൃഷ്ടിന്ദേവേഭ്യോ ദുവഃ/
ഇഷേ പവസ്വ സയ്യതം/ 845

८०

१. प्र त अश्विनीःपवमान धेनवः। दिव्या असृग्रन् पयसा धरीमणि।
प्रान्तरिक्षात् स्थाविरीस्ते असृक्षत। ये त्वा मृजन्त्यृषिषाण वेधसः।। ८२५
२. उभयतःपवमानस्य रश्मयः। ध्रुवस्य सतःपरियन्ति केतवः।
यदी पवित्रे अधि मृज्यते हरिः। सत्तानि योनौ कलशेषु सीदति।। ८२६
३. विश्वा धामानि विश्वचक्ष ऋभ्वसः। प्र भोष्टे सतःपरियन्ति केतवः।
व्यानशी पवसे सोम धर्मणा। पतिर्विश्वस्य भुवनस्य राजसि।। ८२७
४. पवमानो अजीजनत्। दिवश्चित्रन्न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत्।। ८२८
५. पवमानस्य ते रसः। मदो राजन्नदुच्छुनः। विवारमव्यमर्षति।। ८२९
६. पवमान रसस्तव। दक्षो विराजति द्युमान्। ज्योतिर्विश्वं स्वर्दृशे।। ८३०
७. प्र यत्गावो न भूर्णयः। त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णामपत्वचम्।। ८३१
८. सुवितस्य वनामहे। अति सेतुन्दुराय्यम्। साह्याम दस्युमौव्रतम्।। ८३२
९. शृण्वे वृष्टेरिवस्वनः। पवमानस्य शुष्मिणः। चरन्ति विद्युतो दिवि।। ८३३
१०. आ पवस्व महीमिषम्। गोमदिन्दो हिरण्यवत्। अश्ववत् सोमवीरवत्।। ८३४
११. पवस्व विश्वचर्षणे। आ मही रोदसी पृण। उषास्सूर्यो न रश्मिभिः।। ८३५
१२. परि नश्शर्मयन्त्या। धारया सोम विश्वतः। सरा रसेव विष्टपम्।। ८३६
१३. आशुरर्ष बृहन्मते। परि प्रियेण धाम्ना। यत्र देवा इति ब्रुवन्।। ८३७
१४. परिष्कृण्वन्ननिष्कृतम्। जनाय यातयन्निषः। वृष्टिन्दिवःपरिस्रव।। ८३८
१५. अयं सयो दिवस्परि। रघुयामा पवित्र आ। सिन्धोरूर्मा व्यक्षरत्।। ८३९
१६. सुत एति पवित्र आ। त्विषिन्दधान ओजसा। विचक्षाणो विरोचयन्।। ८४०
१७. अ विवासन् परावतः। अथो अर्वावतस्सुतः। इन्द्राय सिच्यते मधु।। ८४१
१८. समीचीना अनूषत। हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये।। ८४२
१९. हिन्वन्ति सूरमुस्रयः। स्वसारो जामयस्पतिम्। महामिन्दुम्महीयुवः।। ८४३
२०. पवमान रुचारुचा। देवदेवेभ्यस्सुतः। विश्वा वसून्याविश।। ८४४
२१. आ पवमानसुष्टुतिम्। वृष्टिन्देवेभ्यो दुवः। इषे पवस्व सय्यतम्।। ८४५

81

1. അഗ്നിർവൃത്രാണി ജങ്ഘനത്/ ദ്രവിണസ്യുർവിപന്യയാ/
   സമിദ്ധശ്ശുക്ര ആഹുതഃ/ 846
2. ഗർഭേ മാതുർപിതുഷ്പിതാ/ വിദിദ്യുതാനോ അക്ഷരേ/
   സീദന്നൃതസ്യ യോനിമാ/ 847
3. ബ്രഹ്മ പ്രജാവദാഭര/ ജാതവേദോ വിചർഷണേ/
   അഗ്നേ യദ്ദീദയദ്ദിവി/ 848
4. ജനസ്യഗോപാ അജനിഷ്ട ജാഗൃവിഃ/
   അഗ്നിസ്സുദക്ഷസ്സുവിതായ നവ്യസേ/
   ഘൃതപ്രതീകോ ബൃഹതാ ദിവിസ്പൃശാ/
   ദ്യുമദ്വിഭാതി ഭരതേഭ്യശ്ശുചിഃ/ 849
5. ത്വാമഗ്നേ അങ്ഗിരസോ ഗുഹാഹിതം/
   അന്വവിന്ദഞ്ഛിശ്രിയാണം വനേ വനേ/
   സ ജായസേ മഥ്യമാനസ്സഹോ മഹത്/
   ത്വാമാഹുസ്സഹസസ്പുത്രമങ്ഗിരഃ/ 850
6. യജ്ഞസ്യ കേതും പ്രഥമം പുരോഹിതം/
   അഗ്നിന്നരസ്ത്രിഷധസ്ഥേ സമിന്ധതേ/
   ഇന്ദ്രേണ ദേവൈസ്സരഥം സബർഹിഷി/
   സീദന്നിഹോതാ യജഥായ സുക്രതുഃ/ 851
7. അയം വാം മിത്രാവരുണാ/ സുതസ്സോമ ഋതാവൃധാ/
   മമേദിഹ ശ്രുതം ഹവം/ 852
8. രാജാനാവനഭിദ്രുഹാ/ ധ്രുവേ സദസ്യുത്തമേ/
   സഹസ്രസ്ഥൂണ ആസാതേ/ 853
9. താ സമ്രാജാ ഘൃതാ സുതീ/ ആദിത്യാ ദാനുനസ്പതീ/
   സചേതേ അനവഹ്വരം/ 854
10. ഇന്ദ്രോ ദധീചോ അസ്ഥഭിഃ/ വൃത്രാണ്യപ്രതിഷ്കുതഃ/
    ജഘാന നവതീർനവ/ 855
11. ഇച്ഛന്നശ്വസ്യ യച്ഛിരഃ/ പർവതേഷ്വപശ്രിതം/
    തദ്വിദച്ഛര്യണാവതി/ 856
12. അത്രാഹ ഗോരമന്വത/ നാമ ത്വഷ്ടുരപീച്യം/
    ഇത്ഥാ ചന്ദ്രമസോ ഗൃഹേ/ 857
13. ഇയം വാമസ്യ മന്മനഃ/ ഇന്ദ്രാഗ്നീ പൂർവ്യസ്തുതിഃ/
    അഭ്രാദ്വൃഷ്ടിരിവാജനി/ 858
14. ശൃണുതഞ്ജരിതുർഹവം/ ഇന്ദ്രാഗ്നീ വനതങ്ഗിരഃ/
    ഈശാനാ പിപ്യതന്ധിയഃ/ 859
15. മാ പാപത്വായ നോ നരാ/ ഇന്ദ്രാഗ്നീമാഭിശസ്തയേ/ന
    മാ നോ രീരധതന്നിദേ/ 860

८१

१. अग्निर्वृत्राणि जङ्घनत्। द्रविणस्युर्विपन्यया। समिद्धश्शुक्र आहुतः।। ८४६
२. गर्भे मातुःपितुष्पिता। विदिद्युतानो अक्षरे। सीदन्नृतस्य योनिमा।। ८४७
३. ब्रह्म प्रजावदाभर। जातवेदो विचर्षणे। अग्ने यद्दीदयद्दिवि।। ८४८
४. जनस्य गोपा अजनिष्ट जागृविः। अग्निस्सुदक्षस्सुविताय नव्यसे।
घृतप्रतीको बृहता दिविस्पृशा। द्युमद्विभाति भरतेभ्यश्शुचिः।। ८४९
५. त्वामग्ने अङ्गिरसो गुहाहितम्। अन्वविन्दञ्छिश्रियाणं वने वने।
स जायसे मथ्यमानस्सहो महत्। त्वामाहुस्सहसस्पुत्रमङ्गिरः।। ८५०
६. यज्ञस्य केतुं प्रथमं पुरोहितम्। अग्निन्नरस्त्रिषधस्थे समिन्धते।
इन्द्रेण देवैस्सरथं सबर्हिषि। सीदन्निहोता यजथाय सुक्रतुः।। ८५१
७. अयं वां मित्रावरुणा। सुतस्सोम ऋतावृधा। ममेदिह श्रुतं हवम्।। ८५२
८. राजानावनभिद्रुहा। ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते।। ८५३
९. ता सम्राजा घृता सुती। आदित्या दानुनस्पती। सचेते अनवह्वरम्।। ८५४
१०. इन्द्रो दधीचो अस्थभिः। वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव।। ८५५
११. इच्छन्नश्वस्य यच्छिरः। पर्वतेष्वपश्रितम्। तद्विदच्छर्यणावति।। ८५६
१२. अत्राह गोरमन्वत। नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे।। ८५७
१३. इयं वामस्य मन्मनः। इन्द्राग्नी पूर्व्यस्तुतिः। अभ्राद्वृष्टिरिवाजनि।। ८५८
१४. शृणुतञ्जरितुर्हवम्। इन्द्राग्नी वनतङ्गिरः। ईशाना पिप्यतन्धियः।। ८५९
१५. मा पापत्वाय नो नरा। इन्द्राग्नीमाभिशस्तये। मा नो रीरधतन्निदे।। ८६०

82

1. പവസ്വ ദക്ഷസാധനഃ/ ദേവേഭ്യഃ പീതയേ ഹരേ/
മരുദ്ഭ്യോ വായവേ മദഃ/ 861
2. സന്ദേവൈശ്ശോഭതേ വൃഷാ/ കവിർയോനാവധിപ്രിയഃ/
പവമാനോ അദാഭ്യഃ/ 862
3. പവമാനധിയാ ഹിതഃ/ അഭി യോനിങ്കനിക്രദത്/
ധർമണാ വായുമാരുഹ/ 863
4. തവാഹം സോമ രാരണ/ സഖ്യ ഇന്ദോ ദിവേ ദിവേ/
പുരൂണി ബഭ്രോ നിചരന്തി മാമവ/ പരിധീം രതിതം ഇഹി/ 864
5. തവാഹന്നക്തമുതസോമ തേ ദിവാ/ ദുഹാനോ ബഭ്ര ഊധനീ/
ഘൃണാതപന്തമതിസൂര്യം പരഃ/ ശകുനാ ഇവ പപ്തിമ/ 865

6. പുനാനോ അക്രമീദഭി/ വിശ്വാ മൃധോ വിചർഷണിഃ/
ശുംഭന്തി വിപ്രന്ധീതിഭിഃ/ 866
7. ആ യോനിമരുണോ രുഹത്/
ഗമദിന്ദ്രോ വൃഷാ സുതേ/
ധ്രുവേ സദസി സീദതു/ 867
8. നൂനോ രയിം മഹാമിന്ദോ/
അസ്മഭ്യം സോമ വിശ്വതഃ/
ആ പവസ്വ സഹസ്രിണം/ 868
9. പിബാ സോമമിന്ദ്ര മന്ദതു ത്വാ/
യന്തേ സുഷാവ ഹര്യശ്വാദ്രിഃ/
സോതുർബാഹുഭ്യാം സുയതോ നാർവാ/ 869
10. ബോധാസുമേ മഘവൻ വാചമേമാം/
യാന്തേ വസിഷ്ഠോ അർചതി പ്രശസ്തിം/
ഇമാ ബ്രഹ്മ സധമാദേ ജുഷസ്വ/ 870
11. യസ്തേ മദോ യുജ്യശ്ചാരുരസ്തി/
യേന വൃത്രാണി ഹര്യശ്വ ഹംസി/
സത്വാമിന്ദ്ര പ്രഭൂവസോ മമത്തു/ 871
12. വിശ്വാഃ പൃതനാ അഭിഭൂതരന്നരഃ/
സജൂസ്തതക്ഷുരിന്ദ്രഞ്ജ്ജനുശ്ച രാജസേ/
ക്രത്വേവരേസ്ഥമന്യാമുരീമുത/
ഉഗ്രമോജിഷ്ഠം തരസന്തരസ്വിനം/ 872
13. നേമിന്നമന്തി ചക്ഷസാ/
മേഷം വിപ്രാ അഭിസ്വരേ/
സുദീതയോ വോ അദ്രുഹഃ/
അപികർണേ തരസ്വിനഃ സമൃക്വഭിഃ/ 873
14. സമുരേഭാസോ അസ്വരൻ/
ഇന്ദ്രം സോമസ്യ പീതയേ/
സ്വഃ പതിര്യദീവൃധേ ധൃതവ്രതോ/
ഹ്യോജസാ സമൂതിഭിഃ/ 874
15. യോ രാജാ ചർഷണീനാം/
യാതാ രഥേഭിരധ്രിഗുഃ/
വിശ്വാസാന്തരുതാ പൃതനാനാം/
ജ്യേഷ്ഠയ്യോ വൃത്രഹാ ഗൃണേ/ 875
16. ഇന്ദ്രന്തം ശുംഭ പുരുഹന്മന്നവസേ/
യസ്യ ദ്വിതാ വിധർതരി/
ഹസ്തേന വജ്രഃ പതിധായി ദർശതഃ/
മഹാന്ദേവോ ന സൂര്യഃ/ 876

८२

१. पवस्व दक्षसाधनः। देवेभ्यःपीतये हरे। मरुत्भ्यो वायवे मदः।। ८६१

२. सन्देवैश्शोभते वृषा। कविर्योनावधिप्रियः। पवमानो अदाभ्यः।। ८६२

३. पवमानधिया हितः। अभि योनिङ्कनिक्रदत्। धर्मणा वायुमारुह।। ८६३

४. तवाहं सोम रारण। सख्य इन्दो दिवे दिवे।
पुरूणि बभ्रो निचरन्ति मामव। परिधीं रति तम् इहि।। ८६४

५. तवाहन्नक्तमुतसोम ते दिवा। दुहानो बभ्र ऊधनी।
घृणातपन्तमतिसूर्यं परः। शकुना इव पप्तिम।। ८६५

६. पुनानो अक्रमीदभि। विश्वा मृधो विचर्षणिः। शुंभन्ति विप्रन्धीतिभिः।। ८६६

७. आ योनिमरुणो रुहत्। गदमिन्द्रो वृषा सुते। ध्रुवे सदसि सीदतु।। ८६७

८. नूनो रयिं महामिन्दो। अस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम्।। ८६८

९. पिबा सोममिन्द्र मन्दतु त्वा। यन्ते सुषाव हर्यश्वाद्रिः।
सोतुर्बाहुभ्यां सुयतो नार्वा।। ८६९

१०. बोधासुमे मघवन् वाचमेमाम्। यान्ते वसिष्ठो अर्चति प्रशस्तिम्।
इमा ब्रह्म सधमादे जुषस्व।। ८७०

११. यस्ते मदो युज्यश्चारुरस्ति। येन वृत्राणि हर्यश्व हंसि।
सत्वामिन्द्र प्रभूवसो ममत्तु।। ८७१

१२. विश्वाः पृतना अभिभूतरन्नरः। सजूस्ततक्षुरिन्द्रञ्जजनुश्च राजसे।
क्रत्वेवरेस्थेमन्यामुरीमुत। उग्रमोजिष्ठन्तरसन्तरस्विनम्।। ८७२

१३. नेमिन्नमन्ति चक्षसा। मेषं विप्रा अभिस्वरे।
सुदीतयो वो अद्रुहः। अपिकर्णे तरस्विनस्समृक्वभिः।। ८७३

१४. समुरेभासो अस्वरन्। इन्द्रं सोमस्य पीतये।
स्वःपतिर्यदीवृधे। धृतव्रतो ह्योजसा समूतिभिः।। ८७४

१५. यो राजा चर्षणीनाम्। याता रथेभिरध्रिगुः।
विश्वासान्तरुता पृतनानाम्। ज्येष्ठय्यो वृत्रहा गृणे।। ८७५

१६. इन्द्रन्तं शुंभ पुरुहन्मन्नवसे। यस्य द्विता विधर्तरि।
हस्तेन वज्रःपतिधायि दर्शतः। महान्देवो न सूर्यः।। ८७६

83

1. പരിപ്രിയാ ദിവഃ കവിഃ/ വയാംസി നപ്ത്യോർഹിതഃ/
സ്വാനൈര്യാതി കവിക്രതുഃ/ 877
2. പ്രപ്രക്ഷയായ പന്യസേ/ ജനായ ജുഷ്ടോ അദ്രുഹഃ/
വീത്യർഷപനിഷ്ടയേ/ 878
3. സസൂനുർമാതരാ ശുചിഃ/ ജാതോ ജാതേ അരോചയത്/
മഹാൻ മഹീ ഋതാ വൃധാ/ 879
4. ത്വം ഹ്യാങ്ഗ ദൈവ്യ/ പവമാനജനിമാനി ദ്യുമത്തമഃ/
അമൃതത്വായ ഘോഷയൻ/ 880
5. യേനാ നവഗ്വാ ദധ്യങ്ങപോർണുതേ/ യേന വിപ്രാസ ആപിരേ/
ദേവാനാം സുമ്നേ അമൃതസ്യ ചാരുണി/
യേന ശ്രവാംസ്യാശത/ 881
6. സോമഃപുനാന ഊർമിണാ/ അവ്യം വാരം വിധാവതി/
അഗ്രേ വാചഃപവമാനഃ കനിക്രദത്/ 882
7. ധീഭിർമൃജന്തി വാജിനം/ വനേ കീളന്തമത്യവിം/
അഭിത്രിപൃഷ്ഠം മതയസ്സുമസ്വരൻ/ 883
8. അസർജി കലശം അഭി/ മീഢ്വാൻ സപ്തിർന വാജയുഃ/
പുനാനോ വാചഞ്ജനയന്നസിഷ്യദത്/ 884
9. സോമഃ പവതേ ജനിതാ മതീനാം/
ജനിതാ ദിവോ ജനിതാ പൃഥിവ്യാഃ/
ജനിതാഗ്നേർജനിതാ സൂര്യസ്യ/
ജനിതേന്ദ്രസ്യ ജനിതോത വിഷ്ണോഃ/ 885
10. ബ്രഹ്മാ ദേവാനാം പദവിഃ കവീനാം/
ഋഷിർവിപ്രാണാം മഹിഷോ മൃഗാണാം/
ശ്യേനോ ഗൃധ്രാണാം സ്വധിതിർവനാനാം/
സോമഃ പവിത്രമത്യേതി രേഭൻ/ 886
11. പ്രാവീവിപദ്വാച ഊർമിന്നസിന്ധുഃ/
ഗിരസ്തോമാൻ പവമാനോ മനീഷാഃ/
അന്തഃപശ്യന്വൃജനേമാവരാണി/
ആതിഷ്ഠതി വൃഷഭോ ഗോഷു ജാനൻ/ 887
12. അഗ്നിം വോ വൃധന്തം/ അധ്വരാണാം പുരൂതമം/
അച്ഛാ നപ്ത്രേ സഹസ്വതേ/ 888
13. അയം യഥാ ന ആഭുവത്/ ത്വഷ്ടാ രൂപേവ തക്ഷ്യാ/
അസ്യ ക്രത്വാ യശസ്വതഃ/ 889
14. അയം വിശ്വാ അഭി ശ്രിയഃ/ അഗ്നിർദേവേഷു പത്യതേ/
ആവാജൈരുപ നോ ഗമത്/ 890

15. ഇമമിന്ദ്ര സുതം പിബ/ ജ്യേഷ്ഠമമർത്യം മദം/
ശുക്രസ്യ ത്വാഭ്യക്ഷരൻ/
ധാരാ ഋതസ്യ സാദനേ/ 891
16. നകിഷ്ടദ്രഥീതരഃ/ ഹരീ യദിന്ദ്ര യച്ഛസേ/
നകിഷ്ടാനു മജ്മനാ/ ന കി സ്വശ്ച ആനശേ/ 892
17. ഇന്ദ്രായ നൂനമർചത/ ഉക്ഥാനി ച ബ്രവീതന/
സുതാ അമത്സുരിന്ദവഃ/ ജ്യേഷ്ഠന്നമസ്യതാ സഹഃ/ 893

८३

१. परिप्रिया दिवः कविः। वयांसि नप्त्योरहितः। स्वानैर्याति कविक्रतुः।। ८७७
२. प्रप्रक्षयाय पन्यसे। जनाय जुष्टो अद्रुहः। वीत्यर्षपनिष्टये।। ८७८
३. ससूनुर्मातरा शुचिः। जातो जाते अरोचयत्। महान् मही ऋता वृधा।। ८७९
४. त्वं ह्याङ्ग दैव्य। पवमानजनिमानि द्युमत्तमः। अमृतत्वाय घोषयन्।। ८८०
५. येना नवग्वा दध्यङ्ङपोर्णुते। येन विप्रास आपिरे।
देवानां सुम्ने अमृतस्य चारुणि। येन श्रवांस्याशत।। ८८१
६. सोमः पुनान ऊर्मिणा। अव्यं वारं विधावति।
अग्रे वाचःपवमानः कनिक्रदत्।। ८८२
७. धीभिर्मृजन्ति वाजिनम्। वने कीळन्तमत्यविम्।
अभित्रिपृष्ठं मतयस्समस्वरन्।। ८८३
८. असर्जि कलशम् अभि। मीढ्वान् सप्तिर्न वाजयुः।
पुनानो वाचञ्जनयन्नसिष्यदत्।। ८८४
९. सोमःपवते जनिता मतीनाम्। जनिता दिवो जनिता पृथिव्याः।
जनिताग्नेर्जनिता सूर्यस्य। जनितेन्द्रस्य जनितोत विष्णोः।। ८८५
१०. ब्रह्मा देवानं पदविः कवीनाम्। ऋषिर्विप्राणाम्महिषो मृगाणाम्।
श्येनो गृध्राणां स्वधितिर्वनानाम्। सोमःपवित्रमत्येति रेभन्।। ८८६
११. प्रावीविपद्वाच ऊर्मिन्नसिन्धुः। गिरस्तोमान् पवमानो मनीषाः।
अन्तःपश्यन्वृजनेमावराणि। आतिष्यति वृषभो गोषु जानन्।। ८८७
१२. अग्निं वो वृधन्तम्। अध्वराणाम्पुरूतमम्। अच्छा नप्त्रे सहस्वते।। ८८८
१३. अयं यथा न आभुवत्। त्वष्टा रूपेव तक्ष्या। अस्य क्रत्वा यशस्वतः।। ८८९
१४. अयं विश्वा अभिश्रियः। अग्निर्देवेषु पत्यते। आवाजैरुप नो गमत्।। ८९०
१५. इममिन्द्र सुतं पिब। ज्येष्ठममर्त्यं मदम्।
शुक्रस्य त्वाभ्यक्षरन्। धारा ऋतस्य सादने।। ८९१

१६. नकिष्ट्वद्रथीतरः। हरी यदिन्द्र यच्छसे।
नकिष्ट्वानु मज्मना। न कि स्वश्व आनशे।। ८९२
१७. इन्द्राय नूनमर्चत। उक्थानि च ब्रवीतन।
सुता अमत्सुरिन्दवः। ज्येष्ठन्नमस्यता सहः।। ८९३

84

1. ഗോവിത്പവസ്വ വസുവിദ്ധിരണ്യവിത്/
രേതോധാ ഇന്ദോ ഭുവനേഷ്വർപിതഃ/
ത്വം സുവീരോ അസി സോമ വിശ്വവിത്/
തന്ത്വാ വിപ്ര ഉപ ഗിരേമ ആസതേ/ 894
2. ത്വന്നശ്ചക്ഷാ അസി സോമ വിശ്വതഃ/
പവമാനവൃഷഭതാവിധാവസി/
സനഃപവസ്വ വസുമദ്ധിരണ്യവത്/
വയം സ്യാമ ഭുവനേഷു ജീവസേ/ 895
3. ഈശാന ഇമാ ഭുവനാനി വീയസേ/
യുജാന ഇന്ദോ ഹരിതസ്സുപർണ്യഃ/
താസ്തേ ക്ഷരന്തു മധുമത് ഘൃതം പയഃ/
തവ വ്രതേ സോമ തിഷ്ഠന്തു കൃഷ്ടയഃ/ 896
4. പവമാനസ്യ വിശ്വവിത്/ പ്ര തേ സർഗാ അസൃക്ഷത/
സൂര്യസ്യേവ ന രശ്മയഃ/ 897
5. കേതും കൃണ്വന്ദിവസ്പരി/ വിശ്വാ രൂപാഭ്യർഷസി/
സമുദ്രസ്സോമ പിന്വസേ/ 898
6. ജജ്ഞാനോ വാചമിഷ്യസി/ പവമാനവിധർമണി/
ക്രന്ദന്നേവോ ന സൂര്യഃ/ 899
7. പ്ര സോമാസോ അധന്വിഷുഃ/ പവമാനാസ ഇന്ദവഃ/
ശ്രീണാനാ അപ്സു വൃഞ്ജതേ/ 900
8. അഭി ഗാവോ അധന്വിഷുഃ/ ആപോ ന പ്രവതാ യതീഃ/
പുനാനാ ഇന്ദ്രമാശത/ 901
9. പ്ര പവമാന ധന്വസി/ സോമേന്ദ്രായ മാദനഃ/
നൃഭിര്യതോ വിനീയസേ/ 902
10. ഇന്ദോ യദദ്രിഭിസ്സുതഃ/ പവിത്രം പരിധീയസേ/
അരമിന്ദ്രസ്യ ധാമ്നേ/ 903
11. ത്വം സോമ നൃമാദനഃ/ പവസ്വ ചർഷണീ ധൃതിഃ/
സസ്നിർയോ അനുമാദ്യഃ/ 904
12. പവസ്വ വൃത്രഹന്തമഃ/ ഉക്ഥേഭിരനുമാദ്യഃ/
ശുചിഃപാവകോ അദ്ഭുതഃ/ 905

13. ശുചിഃപാവക ഉച്യതേ/ സോമസ്സുതസ്സമധുമാൻ/
ദേവാവീരഘ്നശംസഹാ/ 906
14. പ്ര കവിർദേവവീതയേ/ അവ്യാവാരേഭിരവ്യത/
സാഹ്വാൻ വിശ്വാ അഭിസ്പൃധഃ/ 907
15. സഹിഷ്മാ ജരിത്രഭ്യ ആ/ വാജങ്ഗോമന്തമിന്വതി/
പവമാനസ്സിഷാസതി/ 908
16. പരി വിശ്വാനി ചേതസാ/ മൃജ്യസേ പവസേ മതീ/
സനസ്സോമ ശ്രവോവിദഃ/ 909
17. അഭ്യർഷ ബൃഹദ്യശഃ/ മഘവദ്ഭ്യോ ധ്രുവം രയിം/
ഇഷം സ്തോതൃഭ്യ ആ ഭര/ 910
18. ത്വം രാജേവ സുവ്രതഃ/ ഗിരസ്സോമാ വിവേശിഥ/
പുനാനോ വഹ്നേ അദ്ഭുത/ 911
19. സ വഹനിരപ്സു ദുഷ്ടരഃ/ മൃജ്യമാനോ ഗഭസ്ത്യോഃ/
സോമശ്ചമൂഷു സീദതി/ 912
20. ക്രീഡുർമഖോ ന മംഹയുഃ/ പവിത്രം സോമ ഗച്ഛസി/
ദധത് സ്തോത്രേ സുവീര്യം/ 913
21. യവ്യവന്നോ അന്ധസാ/ പുഷ്ടം പുഷ്ടം പരിസ്രവ/
വിശ്വാ ച സോമ സൗഭഗാ/ 914
22. ഇന്ദോ യഥാ തവസ്തവഃ/ യഥാ തേ ജാതമന്ധസഃ/
നി ബർഹിഷി പ്രിയേ സദഃ/ 915
23. ഉത നോ ഗോവിദശ്വവിത്/ പവസ്വ സോമാന്ധസാ/
മക്ഷൂ തമേഭിരഹഭിഃ/ 916
24. യോ ജിനാതി ന ജീയതേ/ ഹന്തി ശത്രുമഭീത്യ/
സ പവസ്വ സഹസ്രജിത്/ 917
25. യാസ്തേ ധാരാ മധുശ്ചുതഃ/ അസ്യഗ്രമിന്ദ ഊതയേ/
താഭിഃ പവിത്രമാസദഃ/ 918
26. സോ അർഷേന്ദ്രായ പീതയേ/ തിരോ വാരണ്യവ്യയാ/
സീദന്നൃതസ്യ യോനിമാ/ 919
27. ത്വം സോമ പരിസ്രവ/ സ്വാദിഷ്ഠോ അങ്ഗിരോഭ്യഃ/
വരിവോ വിത് ഘൃതം പയഃ/ 920

८४

१. गोवित्पवस्व वसुविद्धिरण्यवित्। रेतोधा इन्दो भुवनेष्वर्पितः।
त्वं सुवीरो असि सोम विश्ववित्। तन्त्वा विप्र उप गिरेम आसते।। ८९४
२. त्वन्नृचक्षा असि सोम विश्वतः। पवमानवृषभताविधावसि।
सनःपवस्व वसुमद्धिरण्यवत्। वयं स्याम भुवनेषु जीवसे।। ८९५

३. ईशान इमा भुवनानि वीयसे। युजान इन्दो हरितस्सुपर्ण्यः।
तास्ते क्षरन्तु मधुमत् घृतं पयः। तव व्रते सोम तिष्टन्तु कृष्टयः।। ८९६
४. पवमानस्य विश्ववित्। प्र ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः।। ८९७
५. केतुं कृण्वन्दिवस्परि। विश्वा रूपाभ्यर्षसि। समुद्रस्सोम पिन्वसे।। ८९८
६. जज्ञानो वाचमिष्यसि। पवमानविधर्मणि। क्रन्दन्देवो न सूर्यः।। ८९९
७. प्र सोमासो अधन्विषुः। पवमानास इन्दवः। श्रीणाना अप्सु वृञ्जते।। ९००
८. अभि गावो अधन्विषुः। आपो न प्रवता यतीः। पुनाना इन्द्रमाशत।। ९०१
९. प्र पवमान धन्वसि। सोमेन्द्राय मादनः। नृभिर्यतो विनीयसे।। ९०२
१०. इन्दो यदद्रिभिस्सुतः। पवित्रं परिदीयसे। अरमिन्द्रस्य धाम्ने।। ९०३
११. त्वं सोम नृमादनः। पवस्व चर्षणी धृतिः। स्वर्स्निर्यो अनुमाद्यः।। ९०४
१२. पवस्व वृत्रहन्तमः। उक्थेभिरनुमाद्यः। शुचिः पावको अत्भुतः।। ९०५
१३. शुचिःपावक उच्यते। सोमस्सुतस्समधुमान्। देवावीरघशंसहा।। ९०६
१४. प्र कविर्देववीतये। अव्यावारेभिरव्यत। साह्वान् विश्वा अभिस्पृधः।। ९०७
१५. सहिष्मा जरितृभ्य आ। वाजङ्गोमन्तमिन्वति। पवमानस्सिषासति।। ९०८
१६. परि विश्वानि चेतसा। मृज्यसे पवसे मती। सनस्सोम श्रवोविदः।। ९०९
१७. अभ्यर्ष बृहद्यशः। मघवत्भ्यो ध्रुवं रयिम्। इषं स्तोतृभ्य आ भर।। ९१०
१८. त्वं राजेव सुव्रतः। गिरस्सोमा विवेशिथ। पुनानो वह्ने अत्भुत। ।९११
१९. स वह्निरप्सु दुष्टरः। मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति।। ९१२
२०. क्रीडुर्मखो न मंहयुः। पवित्रं सोम गच्छसि। दधत् स्तोत्रे सुवीर्यम्।। ९१३
२१. यवय्यवन्नो अन्धसा। पुष्टं पुष्टं परिस्रव। विश्वा च सोम सौभगा।। ९१४
२२. इन्दो यथा तवस्तवः। यथा ते जातमन्धसः नि बर्हिषि प्रिये सदः।। ९१५
२३. उत नो गोविदश्ववित्। पवस्व सोमान्धसा। मक्षू तमेभिरहभिः।। ९१६
२४. यो जिनाति न जीयते। हन्ति शत्रुमभीत्य। स पवस्व सहस्रजित्।। ९१७
२५. यास्ते धारा मधुश्चुतः। असृग्रमिन्द ऊतये। ताभिःपवित्रमासदः।। ९१८
२६. सो अर्षेन्द्राय पीतये। तिरो वारण्यव्यया। सीदन्नृतस्य योनिमा।। ९१९
२७. त्वं सोम परिस्रव। स्वादिष्ठो अङ्गिरोभ्यः। वरिवो वित् घृतं पयः।। ९२०

85

1. അഗ്നേ സ്തോമം മനാമഹേ/ സിധ്രമദ്യ ദിവിസ്പൃശഃ/
ദേവസ്യ ദ്രവിണസ്യ വഃ/ 921
2. അഗ്നിർജുഷത നോ ഗിരഃ/ ഹോതാ യോ മാനുഷേഷ്വാ/
സ യക്ഷദ്ദൈവ്യഞ്ജനം/. 922

3. ത്വമഗ്നേ സപ്രഥാ അസി/ ജുഷ്ടോ ഹോതാ വരേണ്യഃ/
ത്വയാ യജ്ഞം വിതന്വതേ/ 923
4. തവ ശ്രിയോ വർഷ്യസ്യേവ വിദ്യുതഃ/
അഗ്നേ ചികിത്വ ഉഷസാമിവേതയഃ/
യദോഷധീരഭിസൃഷ്ടോ വനാനി ച/
പരിസ്രയഞ്ചിനുഷേ അന്നമാസനി/ 924
5. വാതോപജൂത ഇഷിതോ വശം അനു/
ത്രിഷു യദന്നാവേവിഷദ്വിതിഷ്ഠസേ/
ആ തേ യതന്തേ രഥ്യോ യഥാ പൃഥക്/
ശർധാംസ്യഗ്നേ അജരസ്യ ധക്ഷതഃ/ 925
6. മേധാകാരം വിദഥസ്യ പ്രസാധനം/
അഗ്നിം ഹോതാരം പരിഭൂതമം മതിം/
ത്വാമർഭസ്യ ഹവിഷസ്സമാനമിത്/
ത്വാം മഹോ വൃണതേ നൗന്യന്ത്വത്/ 926
7. പുരൂരുണാ ചിദ്ധ്യസ്തി/ അവോ നൂനം വാം വരുണ/
മിത്ര വംസി വാം സുമതിം/ 927
8. താ വാം സമ്യഗദ്രുഹ്വാണാ/ ഇഷമശ്യാമ ധാമ ച/
വയം വാം മിത്രാ സ്യാമ/ 928
9. പാതന്നോ മിത്രാ പായുഭിഃ/ ഉത ത്രായേഥാം സുത്രാത്രാ/
സാഹ്യാമ ദസ്യൂംസ്തനൂഭിഃ/ 929
10. ഉത്തിഷ്ഠന്നോജസാ സഹ/ പീത്വാ ശിപ്രേ അവേപയഃ/
സോമമിന്ദ്ര ചമൂസുതം/ 930
11. അനുത്വാ രോദസീ ഉഭേ/ സ്പർധമാനമദദാതാം/
ഇന്ദ്ര യദ്ദസ്യുഹാ ഭവഃ/ 931
12. വാചമഷ്ടാപദീമഹം/ നവസ്രക്തിമൃതാ വൃധം/
ഇന്ദ്രാത് പരിതന്വമ്മമേ/ 932
13. ഇന്ദ്രാഗ്നീ യുവാമിമേ/ അഭിസ്തോമാ അനൂഷത/
പിബതം ശംഭുവാ സുതം/ 933
14. യാ വാം സന്തി പുരുസ്പൃഹ/ നിയുതോ ദാശുഷേ നരാ/
ഇന്ദ്രാഗ്നീ താഭിരാഗതം/ 934
15. താഭിരാഗച്ഛതന്നരാ/ ഉപേദം സവനം സുതം/
ഇന്ദ്രാഗ്നീ സോമ പീതയേ/ 935

८५

१. अग्ने स्तोमं मनामहे। सिध्रमद्य दिविस्पृशः। देवस्य द्रविणस्य वः।। ९२१
२. अग्निर्जुषत नो गिरः। होता यो मानुषेष्वा। स यक्षद्दैव्यञ्जनम्।। ९२२
३. त्वमग्ने सप्रथा असि। जुष्टो होता वरेण्यः। त्वया यज्ञं वितन्वते।। ९२३

४. तव श्रियो वर्ष्यस्येव विद्युतः। अग्ने चिकित्व उषसामिवेतयः।
यदोषधीरभिसृष्टो वनानि च। परिस्वयञ्चिनुषे अन्नमासनि।। ९२४
५. वातोपजूत इषितो वशम् अनु। त्रिषु यदन्नावेविषद्वितिष्ठसे।
आ ते यतन्ते रथ्यो यथा पृथक्। शर्धांस्यग्ने अजरस्य धक्षतः।। ९२५
६. मेधाकारं विदथस्य प्रसाधनम्। अग्निं होतारं परिभूतमं मतिम्।
त्वामर्भस्य हविषस्समानमित्। त्वां महो वृणते नान्यन्त्वत्।। ९२६
७. पुरूरुणा चिद्ध्यस्ति। अवो नूनं वां वरुण। मित्र वंसि वां सुमतिम्।। ९२७
८. ता वां सम्यगद्रुह्वाणा। इषमश्याम धाम च। वयं वां मित्रा स्याम।। ९२८
९. पातन्नो मित्रा पायुभिः। उत त्रायेथां सुत्रात्रा। साह्याम दस्यूंस्तनूभिः।। ९२९
१०. उत्तिष्ठन्नोजसा सह। पीत्वा शिप्रे अवेपयः। सोममिन्द्र चमूसुतम्।। ९३०
११. अनुत्वा रोदसी उभे। स्पर्धमानमददाताम्। इन्द्र यद्दस्युहा भवः।। ९३१
१२. वाचमष्टापदीमहम्। नवस्रक्तिमृता वृधम्। इन्द्रात् परितन्वम्ममे।। ९३२
१३. इन्द्राग्नी युवामिमे। अभिस्तोमा अनूषत। पिबतं शंभुवा सुतम्।। ९३३
१४. या वां सन्ति पुरुस्पृहः। नियतो दाशुषे नराः। इन्द्राग्नी ताभिरागतम्।। ९३४
१५. ताभिरागच्छतन्नरा। उपेदं सवनं सुतम्। इन्द्राग्नी सोम पीतये।। ९३५

86

1. അർഷാ സോമ ദ്യുമത്തമഃ/ അഭി ദ്രോണാനി രോരുവത്/
സീദന്യോനൗ വനേഷ്വാ/ 936
2. അപ്സാ ഇന്ദ്രായ വായവേ/ വരുണായ മരുദ്ഭ്യഃ/
സോമാ അർഷന്തു വിഷ്ണവേ/ 937
3. ഇഷന്തോകായ നോ ദധത്/ അസ്മഭ്യം സോമ വിശ്വതഃ/
ആ പവസ്വ സഹസ്രിണം/ 938
4. സോമ ഉഷ്വാണസ്സോത്യഭിഃ/ അധിഷ്ണുഭിരവീനാം/
അശ്വയേവ ഹരിതാ യാതി ധാരയാ/
മന്ദ്രയാ യാതി ധാരയാ/ 939
5. അനൂപേ ഗോമാൻ ഗോഭിരക്ഷാഃ/ സോമോ ദുഗ്ധാഭിരക്ഷാഃ/
സമുദ്രന്നസംവരണാന്യഗ്മൻ/ മന്ദീ മദായ തോശതേ/ 940
6. യത്സോമ ചിത്രമുക്ഥ്യം/ ദിവ്യം പാർഥിവം വസു/
തന്നഃ പുനാന ആഭര/ 941
7. വൃഷാ പുനാന ആയൂംഷി/ സ്തനയന്നധി ബർഹിഷി/
ഹരിസ്സന്യോനിമാസദഃ/ 942
8. യുവം ഹി സ്ഥ സ്വഃപതീ/ ഇന്ദ്രശ്ച സോമ ഗോപതീ/
ഈശാനാ പിപ്യതന്ധിയഃ/ 943

9. ഇന്ദ്രോ മദായ വാവൃധേ/ ശവസേ വൃത്രഹാനൃഭിഃ/
തമിന്മഹത്സ്വാജിഷു ഊതിമർഭേ ഹവാമഹേ/
സ വാജേഷു പ്ര നോവിഷത്/ 944
10. അസി ഹി വീര സേന്യഃ/ അസി ഭൂരി പരാദദിഃ/
അസി ദഭ്രസ്യ ചിദ്വൃധഃ/ യജമാനായ ശിക്ഷസി/
സുന്വതേ ഭൂരി തേ വസു/ 945
11. യദുദീരത ആ ജയഃ/ ധൃഷ്ണവേ ധീയതേ ധനം/
യുങ്ക്ഷ്വാ മദച്യുതാ ഹരീ/ കം ഹ നഃ കം വസൗ ദധഃ/
അസ്മം ഇന്ദ്ര വസൗ ദധഃ/ 946
12. സ്വാദോരിത്ഥാ വിഷൂവതഃ/ മധ്വോഃപിബന്തി ഗൗര്യഃ/
യാ ഇന്ദ്രേണ സയാവരീഃ/ വൃഷ്ണാ മദന്തി ശോഭഥാ/
വസ്വീരനുസ്വരാജ്യം/ 947
13. താ അസ്യ പൃശനാ യുവഃ/ സോമം ശ്രീണന്തി പൃശ്നയഃ/
പ്രിയാ ഇന്ദ്രസ്യ ധേനവഃ/ വജ്രം ഹിന്വന്തി സായകം/
വസ്വീരനുസ്വരാജ്യം/ 948
14. താ അസ്യ നമസാ സഹഃ/ സപര്യന്തി പ്രചേതസഃ/
വ്രതാന്യസ്യ സശ്ചിരേ/ പുരൂണി പൂർവചിത്തയേ/
വസ്വീരനുസ്വരാജ്യം/ 949

८६

१. अर्षा सोम द्युमत्तमः। अभिद्रोणानि रोरुवत्। सीदन्योनौ वनेष्वा।। ९३६
२. अप्सा इन्द्राय वायवे। वरुणाय मरुत्भ्यः। सोमा अर्षन्तु विष्णवे।। ९३७
३. इषन्तोकाय नो दधत्। अस्मभ्यं सोम विश्वतः। आ पवस्व सहस्त्रिणम्।। ९३८
४. सोम उष्वाणस्सोतृभिः। अधिष्णुभिरवीनाम्।
अश्वयेव हरिता याति धारया। मन्द्रया याति धारया।। ९३९
५. अनूपे गोमान् गोभिरक्षाः। सोमो दुग्धाभिरक्षाः।
समुद्रन्न संवरणान्यग्मन्। मन्दी मदाय तोशते।। ९४०
६. यत्सोम चित्रमुक्थ्यम्। दिव्यं पार्थिवं वसु। तन्नः पुनान आभर।। ९४१
७. वृषा पुनान आयूंषि। स्तनयन्नधि बर्हिषि। हरिस्सन् योनिमासदः।। ९४२
८. युवं हि स्थ स्वःपती। इन्द्रश्च सोम गोपती। ईशाना पिप्यतन्धियः।। ९४३
९. इन्द्रो मदाय वावृधे। शवसे वृत्रहा नृभिः। तमिन्महत्स्वाजिषु।
ऊतिमर्भे हवामहे। स वाजेषु प्र नोविषत्।। ९४४
१०. असि हि वीर सेन्यः। असि भूरि परादादिः। असिदभ्रस्य चिद्वधः।
यजमानाय शिक्षसि। सुन्वते भूरिते वसु।। ९४५

११. यदुदीरत आ जयः। धृष्णवे धीय ते धनम्। युङ्क्ष्वा मदच्युता हरी।
कं ह नः कं वसौ दधः। अस्मम् इन्द्र वसौ दधः।। १४६
१२. स्वादोरित्था विषूवतः। मधोःपिबान्ति गौर्यः। या इन्द्रेण सयावरीः।
वृष्णा मदन्ति शोभथा। वस्वीरनुस्वराज्यम्।। १४७
१३. ता अस्य पृशना युवः। सोमं श्रीणन्ति पृश्नयः। प्रिया इन्द्रस्य धेनवः।
वज्रं हिन्वन्ति सायकम्। वस्वीरनुस्वराज्यम्।। १४८
१४. ता अस्य नमसा सहः। सपर्यन्ति प्रचेतसः। व्रतान्यस्य सश्चिरे।
पुरूणि पूर्वचित्तये। वस्वीरनुस्वराज्यम्।। १४९

87

1. അസാവ്യംശുർമദായ/ അപ്സു ദക്ഷോ ഗിരിഷ്ഠാഃ/
ശ്യേനോ ന യോനിമാസദത്/ 950
2. ശുഭ്രമന്ധോ ദേവവാതം/ അപ്സു ധൗതന്നൃഭിസ്സുതം/
സ്വദന്തി ഗാവഃ പയോഭിഃ/ 951
3. ആദീമശ്വന്നഹേതാരം/ അശൂശുഭന്നമൃതായ/
മധോ രസം സധമാദേ/ 952
4. അഭി ദ്യുമ്നം ബൃഹദ്യശഃ/ ഇഷസ്പതേ ദിദീഹി ദേവ ദേവയും/
വികോശം മധ്യമയ്യുവ/ 953
5. ആ വച്യസ്വ സുദക്ഷ ചമോസ്സുതഃ/ വിശാം വഹ്നിർന വിശ്പതിഃ/
വൃഷ്ടിന്ദിവഃ പവസ്വ രീതിമപഃ/ ജിന്വൻ ഗവിഷ്ടയേ ധിയഃ/ 954
6. പ്രാണാ ശിശുർമഹീനാം/ ഹിന്വന്നൃതസ്യ ദീധിതിം/
വിശ്വാ പരിപ്രിയാ ഭുവദധദ്രിതാ/ 955
7. ത്രീണി ത്രിതസ്യ ധാരയാ/ പൃഷ്ഠേഷ്ഠെരയദ്രയിം/
മിമീതേ അസ്യ യോജനാ വി സുക്രതുഃ/ 956
8. ഉപ ത്രിതസ്യ പാഷ്ന്യാഃ/ അഭക്തയദ്ഗുഹാ പദം/
യജ്ഞസ്യ സപ്തധാമഭിരധപ്രിയം/ 957
9. പവസ്വ വാജസാതയേ/ പവിത്രേ ധാരയാ സുതഃ/
ഇന്ദ്രായ സോമവിഷ്ണവേ/ ദേവേഭ്യോ മധുമത്തമഃ/ 958
10. ത്വാം രിഹന്തി ധീതയഃ/ ഹരിം പവിത്രേ അദ്രുഹഃ/
വത്സഞ്ജാതന്നമാതരഃ/ പവമാനവിധർമണി/ 959
11. ത്വം ദ്യാഞ്ച മഹിവ്രത/ പൃഥിവീഞ്ചാതിജഭ്രിഷേ/
പ്രതിദ്രാപിമമുഞ്ചഥാഃ/ പവമാന മഹിത്വനാ/ 960
12. ഇന്ദുർവാജീ പവതേ ഗോന്യോഘാഃ/
ഇന്ദ്രേ സോമസ്സഹ ഇന്വൻ മദായ/
ഹന്തി രക്ഷോ ബാധതേ പര്യരാതിം/
വരിവഃ കൃണ്വൻ വൃജനസ്യ രാജാ/ 961

13. അധ ധാരയാ മധ്വാ പൃചാനഃ/ തിരോ രോമ പവതേ അദ്രിദുഗ്ധഃ/
ഇന്ദുരിന്ദ്രസ്യ സഖ്യഞ്ജുഷാണഃ/
ദേവോ ദേവസ്യ മത്സരോ മദായ/ 962
14. അഭി വ്രതാനി പവതേ പുനാനഃ/
ദേവോ ദേവാൻ സ്വേന രസേന പൃഞ്ചൻ/
ഇന്ദുർധർമാണ്യൃതുഥാ വസാനഃ/
ദശ ക്ഷിപോ അവ്യതസാനോ അവ്യേ/ 963
15. ആ തേ അഗ്ന ഇധീമഹി/ ദ്യുമന്തന്ദേവാജരം/
യദ്ധസ്യാതേ പനീയസീ/ സമിദ്ദീദയതി ദ്യവി/
ഇഷം സ്തോതൃഭ്യ ആഭര/ 964
16. ആ തേ അഗ്ന ഋചാ ഹവിഃ/ ശുക്രസ്യ ജ്യോതിഷസ്പതേ/
സുശ്ചന്ദ്രദസ്മ വിശ്പതേ/ ഹവ്യവാഡ് തുഭ്യം ഹൂയതേ/
ഇഷം സ്തോതൃഭ്യ ആഭര/ 965
17. ഓഭേ സുശ്ചന്ദ്ര വിശ്പതേ/ ദർവീ ശ്രീണീഷ ആസനി/
ഉതോ ന ഉത്പുപൂര്യാഃ/ ഉക്ഥേഷു ശവസസ്പതേ/
ഇഷം സ്തോതൃഭ്യ ആഭര/ 966
18. ഇന്ദ്രായ സാമഗായത/ വിപ്രായ ബൃഹതേ ബൃഹത്/
ബ്രഹ്മകൃതേ വിപശ്ചിതേ പനസ്യവേ/ 967
19. ത്വമിന്ദ്രാഭിഭൂരസി/ ത്വം സൂര്യമരോചയഃ വിശ്വകർമാ/
വിശ്വദേവോ മഹാം അസി/ 968
20. വിഭ്രാജഞ്ജ്യോതിഷാസ്വഃ/ അഗച്ഛോ രോചനന്ദിവഃ/
ദേവാസ്ത ഇന്ദ്ര സഖ്യായ യേമിരേ/ 969
21. അസാവി സോമ ഇന്ദ്ര തേ/ ശവിഷ്ഠ ധൃഷ്ണവാ ഗഹി/
ആ ത്വാ പൃണക്തുവിന്ദ്രിയം/ രജസ്സൂര്യോ ന രശ്മിഭിഃ/ 970
22. ആതിഷ്ഠ വൃത്രഹൻ രഥം/ യുക്താ തേ ബ്രഹ്മണാ ഹരീ/
അർവാചീനം സു തേ മനഃ/ ഗ്രാവാ കൃണോതു വഗ്നുനാ/ 971
23. ഇന്ദ്രമിദ്ധരീ വഹതഃ/ അപ്രതിധൃഷ്ട ശവസം/
ഋഷീണാം സുഷ്ടുതീരുപ/ യജ്ഞഞ്ച മാനുഷാണാം/ 972

१. असाव्यंशुर्मदाय। अप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत्।। ९५०
२. शुभ्रमन्धो देववातम्। अप्सु धौतन्नृभिस्सुतम्। स्वदन्ति गावःपयोभिः।। ९५१
३. आदीमश्वन्नहेतारम्। अशूशुभन्नमृताय। मधो रसं सधमादे।। ९५२
४. अभि द्युम्नं बृहद्यशः। इषस्पते दिदीहि देव देवयुम्।
विकोशं मध्यमय्युव।। ९५३

५. आ वच्यस्व सुदक्ष चम्वोस्सुतः। विशां वह्निर्न विश्पतिः।
वृष्टिन्दिवःपवस्व रीतिमपः। जिन्वन् गविष्टये धियः।। ९५४
६. प्राणा शिशुर्महीनाम्। हिन्वन्नृतस्य दीधितिम्।
विश्वा परिप्रिया भुवदधद्विता।। ९५५
७. त्रीणि त्रितस्य धारया। पृष्ठेष्वैरयद्रयिम्।
मिमीते अस्य योजना वि सुक्रतुः।। ९५६
८. उप त्रितस्य पाष्योः। अभक्तयद्गुहा पदम्।
यज्ञस्य सप्तधामभिरधप्रियम्।। ९५७
९. पवस्व वाजसातये। पवित्रे धारया सुतः।
इन्द्राय सोमविष्णवे। देवेभ्यो मधुमत्तमः।। ९५८
१०. त्वां रिहन्ति धीतयः। हरिं पवित्रे अद्रुहः।
वत्सञ्जातन्न मातरः। पवमानविधर्मणि।। ९५९
११. त्वं द्याञ्च महिव्रत। पृथिवीञ्चाति जभ्रिषे।
प्रतिद्रापिममुञ्चथाः। पवमान महित्वना।। ९६०
१२. इन्दुर्वाजी पवते गोन्योघाः। इन्द्रे सोमस्सह इन्वन् मदाय।
हन्ति रक्षो बाधते पर्यरातिम्। वरिवः कृण्वन् वृजनस्य राजा।। ९६१
१३. अध धारया मध्वा पृचानः। तिरो रोम पवते अद्रिदुग्धः।
इन्दुरिन्द्रस्य सख्यञ्जुषाणः। देवो देवस्य मत्सरो मदाय।। ९६२
१४. अभि व्रतानि पवते पुनानः। देवो देवान् स्वेन रसेन पृञ्चन्।
इन्दुर्धर्माण्यृतुथा वसानः। दश क्षिपो अव्यतसानो अव्ये।। ९६३
१५. आ ते अग्न इधीमहि। द्युमन्तन्देवाजरम्। यद्धस्याते पनीयसी।
समिद्दीदयति द्यवि। इषं स्तोतृभ्य आभर।। ९६४
१६. आ ते अग्न ऋचा हविः। शुक्रस्य ज्योतिषस्पते। सुश्चन्द्रदस्म विश्पते।
हव्यवाळ् तुभ्यं हूयते। इषं स्तोतृभ्य आभर।। ९६५
१७. ओभे सुश्चन्द्र विश्पते। दर्वी श्रीणीष आसनि। उतो न उत्पुपूर्याः।
उक्थेषु शवसस्पते। इषं स्तोतृभ्य आभर।। ९६६
१८. इन्द्राय सामगायत। विप्राय बृहते बृहत्।
ब्रह्मकृते विपश्चिते पनस्यवे।। ९६७
१९. त्वमिन्द्राभिभूरसि। त्वं सूर्यमरोचयः।
विश्वकर्मा विश्वदेवो महम् असि।। ९६८

२०. विभ्राजञ्ज्योतिषास्वः। अगच्छो रोचनन्दिवः।
देवास्त इन्द्र सख्याय येमिरे।। ९६९
२१. असावि सोम इन्द्र ते। शविष्ठ धृष्णवा गहि।
आ त्वा पृणक्तुविन्द्रियम्। रजस्सूर्यो न रश्मिभिः।। ९७०
२२. आतिष्ठ वृत्रहन्रथम्। युक्ता ते ब्रह्मणा हरी।
अर्वाचीनं सु ते मनः। ग्रावा कृणोतु वग्नुना।। ९७१
२३. इन्द्रमिद्धरी वहतः। अप्रतिधृष्टशवसम्।
ऋषीणां सुष्टुतीरुप। यज्ञञ्च मानुषाणाम्।। ९७२

88

1. ജ്യോതിർയജ്ഞസ്യ പവതേ മധുപ്രിയം/
പിതാ ദേവാനാഞ്ജനിതാ വിഭൂവസുഃ/
ദധാതി രത്നം സ്വധയോരപീച്യം/
മദിന്തമോ മത്സര ഇന്ദ്രിയോ രസഃ/ 973
2. അഭിക്രന്ദൻ കലശം വാജ്യർഷതി/
പതിർദിവശ്ശതധാരോ വിചക്ഷണഃ/
ഹരിർമിത്രസ്യ സദനേഷു സീദതി/
മർമൃജാനോവിഭിസ്സിന്ധുഭിർവൃഷാ/ 974
3. അഗ്രേ സിന്ധൂനാം പവമാനോ അർഷസി/
അഗ്രേ വാചോ അഗ്രിയോ ഗോഷു ഗച്ഛസി/
അഗ്രേ വാജസ്യ ഭജസേ മഹദ്ധനം/
സ്വായുധസ്സോത്യഭിസ്സോമസൂയസേ/ 975
4. അസൃക്ഷത പ്രവാജിനഃ/ ഗവ്യാ സോമാസോ അശ്വയാ/
ശുക്രാസോ വീരയാശവഃ/ 976
5. ശുംഭമാനാ ഋതായുഭിഃ/ മൃജ്യമാനാ ഗഭസ്ത്യോ/
പവന്തേ വാരേ അവ്യയേ/ 977
6. തേ വിശ്വാ ദാശുഷേ വസു/ സോമാ ദിവ്യാനി പാർഥിവാ/
പവന്താമാന്തരിക്ഷ്യാ/ 978
7. പവസ്വ ദേവവീരതി/ പവിത്രം സോമ രംഹ്യാ/
ഇന്ദ്രമിന്ദോ വൃഷാവിശ/ 979
8. ആ വച്യസ്വ മഹിപ്സരഃ/ വൃഷേന്ദോ ദ്യുമ്നവത്തമഃ/
ആ യോനിന്ധർണസിസ്സദഃ/ 980
9. അധുക്ഷത പ്രിയം മധു/ സാരാസുതസ്യ വേധസഃ/
അപോ വസിഷ്ട സുക്രതുഃ/ 981
10. മഹാന്തന്ത്വാ മഹീരനു/ ആപോ അർഷന്തി സിന്ധവഃ/
യദ്ഗോഭിർവാസയിഷ്യസേ/ 982

11. സമുദ്രോ അപ്സുമാമൃജേ/ വിഷ്ടംഭോ ധരുണോ ദിവഃ/
സോമഃ പവിത്രേ അസ്മയുഃ/ 983
12. അചിക്രദദ്വൃഷാ ഹരിഃ/ മഹാൻ മിത്രോ ന ദർശതഃ/
സംസൂര്യേണ ദിദ്യുതേ/ 984
13. ഗിരസ്ത ഇന്ദ ഓജസാ/ മർമൃജ്യന്തേ അപസ്യുവഃ/
യാഭിർമദായ ശുംഭസേ/ 985
14. തന്ത്വാ മദായ ഘൃഷ്വയേ/ ഉലോകകൃത്നുമീമഹേ/
തവ പ്രശസ്തയേ മഹേ/ 986
15. ഗോഷാ ഇന്ദ്രോ നൃഷാ അസി/ അശ്വസാ വാജസാ ഉത/
ആത്മാ യജ്ഞസ്യ പൂർവ്യഃ/ 987
16. അസ്മഭ്യമിന്ദവിന്ദ്രിയം/ മധോഃ പവസ്വ ധാരയാ/
പർജന്യോ വൃഷ്ടിമാം ഇവ/ 988
17. സ നാ ച സോമ ജേഷി ച പവമാനമഹിശ്രവഃ/
അഥാനോ വസ്യ സസ്കൃധി/ 989
18. സനാജ്യോതിസ്സനാസ്സ്വാർവിശ്വാ ച സോമ സൗഭഗാ/
അഥാനോ വസ്യ സസ്കൃധി/ 990
19. സനാദക്ഷമുതക്രതുമപ സോമമൃധോ ജഹി/
അഥാനോ വസ്യ സസ്കൃധി/ 991
20. പവീതാരഃപുനീതന സോമമിന്ദ്രായ പാതവേ/
അഥാനോ വസ്യ സസ്കൃധി/ 992
21. ത്വം സൂര്യേണ ആഭജ തവക്രത്വാ തവോതിഭിഃ/
അഥാനോ വസ്യ സസ്കൃധി/ 993
22. തവ ക്രത്വാ തവോതിഭിർജ്യോക് പശ്യേമ സൂര്യം/
അഥാനോ വസ്യ സസ്കൃധി/ 994
23. അഭ്യർഷസ്വായുധ സോമ ദ്വി ബർഹസം രയിം/
അഥാനോ വസ്യ സസ്കൃധി/ 995
24. അഭ്യാർഷാനപച്യുതോ വാജിൻ സമത്സു സാസഹിഃ/
അഥാനോ വസ്യ സസ്കൃധി/ 996
25. ത്വായ്വഞ്ജ്ഞരവീവൃധൻ പവമാനവിധർമണി/
അഥാനോ വസ്യ സസ്കൃധി/ 997
26. രയിന്നശ്ചിത്രമശ്വിനമിന്ദോ വിശ്വായുമാഭര/
അഥാനോ വസ്യ സസ്കൃധി/ 998
27. തരത്സമന്ദീ ധാവതി ധാരാസുതസ്യാന്ധസഃ/
തരത്സമന്ദീ ധാവതി/ 999
28. ഉസ്രാവേദവസൂനാമ്മർതസ്യ ദേവ്യവസഃ/
തരത്സമന്ദീ ധാവതി/ 1000
29. ധ്വസ്രയോഃ പുരുഷന്ത്യോരാ സഹസ്രാണി ദർമഹേ/
തരത്സമന്ദീ ധാവതി/ 1001

30. ആയയോസ്ത്രിംശതന്തനാ സഹസ്രാണി ച ദദ്മഹേ/
തരത്സമന്ദീ ധാവതി/ 1002
31. ഏതേ സോമാ അസൃക്ഷത/ ഗൃണാനാശ്ശവസേ മഹേ/
മദിന്തമസ്യ ധാരയാ/ 1003
32. അഭിഗവ്യാനി വീതയേ/ നൃമ്ണാ പുനാനോ അർഷസി/
സനദ്യാജഃ പരിസ്രവ/ 1004
33. ഉത നോ ഗോമതീരിഷഃ/ വിശ്വാ അർഷ പരിഷ്ടുഭഃ/
ഗൃണാനോ ജമദഗ്നിനാ/ 1005

८८

१. ज्योतिर्यज्ञस्य पवते मधुप्रियम्। पिता देवानाञ्जनिता विभूवसुः।
दधाति रत्नं स्वधयोरपीच्यम्। मदिन्तमो मत्सर इन्द्रियो रसः।। ९७३
२. अभिक्रन्दन् कलशं वाज्यर्षति। पतिर्दिवश्शतधारो विचक्षणः।
हरिर्मित्रस्य सदनेषु सीदति। मर्मृजानो विभिस्सिन्धुभिर्वृषा।। ९७४
३. अग्रे सिन्धूनां पवमानो अर्षसि। अग्रे वाचो अग्रियो गोषु गच्छसि।
अग्रे वाजस्य भजसे महद्धनम्। स्वायुधस्सोतृभिस्सोमसूयसे।। ९७५
४. असृक्षत प्रवाजिनः। गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः।। ९७६
५. शुंभमाना ऋतायुभिः। मृज्यमाना गभस्त्योः। पवन्ते वारे अव्यये।। ९७७
६. ते विश्वा दाशुषे वसु। सोमा दिव्यानि पार्थिवा। पवन्तामान्तरिक्ष्या।। ९७८
७. पवस्व देववीरति। पवित्रं सोम रंह्या। इन्द्रमिन्दो वृषाविश।। ९७९
८. आ वच्यस्व महिष्सरः। वृषेन्दो द्युम्नवत्तमः। आ योनिन्धर्णसिस्सदः।। ९८०
९. अधुक्षत प्रियं मधु। धारासुतस्य वेधसः। अपो वसिष्ट सुक्रतुः।। ९८१
१०. महान्तन्त्वा महीरनु। आपो अर्षन्ति सिन्धवः। यत्गोभिर्वासयिष्यसे।। ९८२
११. समुद्रो अप्सुमामृजे। विष्टंभो धरुणो दिवः। सोमःपवित्रे अस्मयुः।। ९८३
१२. अचिक्रदद्वृषा हरिः। महान् मित्रो न दर्शतः। संसर्येण दिद्युते।। ९८४
१३. गिरस्त इन्द ओजसा। मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुंभसे।। ९८५
१४. तन्त्वा मदाय घृष्वये। उलोक कृत्नुमीमहे। तव प्रशस्तये महे।। ९८६
१५. गोषा इन्दो नृषा असि। अश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः।। ९८७
१६. अस्मभ्यमिन्दविन्द्रियम्। मधोःपवस्व धारया। पर्जन्यो वृष्टिमम् इव।। ९८८
१७. स ना च सोम जोषि च पवमानमहिश्रवः। अथानो वस्य सस्कृधि।। ९८९
१८. सना ज्योतिस्सनास्स्वार्विश्वा च सोम सौभगा। अथानो वस्य सस्कृधि।। ९९०
१९. सना दक्षमुतक्रतुमपसोममृधो जहि। अथानो वस्य सस्कृधि।। ९९१

२०. पवीतारःपुनीतन सोममिन्द्राय पातवे। अथानो वस्य सस्कृधि।। ९९२
२१. त्वं सूर्येण आभज तवक्रत्वा तवोतिभिः। अथानो वस्य सस्कृधि।। ९९३
२२. तव क्रत्वा तवोतिभिर्ज्योक् पश्येम सूर्यम्। अथानो वस्य सस्कृधि।। ९९४
२३. अभ्यर्षस्वायुध सोम द्वि बर्हसं रयिम्। अथानो वस्य सस्कृधि।। ९९५
२४. अभ्यार्षाऽनपच्युतो वाजिन् समत्सु सासहिः। अथानो वस्य सस्कृधि।। ९९६
२५. त्वाय्यश्नैरवीवृधन् पवमानविधर्मणि। अथानो वस्य सस्कृधि।। ९९७
२६. रयिन्नश्चित्रमश्विनमिन्दो विश्वायुमाभर। अथानो वस्य सस्कृधि।। ९९८
२७. तरत्समन्दी धावति धारासुतस्यान्धसः। तरत्समन्दी धावति।। ९९९
२८. उस्रावेदवसूनाम्मर्तस्य देव्यवसः। तरत्समन्दी धावति।। १०००
२९. ध्वस्रयोःपुरुषन्त्योरा सहस्राणि दत्महे। तरत्समन्दी धावति।। १००१
३०. आययोस्त्रिंशतन्तना सहस्राणि च दत्महे। तरत्समन्दी धावति।। १००२
३१. एते सोमा असृक्षत। गृणानाश्शवसे महे। मदिन्तमस्य धारया।। १००३
३२. अभिगव्यानि वीतये। नृम्णा पुनानो अर्षसि। सनद्वाजःपरिस्रव।। १००४
३३. उत नो गोमतीरिषः। विश्वा अर्ष परिष्टुभः। गृणानो जमदग्निना।। १००५

1. പ്രാഗ്നയേ വാചമീരയ/ വൃഷഭായ ക്ഷിതീനാം/
സനഃ പർഷദതിദ്വിഷഃ/ 1006
2. യഃ പരസ്യാഃ പരാവതഃ/ തിരോ ധന്വാതി രോചതേ/
സനഃ പർഷദതിദ്വിഷഃ/ 1007
3. യോ വിശ്വാഭി വിപശ്യതി/ ഭുവനാസഞ്ച പശ്യതി/
സനഃ പർഷദതിദ്വിഷഃ/ 1008
4. ഇമം സ്തോമമർഹതേ ജാതവേദസേ/
രഥമിവ സമ്മഹേമാ മനീഷയാ/
ഭദ്രാഹിനഃപ്രമതിരസ്യ സംസദി/
അഗ്നേ സഖ്യേ മാരിഷാമാ വയന്തവ/ 1009
5. ഭരാമേധ്മം കൃണവാ മാ ഹവീംഷി/
തേ ചിതയന്തഃ പർവണാ പർവണാ വയം/
ജീവാതവേ പ്രതരാം സാധയാ ധിയഃ/
അഗ്നേ സഖ്യേ മാരിഷാമാ വയന്തവ/ 1010
6. ശകേമ ത്വാ സമിധം സാധയാധിയഃ/
ത്വേ ദേവാ ഹവിരദന്ത്യാ ഹുതം/
ത്വമാദിത്യം ആ വഹതാ ഹ്യൂശ്മസി/
അഗ്നേ സഖ്യേ മരിഷാമാ വയന്തവ/ 1011

7. പ്ര തി വാം സൂര ഉദിതേ/ മിത്രം ഗൃണീഷേ വരുണം/
അര്യമണം രിശാദസം/ 1012
8. രായാ ഹിരണ്യയാ മതിഃ/ ഇയമവൃകായ ശവസേ/
ഇയം വിപ്രാ മേധസാതയേ/ 1013
9. തേ സ്യാമ ദേവവരുണ/ തേ മിത്ര സൂരിഭിസ്സഹ/
ഇഷം സ്വശ്ച ധീമഹി/ 1014
10. ഭിന്ധി വിശ്വാ അപദ്വിഷഃ/ പരിബാധോ ജഹീമൃധഃ/
വസുസ്പാർഹന്തദാഭര/ 1015
11. യസ്യ തേ വിശ്വമാനുഷക്/ ഭൂരേർദത്തസ്യ വേദതി/
വസുസ്പാർഹന്തദാഭര/ 1016
12. യദ്വീളാവിന്ദ്രയത് സ്ഥിരേ/ യത്പർശാനേ പരാഭൃതം/
വസുസ്പാർഹന്തദാഭര/ 1017
13. യജ്ഞസ്യ ഹി സ്ഥ ഋത്വിജാ/ സസ്നീവാജേഷു കർമസു/
ഇന്ദ്രാഗ്നീ തസ്യ ബോധതം/ 1018
14. ഇദം വാംമദിരം മധു/ അധുക്ഷന്നദ്രിഭിർനരഃ/
ഇന്ദ്രാഗ്നീ തസ്യ ബോധതം/ 1019
15. തോശാസാ രഥയാവാനാ/ വൃത്രഹണാ പരാജിതാ/
ഇന്ദ്രാഗ്നീ തസ്യ ബോധതം/ 1020

८९

१. प्राग्नये वाचमीरय। वृषभाय क्षितीनाम्। सनःपर्षदति द्विषः।। १००६
२. यःपरस्याःपरावतः। तिरो धन्वाति रोचते। सनःपर्षदति द्विषः।। १००७
३. यो विश्वाभि विपश्यति। भुवनासञ्च पश्यति। सनःपर्षदति द्विषः।। १००८
४. इमं स्तोममर्हते जातवेदसे। रथमिव सम्महेमा मनीषया।
भद्राहिनःप्रमतिरस्य संसदि। अग्ने सख्ये मारिषामा वयन्तव।। १००९
५. भरामेध्मं कृणवा मा हवींषि। ते चितयन्तःपर्वणा पर्वणा वयम्।
जीवातवे प्रतरां साधया धियः। अग्ने सख्ये मारिषामा वयन्तव।। १०१०
६. शकेम त्वा समिधं साधयाधियः। त्वे देवा हविरदन्त्या हुतम्।
त्वमादित्यम् आ वहता ह्न्यूश्मसि। अग्ने सख्ये मारिषामा वयन्तव।। १०११
७. प्रति वां सूर उदिते। मित्रं गृणीषे वरुणम्। अर्यमणं रिशादसम्।। १०१२
८. राया हिरण्यया मतिः। इयमवृकाय शवसे। इयं विप्रा मेधसातये।। १०१३
९. ते स्याम देववरुण। ते मित्र सूरिभिस्सह। इषं स्वश्च धीमहि।। १०१४
१०. भिन्धिविश्वा अपद्विषः। परिबाधो जहीमृधः। वसुस्पार्हन्तदाभर।। १०१५
११. यस्य ते विश्वमानुषक्। भूरेर्दत्तस्य वेदति। वसुस्पार्हन्तदाभर।। १०१६

१२. यद्वीळाविन्द्रयत् स्थिरे। यत्पर्शाने पराभृतम्। वसुस्पार्हन्तदाभर।। १०१७
१३. यज्ञस्य हि स्थ ऋत्विजा। सस्नीवाजेषु कर्मसु।
इन्द्राग्नी तस्य बोधतम्।। १०१८
१४. इदं वाम्मदिरं मधु। अधुक्षन्नद्रिभिर्नरः। इन्द्राग्नी तस्य बोधतम्।। १०१९
१५. तोशासा रथयावाना। वृत्रहणा पराजिता। इन्द्राग्नी तस्य बोधतम्।। १०२०

90

1. ഇന്ദ്രായേന്ദോ മരുത്വതേ/ പവസ്വ മധുമത്തമഃ/
അർകസ്യ യോനിമാസദഃ/ 1021
2. തന്ത്വാ വിപ്രാ വചോ വിദഃ/ പരിഷ്കൃണ്വന്തി ധർണസിം/
സന്ത്വാ മൃജന്ത്യാ യവഃ/ 1022
3. രസന്തേ മിത്രോ അര്യമാ/ പിബന്തു വരുണഃ കവേ/
പവമാനസ്യ മരുതഃ/ 1023
4. മൃജ്യമാനസ്സുഹസ്ത്യാ/ സമുദ്രേ വാചമിന്വസി/
രയിം പിശങ്ഗം ബഹുലം പുരുസ്പൃഹം/
പവമാനാഭ്യർഷസി/ 1024
5. പുനാനോ വാരേ പവമാനോ അവ്യയേ/ വൃഷോ അചിക്രദദ്വനേ/
ദേവാനാം സോമ പവമാനനിഷ്കൃതം/
ഗോഭിരഞ്ജാനോ അർഷസി/ 1025
6. ഏതമുത്യന്ദശക്ഷിപഃ/ മൃജന്തി സിന്ധുമാതരം/
സമാദിത്യേഭിരഖ്യത/ 1026
7. സമിന്ദ്രേണോത വായുനാ/ സുത ഏതി പവിത്ര ആ/
സം സൂര്യസ്യ രശ്മിഭിഃ/ 1027
8. സ നോ ഭഗായ വായവേ/ പൂഷ്ണേ പവസ്വ മധുമാൻ/
ചാരുർമിത്രേ വരുണേ ച/ 1028
9. രേവതീർനസ്സധമാദേ/ ഇന്ദ്രേ സന്തു തുവി വാജാഃ/
ക്ഷുമന്തോ യാഭിർമദേമ/ 1029
10. ആഘത്വാവാൻ ക്മനാ യുക്തഃ/
സ്തോതൃഭ്യോ ധൃഷ്ണവിയാനഃ/
ഋണോരക്ഷന്ന ചക്ര്യോഃ/ 1030
11. ആയദ്ദുവശ്ശതക്രതോ/ ആകാമഞ്ജരിത്രണാം/
ഋണോരക്ഷന്ന ശചീഭിഃ/ 1031
12. സുരൂപകൃത്നുമൂതയേ/ സുദുഘാമിവ ഗോദുഹേ/
ജുഹൂമസി ദ്യവിദ്യവി/ 1032
13. അഥാ തേ അന്തമാനാം/ വിദ്യാമസുമതീനാം/
മാ നോ അതിഖ്യ ആ ഗഹി/ 1033

14. ഉപ നസ്സവനാഗഹി/ സോമസ്യ സോമപാഃ പിബ/
ഗോദാ ഇദ്രേവതോ മദഃ/ 1034
15. ഉഭേ യദിന്ദ്ര രോദസീ/ ആ പപ്രാഥോഷാ ഇവ/
മഹാന്തന്ത്വാ മഹീനാം/ സമ്രാജഞ്ചർഷണീനാം/
ദേവീജനിത്ര്യജീജനത്/ ഭദ്രാ ജനിത്ര്യജീജനത്/ 1035
16. ദീർഘം ഹ്യങ്കുശയ്യഥാ/ ശക്തിം ബിഭർഷി മന്തുമഃ/
പൂർവേണ മഘവൻ പദാ/ വയാമജോ യഥാ യമഃ/
ദേവീജനിത്ര്യജീജനത്/ ഭദ്രാജനിത്ര്യജീജനത്/ 1036
17. അവത്യാ ബൃഹതീരിഷഃ/ വിശ്വശ്ചന്ദ്രാ അമിത്രഹൻ/
ശചീഭിശ്ചക്രധൂനുഷേ/ ഇന്ദ്ര വിശ്വാഭിരൂതിഭിഃ/
ദേവീജനിത്ര്യജീജനത്/ ഭദ്രാജനിത്ര്യജീജനത്/ 1037

९०

१. इन्द्रायेन्दो मरुत्वते। पवस्व मधुमत्तमः। अर्कस्य योनिमासदः।। १०२१
२. तन्त्वा विप्रा वचो विदः। परिष्कृण्वन्ति धर्णसिम्। सन्त्वा मृजन्त्या यवः।। १०२२
३. रसन्ते मित्रो अर्यमा। पिबन्तु वरुणः कवे। पवमानस्य मरुतः।। १०२३
४. मृज्यमानस्सुहस्त्या। समुद्रे वाचमिन्वसि।
रयिं पिशङ्गं बहुलं पुरुस्पृहम्। पवमानाभ्यर्षसि।। १०२४
५. पुनानो वारे पवमानो अव्यये। वृषो अचिक्रदद्वने।
देवानां सोम पवमाननिष्कृतम्। गोभिरञ्जानो अर्षसि।। १०२५
६. एतमुत्यन्दशक्षिपः। मृजन्ति सिन्धुमातरम्। समादित्येभिरख्यत।। १०२६
७. समिन्द्रेणोत वायुना। सुत एति पवित्र आ। सं सूर्यस्य रश्मिभिः।। १०२७
८. स नो भगाय वायवे। पूष्णे पवस्व मधुमान्। चारुर्मित्रे वरुणे च।। १०२८
९. रेवतीर्नस्सधमादे। इन्द्रे सन्तु तुवि वाजाः। क्षुमन्तो याभिर्मदेम।। १०२९
१०. अघत्वावान् क्मना युक्तः। स्तोतृभ्यो धृष्णवियानः।
ऋणोरक्षन्न चक्र्योः।। १०३०
११. आयद्दुवश्शतक्रतो। आकामञ्जरितॄणाम्। ऋणोरक्षन्न शचीभिः।। १०३१
१२. सुरूपकृत्नुमूतये। सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि।। १०३२
१३. अथा ते अन्तमानाम्। विद्यामसुमतीनाम्। मा नो अतिख्य आ गहि।। १०३३
१४. उप नस्सवनागहि। सोमस्य सोमपाःपिब। गोदा इद्रेवतो मदः।। १०३४
१५. उभे यदिन्द्र रोदसी। आ पप्राथोषा इव। महान्तन्त्वा महीनाम्।
सम्राजञ्चर्षणीनाम्। देवी जनित्र्यजीजनत्। भद्रा जनित्र्यजीजनत्।। १०३५

१६. दीर्घं ह्यङ्कुशय्यथा। शक्तिं बिभर्षि मन्तुमः। पूर्वेण मघवन् पदा।
वयामजो यथा यमः। देवीजनित्र्यजीजनत्। भद्रा जनित्र्यजीजनत्।। १०३६
१७. अवत्या बृहतीरिषः। विश्वश्चन्द्रा अमित्रहन्। शचीभिश्शक्रधूनुषे।
इन्द्र विश्वाभिरूतिभिः। देवीजनित्र्यजीजनत्।
भद्रा जनित्र्यजीजनत्।। १०३७

91

1. പരിസ്യാനോ ഗരിഷ്ഠാഃ/ പവിത്രേ സോമോ അക്ഷരത്/
മദേഷു സർവധാ അസി/ 1038
2. ത്വം വിപ്രസ്ത്വം കവിഃ/ മധുപ്രജാതമന്ധസാ/
മദേഷു സർവധാ അസി/ 1039
3. ത്വേ വിശ്വേ സജോഷസഃ/ ദേവാസഃപീതിമാശത/
മദേഷു സർവധാ അസി/ 1040
4. സസുന്വേ യോ വസൂനാം/ യോ രായാമാനേതായ ഇളാനാം/
സോമോ യസ്സുക്ഷിതീനാം/ 1041
5. യസ്യ ത ഇന്ദ്രഃപിബാദ്യസ്യ മരുതഃ/ യസ്യ വാര്യമണാ ഭഗഃ/
ആ യേന മിത്രാവരുണാ കരാമഹേ/ ഏന്ദ്രമവസേമഹേ/ 1042
6. തം വസ്സഖായോ മദായ/ പുനാനമഭിഗായത/
ശിശുന്നഹവ്യൈ സ്വദയന്ത ഗൂർതിഭിഃ/ 1043
7. സംവത്സ ഇവ മാതൃഭിഃ/ ഇന്ദുർഹിന്വാനോ അജ്യതേ/
ദേവാവീർമദോ മതിഭിഃ പരിഷ്കൃതഃ/ 1044
8. അയന്ദക്ഷായ സാധനഃ/ അയം ശർധായ വീതയേ/
അയന്ദേവേഭ്യോ മധുമത്തമസ്സുതഃ/ 1045
9. സോമാഃ പവന്ത ഇന്ദവഃ/ അസ്മഭ്യങ്ഗാതുവിത്തമാഃ/
മിത്രാ സ്വാനാ അരേപസഃ/ സ്വാധ്യ സ്വർവിദഃ/ 1046
10. തേ പൂതാസോ വിപശ്ചിതഃ/ സോമാസോ ദധ്യാശിരഃ/
സൂരാസോ ന ദർശതാസഃ/ ജിഗത്നവോ ധ്രുവാ ഘ്രുതേ/ 1047
11. സുഷ്വാണാസോ വ്യദ്രിഭിഃ/ ചിതാനാ ഗോരധി ത്വചി/
ഇഷമസ്മഭ്യമഭിതഃ/ സമസ്വരൻ വസുവിദഃ/ 1048
12. അയാ പവാ പവസ്വൈനാ വസൂനി/
മാംശ്ചത്വ ഇന്ദോ സരസിപ്രധന്വ/
ബ്രധ്നശ്ചിദ്യസ്യ വാതോ ന ജൂതിം/
പുരുമേധശ്ചിത്തകവേ നരന്ധത്/ 1049
13. ഉത ന ഏനാ പവയാ പവസ്വ/ അധിശ്രുതേ ശ്രവായ്യസ്യ തീർഥേ/
ഷഷ്ടിം സഹസ്രാ നൈഗുതോ വസൂനി/
വൃക്ഷന്നപക്വന്ധൂനവദ്രണായ/ 1050

14. മഹീമേ അസ്യ വൃഷനാമശൂഷേ/
മാംശ്ചതോവാ പൃശനേ വാ വധത്രേ/
അസ്വാപയന്നിഗുതസ്രേഹയച്ച/
അപാമിത്രം അപാചിതോ അചേതഃ/ 1051
15. അഗ്നേ ത്വന്നോ അന്തമഃ/ ഉത ത്രാത ശിവോ ഭുവോ വരൂഥ്യഃ/ 1052
16. വസുരഗ്നിർവസുശ്രവാഃ/ അച്ഛാനക്ഷിദ്യുമത്തമോ രയിന്ദാഃ/ 1053
17. തന്ത്വാ ശോചിഷ്ഠ ദീദിവഃ/ സുമ്നായ നൂനമീമഹേ സഖിഭ്യഃ/ 1054
18. ഇമാനുകം ഭുവനാ സീഷധേമ/ ഇന്ദ്രശ്ച വിശ്വേ ച ദേവാഃ/ 1055
19. യജ്ഞഞ്ച നസ്തന്വഞ്ച പ്രജാഞ്ച/
ആദിത്യൈരിന്ദ്രസ്സഹസീഷധാതു/ 1056
20. ആദിത്യൈരിന്ദ്രസ്സഗണോ മരുദ്ഭിഃ/ അസ്മഭ്യം ഭേഷജാകരത്/ 1057
21. പ്ര വ ഇന്ദ്രായ വൃത്രഹന്തമായ/
വിപ്രായ ഗാഥം ഗായത യഞ്ജുജോഷതേ/ 1058
22. അർചന്ത്യർകം മരുതസ്വർകാഃ/
ആസ്തോഭതി ശ്രുതോ യുവാസ ഇന്ദ്രഃ/ 1059
23. ഉപപ്രക്ഷേ മധുമതിക്ഷിയന്തഃ/
പുഷ്യേമ രയിന്ധീമഹേ ത ഇന്ദ്ര/ 1060

९१

१. परिस्वानो गरिष्ठाः। पवित्रे सोमो अक्षरत्। मदेषु सर्वधा असि।। १०३८
२. त्वं विप्रस्त्वङ्कविः। मधुप्रजातमन्धसा। मदेषु सर्वधा असि।। १०३९
३. त्वे विश्वे सजोषसः। देवासःपीतिमाशत। मदेषु सर्वधा असि।। १०४०
४. ससुन्वे यो वसनाम्। यो रायामानेताय इळानाम्।
सोमो यस्सुक्षितीनाम्।। १०४१
५. यस्य त इन्द्रःपिबाद्यस्य मरुतः। यस्य वार्यमणा भगः।
आ येन मित्रावरुणा करामहे। एन्द्रमवसेमहे।। १०४२
६. तं वस्सखायो मदाय। पुनानमभिगायत।
शिशुन्न हव्यै स्वदयन्त गूर्तिभिः।। १०४३
७. संवत्स इव मातृभिः। इन्दुर्हिन्वानो अज्यते।
देवावीर्मदो मतिभिःपरिष्कृतः।। १०४४
८. अयन्दक्षाय साधनः। अयं शर्धाय वीतये।
अयन्देवेभ्यो मधुमत्तमस्सुतः।। १०४५
९. सोमाःपवन्त इन्दवः। अस्मभ्यङ्गातुवित्तमाः।
मित्रा स्वाना अरेपसः। स्वाध्य स्वर्विदः।। १०४६

१०. ते पूतासो विपश्चितः। सोमासो दध्याशिरः।
सूरासो न दर्शतासः। जिगत्नवो ध्रुवा घृते।। १०४७
११. सुष्वाणासो व्यद्रिभिः। चिताना गोरधि त्वचि।
इषमस्मभ्यमभितः। समस्वरन् वसुविदः।। १०४८
१२. अया पवा पवस्वैना वसूनि। मांश्चत्व इन्दो सरसिप्रधन्व।
ब्रध्नश्चिद्यस्य वातो न जतिम्। पुरुमेधश्चित्तकवे नरन्धत्।। १०४९
१३. उत न एना पवया पवस्व। अधिश्रुते श्रवाय्यस्य तीर्थे।
षष्टिं सहस्रा नैगुतो वसूनि। वृक्षन्न पक्वन्धूनवद्रणाय।। १०५०
१४. महीमे अस्य वृषनामशूषे। मांश्चत्वेवा पृशने वा वधत्रे।
अस्वापयन्निगुतस्तेहयच्च। अपामित्रं अपाचितो अचेतः।। १०५१
१५. अग्ने त्वन्नो अन्तमः। उत त्रात शिवो भुवो वरूथ्यः।। १०५२
१६. वसुरग्निर्वसुश्रवाः। अच्छानक्षिद्युमत्तमो रयिन्दाः।। १०५३
१७. तन्त्वा शोचिष्ठ दीदिवः। सुम्नाय नूनमीमहे सखिभ्यः।। १०५४
१८. इमानुकं भुवना सीषधेम। इन्द्रश्च विश्वे च देवाः।। १०५५
१९. यज्ञञ्च नस्तन्वञ्च प्रजाञ्च। आदित्यैरिन्द्रस्सहसीषधातु।। १०५६
२०. आदित्यैरिन्द्रस्सगणो मरुत्भिः। अस्मभ्यं भेषजाकरत्।। १०५७
२१. प्र व इन्द्राय वृत्रहन्तमाय। विप्राय गाथङ्गायत यञ्जुजोषते।। १०५८
२२. अर्चन्त्यर्कं मरुतस्वर्काः। आस्तोभति श्रुतो युवास इन्द्रः।। १०५९
२३. उपप्रक्षे मधुमतिक्षियन्तः। पुष्येम रयिन्धीमहे त इन्द्र।। १०६०

92

1. പ്രകാവ്യമുശനേവ ബ്രുവാണഃ/
ദേവോ ദേവാനാഞ്ജനിമാ വിവക്തി/
മഹിവ്രതശ്ശുചിബന്ധുഃപാവകഃ/
പദാവരാഹോ അഭ്യേതി രേഭൻ/ 1061
2. പ്ര ഹംസാസസ്തൃപലാ വഗ്നുമച്ഛ/
അമാദസ്തം വൃഷഗണാ അയാസുഃ/
അങ്ഗോഷിണം പവമാനം സഖായഃ/
ദുർമർഷം വാണം പ്രവദന്തി സാകം/ 1062
3. സ യോജത ഉരു ഗായസ്യ ജൂതിം/
വൃഥാ ക്രീളന്തം മിമതേ ന ഗാവഃ/
പരീണസം കൃണുതേ തിഗ്മശൃങ്ഗഃ/
ദിവാ ഹരിർദദൃശേ നക്തമൃജ്രഃ/ 1063

4. പ്ര സ്വാനാസോ രഥാ ഇവ/ അർവന്തോ ന ശ്രവസ്യവഃ/
സോമോസോ രായേ അക്രമുഃ/ 1064
5. ഹിന്വാനാസോ രഥാ ഇവ/ ദധന്വിരേ ഗഭസ്ത്യോഃ/
ഭരാസഃ കാരിണാമിവ/ 1065
6. രാജാനോ ന പ്രശസ്തിഭിഃ/ സോമാസോ ഗോഭിരഞ്ജതേ/
യജ്ഞോ ന സപ്തധാത്യഭിഃ/ 1066
7. പരിസ്വാനാസ ഇന്ദവഃ/ മദായ ബർഹണാ ഗിരാ/
മധോ അർഷന്തി ധാരയാ/ 1067
8. ആപാനാസോ വിവസ്വതഃ/ ജിന്വന്ത ഉഷസോ ഭഗം/
സൂരാ അണ്വം വിതന്വതേ/ 1068
9. അപദ്യാരാമതീനാം/ പ്രത്നാ ഋണ്വന്തി കാരവഃ/
വൃഷ്ണോ ഹരസ ആയവഃ/ 1069
10. നാഭാ നഭിന്ന ആദദേ/ ചക്ഷുഷാ സൂര്യന്ദൃശേ/
കവേരപത്യമാദുഹേ/ 1070
11. സമീചീനാസ ആശത/ ഹോതാരസ്സപ്ത ജാമയഃ/
പദമേകസ്യ പിപ്രതഃ/ 1071
12. അഭിപ്രിയാ ദിവസ്പദം/ അധ്വര്യുഭിർഗുഹാഹിതം/
സൂരഃപശ്യതി ചക്ഷസാ/ 1072
13. അസൃഗ്രമിന്ദവഃ പഥാ/ ധർമന്നൃതസ്യ സുശ്രിയഃ/
വിദാനാ അസ്യ യോജനാ/ 1073
14. പ്ര ധാരാമധോ അഗ്രിയഃ/ മഹീരപോ വിഗാഹതേ/
ഹവിർഹവിഷ്ഷു വന്ദ്യഃ/ 1074
15. പ്രയുജാ വാചോ അഗ്രിയഃ/ വൃഷോ അചിക്രദദ്വനേ/
സദ്മാഭി സത്യോ അധ്വരഃ/ 1075
16. പരി യത്കാവ്യാ കവിഃ/ നൃമ്ണാ പുനാനോ അർഷതി/
സ്വർവാജീ സിഷാസതി/ 1076
17. പവമാനോ അഭിസ്പൃധഃ/ വിശോ രാജേവ സീദതി/
യദീമൃണ്വന്തി വേധസഃ/ 1077
18. അവ്യാവാരേ പരിപ്രിയഃ/ ഹരിർവനേഷു സീദതി/
രേഭോ വനുഷ്യതേ മതീ/ 1078
19. സ വായുമിന്ദ്രമശ്വിനാ/ സാകം മദേന ഗച്ഛതി/
രണാ യോ അസ്യ ധർമണാ/ 1079
20. ആ മിത്രേ വരുണേ ഭഗേ/ മധോഃ പവന്ത ഊർമയഃ/
വിദാനാ അസ്യ ശക്മഭിഃ/ 1080
21. അസ്മഭ്യം രോദസീ രയിം/ മധ്വോ വാജസ്യ സാതയേ/
ശ്രവോ വസൂനി സഞ്ജിതം/ 1081
22. ആ തേ ദക്ഷം മയോ ഭുവം/ വഹ്നിമദ്യാ വൃണീമഹേ/
പാന്തമാ പുരുസ്പൃഹം/ 1082

23. ആമന്ദ്രമാവരേണ്യം ആ/ വിപ്രമാമനീഷിണം/
പാന്തമാ പുരുസ്പൃഹം/ 1083
24. ആ രയിമാസുചേതുനം/ ആ സുക്രതോ തനൂഷ്വാ/
പാന്തമാ പുരുസ്പൃഹം/ 1084

९२

१. प्रकाव्यमुशनेव ब्रुवाणः। देवो देवानाञ्जनिमा विवक्ति।
महिव्रतश्शुचिबन्धुः पावकः। पदावराहो अभ्येति रेभन्।। १०६१
२. प्र हंसासस्तृपला वग्नुमच्छ। अमादस्तं वृषगणा अयासुः।
अङ्गोषिणं पवमानं सखायः। दुर्मर्षं वाणं प्रवदन्ति साकम्।। १०६२
३. स योजत उरु गायस्य जूतिम्। वृथा क्रीळन्तं मिमते न गावः।
परीणसं कृणुते तिग्मशृङ्गः। दिवा हरिर्ददृशे नक्तमृज्रः।। १०६३
४. प्र स्वानासो रथा इव। अर्वन्तो न श्रवस्यवः। सोमासो राये अक्रमुः।। १०६४
५. हिन्वानासो रथा इव। दधन्विरे गभरस्त्योः। भरासः कारिणामिव।। १०६५
६. राजानो न प्रशस्तिभिः। सोमासो गोभिरञ्जते। यज्ञो न सप्तधातृभिः।। १०६६
७. परिस्वानास इन्दवः। मदाय बर्हणा गिरा। मधो अर्षन्ति धारया।। १०६७
८. आपानासो विवस्वतः। जिन्वन्तः उषसो भगम्। सूरा अण्वं वितन्वते।। १०६८
९. अपद्वारामतीनाम्। प्रत्ना ऋण्वन्ति कारवः। वृष्णो हरस आयवः।। १०६९
१०.नाभा नभिन्न आददे। चक्षुषा सूर्यन्दृशे। कवेरपत्यमादुहे।। १०७०
११.समीचीनास आशत। होतारस्सप्त जामयः। पदमेकस्य पिप्रतः।। १०७१
१२.अभिप्रिया दिवस्पदम्। अध्वर्युभिर्गुहाहितम्। सूरःपश्यति चक्षसा।। १०७२
१३.असृग्रमिन्दवःपथा। धर्मन्नृतस्य सुश्रियः। विदाना अस्य योजना।। १०७३
१४.प्र धारामधो अग्रियः। महीरपो विगाहते। हविर्हविष्षु वन्द्यः।। १०७४
१५.प्रयुजा वाचो अग्रियः। वृषो अचिक्रदद्वने। सत्माभि सत्यो अध्वरः।। १०७५
१६.परि यत्काव्या कविः। नृम्णा पुनानो अर्षति। स्वर्वाजी सिषासति।। १०७६
१७.पवमानो अभिस्पृधः। विशो राजेव सीदति। यदीमृण्वन्ति वेधसः।। १०७७
१८.अव्यावारे परिप्रियः। हरिर्वनेषु सीदति। रेभो वनुष्यते मती।। १०७८
१९.स वायुमिन्द्रमश्विना। साकं मदेन गच्छति। रणा यो अस्य धर्मणा।। १०७९
२०.आ मित्रे वरुणे भगे। मधोः पवन्त ऊर्मयः। विदाना अस्य शक्मभिः।। १०८०
२१.अस्मभ्यं रोदसी रयिम्। मध्वो वाजस्य सातये।
श्रवो वसूनि सञ्जितम्।। १०८१

२२.आ ते दक्षं मयो भुवम्। वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम्।। १०८२

२३.आमन्द्रमावरेण्यम्। आ विप्रमामनीषिणम्। पान्तमा पुरुस्पृहम्।। १०८३

२४.आ रयिमासुचेतुनम्। आ सुक्रतो तनूष्वा। पान्तमा पुरुस्पृहम्।। १०८४

93

1. വൈശ്യാനരോ അജീജനത്/ അഗ്നിർനോ നവ്യസീം മതിം/
   ക്ഷ്മയാ വൃധാന ഓജസാ/ 1085
2. ദിവി പൃഷ്ടോ അരോചത/ അഗ്നിർവൈശ്വാനരോ ബൃഹൻ/
   ജ്യോതിഷാ ബാധതേ തമഃ/ 1086
3. സനഃ പാവകദീദിഹി/ അഗ്നേ വൈശ്യാനരദ്യുമാൻ/
   ജമദഗ്നിഭിരാഹുതഃ/ 1087
4. മൂർധാനന്ദിവോ അരതിം പൃഥിവ്യാഃ/
   വൈശ്വാനരമൃത ആ ജാതമഗ്നിം/
   കവിം സമ്രാജമതിഥിഞ്ജനാനാം/
   ആസന്നാ പ്രാത്രഞ്ജനയന്ത ദേവാഃ/ 1088
5. ത്വേ വിശ്വേ അമൃതജായമാനം/
   ശിശുന്നദേവാ അഭിസന്നവന്ത/
   തവ ക്രതുഭിരമൃതത്വമായൻ/
   വൈശ്വാനര യത്പിത്രോരദീദേഃ/ 1089
6. നാഭിയ്യജ്ഞാനാം സദനം രയീണാം/
   മഹാമാഹാവമഭിസന്നവന്ത/
   വൈശ്വാനരം രഥ്യമധ്വരാണാം/
   യജ്ഞസ്യ കേതുഞ്ജനയന്ത ദേവാഃ/ 1090
7. പ്ര വോ മിത്രായ ഗായത/ വരുണായ വിപാ ഗിരാ/
   മഹിക്ഷത്രാവൃതം ബൃഹത്/ 1091
8. സമ്രാജാ യാ ഘൃതയോനീ/ മിത്രശ്ചോഭാ വരുണശ്ച/
   ദേവാ ദേവേഷു പ്രശസ്താ/ 1092
9. താ നശ്ശക്തം പാർഥിവസ്യ/ മഹോ രായോ ദിവ്യസ്യ/
   മഹി വാൻ[5] ക്ഷത്രന്ദേവേഷു/ 1093
10. ഇന്ദ്രായാഹി ചിത്രഭാനോ/ സുതാ ഇമേ ത്വായവഃ/
    അണീഭിസ്തനാ പൂതാസഃ/ 1094
11. ഇന്ദ്രായാഹി ധിയേഷിതഃ/ വിപ്രജൂതസ്സുതാവതഃ/
    ഉപ ബ്രഹ്മാണി വാഘതഃ/ 1095
12. ഇന്ദ്രായാഹി തൂതുജാനഃ/ ഉപ ബ്രഹ്മാണി ഹരിവഃ/
    സുതേ ദധിഷ്വനശ്ചനഃ/ 1096

९३

१. वैश्वानरो अजीजनत्। अग्निर्नो नव्यसीं मतिम्। क्ष्मया वृधान ओजसा।। १०८५
२. दिवि पृष्टो अरोचत। अग्निर्वैश्वानरो बृहन्। ज्योतिषा बाधते तमः।। १०८६
३. सनःपावकदीदिहि। अग्ने वैश्वानरद्युमान्। जमदग्निभिराहुतः।। १०८७
४. मूर्धानन्दिवो अरतिं पृथिव्याः। वैश्वानरमृत आ जातमग्निम्।
कविं सम्राजमतिथिञ्जनानाम्। आसन्ना प्रात्रञ्जनयन्त देवाः।। १०८८
५. त्वे विश्वे अमृतजायमानम्। शिशुन्नदेवा अभिसन्नवन्त।
तव क्रतुभिरमृतत्वमायन्। वैश्वानर यत् पित्रोरदीदेः।। १०८९
६. नाभिय्यज्ञानां सदनं रयीणाम्। महामाहावमभिसन्नवन्त।
वैश्वानरं रथ्यमध्वराणाम्। यज्ञस्य केतुञ्जनयन्त देवाः।। १०९०
७. प्र वो मित्राय गायत। वरुणाय विपा गिरा। महिक्षत्रावृतं बृहत्।। १०९१
८. सम्राजा या घृतयोनी। मित्रश्चोभा वरुणश्च। देवा देवेषु प्रशस्ता।। १०९२
९. ता नश्शक्तं पार्थिवस्य। महो रायो दिव्यस्य। महि वान् क्षत्रन्देवेषु।। १०९३
१०. इन्द्रायाहि चित्रभानो। सुता इमे त्वायवः। अण्वीभिस्तना पूतासः।। १०९४
११. इन्द्रायाहि धियेषितः। विप्रजूतस्सुतावतः। उप ब्रह्माणि वाघतः।। १०९५
१२. इन्द्रायाहि तूतुजानः। उप ब्रह्माणि हरिवः। सुते दधिष्वनश्चनः।। १०९६

94

1. പ്രോ അയാസീദിന്ദുരിന്ദ്രസ്യ നിഷ്കൃതം/
സഖാ സഖ്യുർന പ്രമിനാതി സങ്ഗിരം/
മരിയ ഇവ യുവതിഭിസ്സമർഷതി/
സോമഃ കലശേ ശതയാ മനാപഥാ/ 1097
2. പ്ര വോ ധിയോ മന്ദ്രയുവോ വിപന്യുവഃ/
പനസ്യുവസ്സംവരണേഷ്വക്രമുഃ/
ഹരിം ക്രീളന്തമഭ്യനൂഷതസ്തുഭഃ/
അഭി ധേനവഃ പയസേദശിശ്രയുഃ/ 1098
3. ആനസ്സോമസ്സ്യുതം പിപ്യുഷീമിഷം/
ഇന്ദോ പവസ്വ പവമാന ഊർമിണാ/
യാ നോ ദോഹതേ ത്രിരഹന്നസശ്ചുഷീ/
ക്ഷുമദ്വാജവൻ മധുമത്സുവീര്യം/ 1099
4. നകിഷ്ടങ്കർമണാ നാശത്/ യശ്ചകാര സദാവൃധം/
ഇന്ദ്രന്നയജ്ഞൈർവിശ്വഗൂർതമൃഭ്വസം/
അധൃഷ്ടന്ധൃഷ്ണുമോജസാ/ 1100

5. അഷാഢമുഗ്രം പൃതനാസു സാസഹിം/
യസ്മിന്മഹീരുരുജ്രയുഃ/
സന്ധേനവോ ജായമാനേ അനോനവുഃ/
ദ്യാവഃ ക്ഷാമൈരനോനവുഃ/ 1101

९४

१. प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतम्। सखा सख्युर्न प्रमिनाति सङ्गिरम्।
मरिय इव युवतिभिस्समर्षति। सोमः कलशे शतया मनापथा।। १०९७
२. प्र वो धियो मन्द्रयुवो विपन्युवः। पनस्युवस्संवरणेष्वक्रमुः।
हरिं क्रीळन्तमभ्यनूषतस्तुभः। अभि धेनवःपयसेदशिश्रयुः।। १०९८
३. आनस्सोमस्सय्यतं पिप्युषीमिषम्। इन्दो पवस्व पवमान ऊर्मिणा।
या नो दोहते त्रिरहन्नसश्चुषी। क्षुमद्वाजवन् मधुमत्सुवीर्यम्।। १०९९
४. नकिष्टङ्कर्मणा नाशत्। यश्चकार सदावृधम्।
इन्द्रन्नयज्ञैर्विश्वगूर्तमृभ्वसम्। अधृष्टन्धृष्णुमोजसा।। ११००
५. अषाढमुग्रं पृतनासु सासहिम्। यस्मिन्महीरुरुज्रयुः।
सन्धेनवो जायमाने अनोनवुः। द्यावः क्षामैरनोनवुः।। ११०१

95

1. ഏഷസ്യ ധാരയാ സുതഃ/ അവ്യാവാരേഭിഃ പവതേ മദിന്തമഃ/
ക്രീളന്നൂർമിരപാമിവ/ 1102
2. യ ഉസ്രിയാ അപി യാ അന്തരശ്മനി/ നിർഗാ അകൃന്തദോജസാ/
അഭിവ്രജന്തത്നിഷേ ഗവ്യമശ്വ്യം/ വർമീവ ധൃഷ്ണവാരുജ/ 1103
3. സഖായ ആ നിഷീദത/ പുനാനായ പ്രഗായത/
ശിശുന്നയജ്ഞൈഃ പരിഭൂഷതശ്രിയേ/ 1104
4. സമീവത്സന്ന മാത്യൃഭിഃ/ സൃജതാ ഗയസാധനം/
ദേവാവ്യാം മദമഭിദ്യുശവസം/ 1105
5. പുനാതാ ദക്ഷസാധനം/ യഥാ ശർധായ വീതയേ/
യഥാ മിത്രായ വരുണായ ശന്തമം/ 1106
6. പ്രവ്രാജ്യക്ഷാഃ/ സഹസ്രധാരഃ/
തിരഃ പവിത്രം/ വിവാരമവ്യം/ 1107
7. സ വാജ്യക്ഷാഃ/ സഹസ്രരേതാഃ/
അദ്ഭിർമൃജാനഃ/ ഗോഭിശ്രീണാനഃ/ 1108
8. പ്ര സോമയാഹി/ ഇന്ദ്രസ്യ കുക്ഷാ/
നൃഭിരേയമാണഃ അദ്രിഭിസ്സുതഃ/ 1109

9. യേ സോമാസഃപരാവതി/ യേ അർവാവതി സുന്വിരേ/
യേ വാദശ്ശര്യണാവതി/ 1110
10. യ ആർജീകേഷു കൃത്വസു/ യേ മധ്യേ പസ്ത്യാനാം/
യേ വാജനേഷു പഞ്ചസു/ 1111
11. തേ നോ വൃഷ്ടിന്ദിവസ്പരി/ പവന്താമാസുവീര്യം/
സ്വാനാ ദേവാസ ഇന്ദവഃ/ 1112
12. ആ തേ വത്സോ മനോ യമത്/ പരമാച്ചിത് സധസ്ഥാത്/
അഗ്നേ ത്വാങ്കാമയേ ഗിരാ / 1113
13. പുരുത്രാഹി സദൃങ്ങസി/ ദിശോ വിശ്വാ അനുപ്രഭുഃ/
സമത്സു ത്വാ ഹവാമഹേ/ 1114
14. സമത്സ്വഗ്നിമവസേ/ വാജയന്തോ ഹവാമഹേ/
വാജേഷു ചിത്രരാധസം/ 1115
15. ത്വന്ന ഇന്ദ്രാഭര/ ഓജോ നൃമ്ണം ശതക്രതോ വിചർഷണേ/
ആ വീരം പൃതനാസഹം/ 1116
16. ത്വം ഹി നഃപിതാവസോ/ ത്വം മാതാ ശതക്രതോ ബഭൂവിഥ/
അഥാ തേ സുമ്നമീമഹേ/ 1117
17. ത്വാം ശുഷ്മിൻ പുരുഹൂത/
വാജയന്തമുപബ്രുവേ സഹസ്കൃത/
സ നോ രാസ്വ സുവീര്യം/ 1118
18. യദിന്ദ്ര ചിത്രമ ഇഹ ന/ അസ്തി ത്വാദാതമദ്രിവഃ/
രാധസ്തന്നോ വിദദ്വസോ/ ഉഭയാ ഹസ്ത്യാഭര/ 1119
19. യത്തേ ദിക്ഷു പ്രരാധ്യം/ മനോ അസ്തി ശ്രുതം ബൃഹത്/
തേന ദൃഢാചിദദ്രിവഃ/ ആ വാജന്ദർഷി സാതയേ/ 1120
20. യന്മന്യസേ വരേണ്യം/ ഇന്ദ്രദ്യുക്ഷന്തദാഭര/
വിദ്യാമതസ്യതേ വയം/ അകൂപാരസ്യ ദാവനേ/ 1121

९५

१. एषस्य धारया सुतः। अव्यावारेभिःपवते मदिन्तमः। क्रीलन्नूर्मिरपामिव।। ११०२
२. य उस्रिया अपि या अन्तरश्मनि। निर्गा अकृन्तदोजसा।
अभिव्रजन्तत्निषे गव्यमश्व्यम्। वर्मीव धृष्णवारुज।। ११०३
३. सखाय आ निषीदत। पुनानाय प्रगायत। शिशुन्नयज्ञैःपरिभूषतश्रिये।। ११०४
४. समीवत्सन्न मातृभिः। सृजता गयसाधनम्।
देवाव्यां मदमभिद्विशवसम्।। ११०५
५. पुनाता दक्षसाधनम्। यथा शर्धाय वीतये।
यथा मित्राय वरुणाय शन्तमम्।। ११०६

६. प्रव्राज्यक्षाः। सहस्रधारः। तिरःपवित्रम्। विवारमव्यम्।। ११०७
७. स वाज्यक्षाः। सहस्ररेताः। अत्भिर्मृजानः। गोभिश्रीणानः।। ११०८
८. प्र सोमयाहि इन्द्रस्य कुक्षा। नृभिर्येमाणः अद्रिभिस्सुतः।। ११०९
९. ये सोमासःपरावति। ये अर्वावति सुन्विरे। ये वादश्शर्यणावति।। १११०
१०. य आर्जीकेषु कृत्वसु। ये मध्ये पस्त्यानाम्। ये वाजनेषु पञ्चसु।। ११११
११. ते नो वृष्टिन्दिवस्परि। पवन्तामासुवीर्यम्। स्वाना देवास इन्दवः।। १११२
१२. आ ते वत्सो मनो यमत्। परमाच्चित् सधस्थात्।
अग्ने त्वाङ्कामये गिरा।। १११३
१३. पुरुत्राहि सदृङ्ङसि। दिशो विश्वा अनुप्रभुः। समत्सु त्वा हवामहे।। १११४
१४. समत्स्वग्निमवसे। वाजयन्तो हवामहे। वाजेषु चित्रराधसम्।। १११५
१५. त्वन्न इन्द्राभर। ओजो नृम्णं शतक्रतो विचर्षणे।
आ वीरं पृतनासहम्।। १११६
१६. त्वं हि नःपिता वसो। त्वं माता शतक्रतो बभूविथ।
अथा ते सुम्नमीमहे।। १११७
१७. त्वां शुष्मिन् पुरुहूत। वाजयन्तमुपब्रुवे सहस्कृत।
स नो रास्व सुवीर्यम्।। १११८
१८. यदिन्द्र चित्रम इह न। अस्ति त्वादातमद्रिवः।
राधस्तन्नो विदद्वसो। उभया हस्त्याभर।। १११९
१९. यत्ते दिक्षु प्रराध्यम्। मनो अस्ति श्रुतं बृहत्।
तेन दृढाचिदद्रिवः। आ वाजन्दर्षि सातये।। ११२०
२०. यन्मन्यसे वरेण्यम्। इन्द्रद्युक्षन्तदाभर।
विद्यामतस्यते वयम्। अकूपारस्य दावने।। ११२१

96

1. ശിശുഞ്ജജ്ഞാനം ഹര്യതം മൃജന്തി/
ശുംഭന്തി വിപ്രം മരുതോ ഗണേന/
കവിർഗീർഭിഃ കാവ്യേനാകവിസ്സൻ/
സോമഃ പവിത്രമത്യേതി രേഭൻ/ 1122
2. ഋഷിമനാ യ ഋഷികൃത്സ്വർഷാഃ/
സഹസ്രനീഥഃപദവിഃ കവീനാം/
തൃതീയന്ധാമ മഹിഷസ്സിഷാസൻ/
സോമോ വിരാജമനുരാജ തിഷ്ടുപ്/ 1123

3. ചമൂഷച്ഛ്യേനശ്ശകുനോ വിഭൃത്വാ/
ഗോവിന്ദുർദ്രപ്സ ആയുധാനി ബിഭ്രത്/
അപാമൂർമിം സചമാനസ്സമുദ്രം/
തുരീയന്ധാമ മഹിഷോ വിവക്തി/ 1124
4. ഏതേ സോമാ അഭിപ്രിയം/ ഇന്ദ്രസ്യ കാമമക്ഷരൻ/
വർധന്തോ അസ്യ വീര്യം/ 1125
5. പുനാനാസശ്ചമൂഷദഃ/ ഗച്ഛന്തോ വായുമശ്വിനാ/
തേ നോ ധത്ത സുവീര്യം/ 1126
6. ഇന്ദ്രശ്ച സോമരാധസേ/ പുനാനോ ഹാർദി ചോദയ/
ദേവാനായ്യോനിമാസദം/ 1127
7. മൃജന്തി ത്വാ ദശക്ഷിപഃ/ ഹിന്വന്തി സപ്തധീതയഃ/
അനുവിപ്രാ അമാദിഷുഃ/ 1128
8. ദേവേഭ്യസ്ത്വാമദായ കം/ സൃജാനതിമേഷ്യഃ/
സങ്ഗോഭിർവാസയാമസി/ 1129
9. പുനാനഃ കലശേഷ്വാ/ വസ്ത്രാണ്യരുഷോ ഹരിഃ/
പരി ഗവ്യാന്യവ്യത/ 1130
10. മഘോന ആപവസ്വനഃ/ ജഹി വിശ്വാ അപദ്വിഷഃ/
ഇന്ദോ സഖായമാവിശ/ 1131
11. നൃചക്ഷസന്ത്വാ വയം/ ഇന്ദ്രപീതം സ്വർവിദം/
ധുക്ഷീമഹി പ്രജാമിഷം/ 1132
12. വൃഷ്ടിന്ദ്വിവഃപരിസ്രവ/ ദ്യുമ്നം പൃഥിവ്യാ അധി/
സഹോ നസ്സോമ പൃത്സുധാഃ/ 1133
13. സോമഃപുനാനോ അർഷതി/ സഹസ്രധാരോ അത്യവിഃ/
വായോരിന്ദ്രസ്യ നിഷ്കൃതം/ 1134
14. പവമാനമവസ്യവഃ/ വിപ്രമഭിപ്രഗായത/
സുഷ്വാണന്ദേവവീതയേ/ 1135
15. പവന്തേ വാജസാതയേ/ സോമാസ്സഹസ്രപാജസഃ/
ഗൃണാനാ ദേവവീതയേ/ 1136
16. ഉത നോ വാജസാതയേ/ പവസ്വ ബൃഹതീരിഷഃ/
ദ്യുമദിന്ദോ സുവീര്യം/ 1137
17. തേനസ്സഹസ്രിണം രയിം/ പവന്താമാസുവീര്യം/
സ്വാനാ ദേവാസ ഇന്ദവഃ/ 1138
18. അത്യാഹി യാനാ ന ഹേത്യഭിഃ/ അസൃഗ്രം വാജസാതയേ/
വിവാരമവ്യമാശവഃ/ 1139
19. വാശ്രാ അർഷന്തീന്ദവഃ/ അഭിവത്സന്ന മാതരഃ/
ദധന്വിരേ ഗഭസ്ത്യോഃ/ 1140
20. ജുഷ്ട ഇന്ദ്രായ മത്സരഃ/ പവമാനഃ കനിക്രദത്/
വിശ്വാ അപദ്വിഷോ ജഹി/ 1141

21. അപഘ്നന്തോ അരാവിണ്ണഃ/ പവമാനാ സ്വർദൃശഃ/
യോനാവൃതസ്യ സീദത/ 1142
22. സോമാ അസൃഗ്രമിന്ദവഃ/ സുതാ ഋതസ്യ ധാരയാ/
ഇന്ദ്രായ മധുമത്തമാഃ/ 1143
23. അഭി വിപ്രാ അനൂഷത/ ഗാവോ വത്സന്ന ധേനവഃ/
ഇന്ദ്രം സോമസ്യ പീതയേ/ 1144
24. മദച്യുത് ക്ഷേതിസാദനേ/ സിന്ധോരൂർമാ വിപശ്ചിത്/
സോമോ ഗൗരീ അധിശ്രിതഃ/ 1145
25. ദിവോ നാഭാ വിചക്ഷണഃ/ അവ്യാവാരേ മഹീയതേ/
സോമോ യസ്സുക്രതുഃ കവിഃ/ 1146
26. യസ്സോമഃ കലശേഷ്വാ/ അന്തഃ പവിത്ര ആഹിതഃ/
തമിന്ദുഃ പരിഷസ്വജേ/ 1147
27. പ്രവാചമിന്ദുരിഷ്യതി/ സമുദ്രസ്യാധിവിഷ്ടപി/
ജിന്വൻ കോശം മധുശ്ചുതം/ 1148
28. നിത്യസ്തോത്രോ വനസ്പതിഃ/ ധേനാമന്തസ്സബർദുഘാം/
ഹിന്വാനോ മാനുഷാ യുജാ/ 1149
29. ആ പവമാന ധാരയ/ രയിം സഹസ്രവർചസം/
അസ്മേ ഇന്ദോ സ്വാഭുവം/ 1150
30. അഭിപ്രിയാ ദിവഃ കവിഃ/ വിപ്രസ്സുധാരയാ സുതഃ/
സോമോ ഹിന്വേ പരാവതി/ 1151
31. ഉത്തേ ശുഷ്മാ സ ഈരതേ/ സിന്ധോരൂർമേരിവസ്വനഃ/
വാണസ്യ ചോദയാ പവിം/ 1152
32. പ്ര സവേത ഉദീരതേ/ തിസ്രോ വാചോ മഖസ്യുവഃ/
യദവ്യ ഏഷി സാനവി/ 1153
33. അവ്യാവാരൈഃ പരിപ്രിയം/ ഹരിം ഹിന്വന്ത്യദ്രിഭിഃ/
പവമാനം മധുശ്ചുതം/ 1154
34. ആ പവസ്വ മദിന്തമ/ പവിത്രസ്ധാരയാ കവേ/
അർകസ്യ യോനിമാസദം/ 1155
35. സ പവസ്വ മദിന്തമ/ ഗോഭിരഞ്ജാനോ അക്തുഭിഃ/
ഏന്ദ്രസ്യ ജഠരം വിശ/ 1156
36. സ പവസ്വ യ ആവിഥ/ ഇന്ദ്രം വൃത്രായ ഹന്തവേ/
വവ്രിവാംസം മഹീരപഃ/ 1157
37. ത്വോതാസസ്തവാവസാ/ സ്യാമവന്വന്ത ആമുരഃ/
സോമവ്രതേഷു ജാഗൃഹി/ 1158
38. സുവീരാസോ വയന്ധനാ/ ജയേമ സോമമീഡ്യഃ/
പുനാനോ വർധനോ ഗിരഃ/ 1159
39. അപഘ്നൻ പവതേ മൃധഃ/ അപ സോമോ അരാവ്ണഃ/
ഗച്ഛന്നിന്ദ്രസ്യ നിഷ്കൃതം/ 1160

40. ന ത്വാ ശതഞ്ചനഹ്രുതഃ/ രാധോദിത്സന്തമാമിനൻ/
യത്പുനാനോ മഖസ്യസേ/ 1161
41. മഹോ നോ രായ ആഭര/ പവമാന ജഹീമൃധഃ
രാസ്വോന്ദോ വീരവദ്യശഃ/ 1162
42. അയാവീതി പരിസ്രവ/ യസ്ത ഇന്ദോ മദേഷ്വാ/
അവാഹന്നവതീർനവ/ 1163
43. പുരസ്സദ്യ ഇത്ഥാ ധിയേ/ ദിവോദാസായ ശംബരം/
അധത്യന്തുർവശയ്യദും/ 1164
44. പരി നോ അശ്വമശ്വവിത്/ ഗോമദിന്ദോ ഹിരണ്യവത്/
ക്ഷരാ സഹസ്രിണീരിഷഃ/ 1165

९६

१. शिशुञ्जज्ञानं हर्यतं मृजन्ति। शुंभन्ति विप्रं मरुतो गणेन।
कविर्गीर्भिः काव्येनाकविरसन्। सोमःपवित्रमत्येति रेभन्।। ११२२
२. ऋषिमना य ऋषिकृत्स्वर्षाः। सहस्रनीथःपदविः कवीनाम्।
तृतीयन्धाममहिषस्सिषासन्। सोमो विराजमनुराजतिष्टुप्।। ११२३
३. चमूषच्छ्येनश्शकुनो विभृत्वा। गोविन्दुर्द्रप्स आयुधानि बिभ्रत्।
अपामूर्मिं सचमानस्समुद्रम्। तुरीयन्धाम महिषो विवक्ति।। ११२४
४. एते सोमा अभिप्रियम्। इन्द्रस्य काममक्षरन्। वर्धन्तो अस्य वीर्यम्।। ११२५
५. पुनानासश्चमूषदः। गच्छन्तो वायुमश्विना। ते नो धत्त सुवीर्यम्।। ११२६
६. इन्द्रश्च सोमराधसे। पुनानो हार्दि चोदय। देवानाय्योनिमासदम्।। ११२७
७. मृजन्ति त्वा दशक्षिपः। हिन्वन्ति सप्तधीतयः। अनुविप्रा अमादिषुः।। ११२८
८. देवेभ्यस्त्वामदाय कम्। सृजानतिमेष्यः। सङ्गोभिर्वासयामसि।। ११२९
९. पुनानः कलशेष्वा। वस्त्राण्यरुषो हरिः। परि गव्यान्यव्यत।। ११३०
१०. मघोन आपवस्वनः। जहि विश्वा अपद्विषः। इन्दो सखायमाविश।। ११३१
११. नृचक्षसन्त्वा वयम्। इन्द्रपीतं स्वर्विदम्। धुक्षीमहि प्रजामिषम्।। ११३२
१२. वृष्टिन्दिवःपरिस्रव। द्युम्नं पृथिव्या अधि। सहो नस्सोम पृत्सुधाः।। ११३३
१३. सोमःपुनानो अर्षति। सहस्रधारो अत्यविः। वायोरिन्द्रस्य निष्कृतम्।। ११३४
१४. पवमानमवस्यवः। विप्रमभिप्रगायत। सुष्वाणन्देववीतये।। ११३५
१५. पवन्ते वाजसातये। सोमास्सहस्रपाजसः। गृणाना देववीतये।। ११३६
१६. उत नो वाजसातये। पवस्व बृहतीरिषः। द्युमदिन्दो सुवीर्यम्।। ११३७
१७. तेनस्सहस्रिणं रयिम्। पवन्तामासुवीर्यम्। स्वाना देवास इन्दवः।। ११३८

१८.अत्याहि याना न हेतृभिः। असृग्रं वाजसातये। विवारमव्यमाशवः।। ११३९
१९.वाश्रा अर्षन्तीन्दवः। अभिवत्सन्न मातरः। दधन्विरे गभस्त्योः।। ११४०
२०.जुष्ट इन्द्राय मत्सरः। पवमानः कनिक्रदत्। विश्वा अपद्विषो जहि।। ११४१
२१.अपघ्नन्तो अराविण्णः। पवमाना स्वर्दृशः। योनावृतस्य सीदत।। ११४२
२२.सोमा असृग्रमिन्दवः। सुता ऋतस्य धारया। इन्द्राय मधुमत्तमाः।। ११४३
२३.अभि विप्रा अनूषत। गावो वत्सन्न धेनवः। इन्द्रं सोमस्य पीतये।। ११४४
२४.मदच्युत् क्षेतिसादने। सिन्धोरूर्मा विपश्चित्। सोमो गौरी अधिश्रितः।। ११४५
२५.दिवो नाभा विचक्षणः। अव्यावारे महीयते। सोमो यस्सुक्रतुः कविः।। ११४६
२६.यस्सोमः कलशेष्वा। अन्तःपवित्र आहितः। तमिन्दुः परिषस्वजे।। ११४७
२७.प्रवाचमिन्दुरिष्यति। समुद्रस्याधिविष्टपि। जिन्वन् कोशं मधुश्चुतम्।। ११४८
२८.नित्यस्तोत्रो वनस्पतिः। धेनामन्तस्सबर्दुघाम्। हिन्वानो मानुषा युजा।। ११४९
२९.आ पवमान धारय। रयिं सहस्रवर्चसम्। अस्मे इन्दो स्वाभुवम्।। ११५०
३०.अभिप्रिया दिवः कविः। विप्रस्सधारया सुतः। सोमो हिन्वे परावति।। ११५१
३१.उत्ते शुष्मा स ईरते। सिन्धोरूर्मेरिवस्वनः। वाणस्य चोदया पविम्।। ११५२
३२.प्र सवेत उदीरते। तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि।। ११५३
३३.अव्यावारैःपरिप्रियम्। हरिं हिन्वन्त्यद्रिभिः। पवमानं मधुश्चुतम्।। ११५४
३४.आ पवस्व मदिन्तम। पवित्रन्धारया कवे। अर्कस्य योनिमासदम्।। ११५५
३५.स पवस्व मदिन्तम। गोभिरञ्जानो अक्तुभिः। एन्द्रस्य जठरं विश।। ११५६
३६.सपवस्व य आविथ। इन्द्रं वृत्राय हन्तवे। वव्रिवांसं महीरपः।। ११५७
३७.त्वोतासस्तवावसा। स्यामवन्वन्त आमुरः। सोमव्रतेषु जागृहि।। ११५८
३८.सुवीरासो वयन्धना। जयेम सोममीढ्वः। पुनानो वर्धनो गिरः।। ११५९
३९.अपघ्नन् पवते मृधः। अप सोमो अराविण्णः। गच्छन्निन्द्रस्य निष्कृतम्।। ११६०
४०.न त्वा शतञ्चनह्रुतः। राधोदित्सन्तमामिनन्। यत्पुनानो मखस्यसे।। ११६१
४१.महो नो राय आभर। पवमान जहीमृधः। रास्वेन्दो वीरवद्यशः।। ११६२
४२.अयावीति परिस्रव। यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव।। ११६३
४३.पुररत्सद्य इत्था धिये। दिवोदासाय शंबरम्। अधत्यन्तुर्वशय्यदुम्।। ११६४
४४.परि नो अश्वमश्ववित्। गोमदिन्दो हिरण्यवत्। क्षरा सहस्रिणीरिषः।। ११६५

97

1. ത്വം ഹ്യഗ്നേ അഗ്നിനാ/ വിപ്രോ വിപ്രേണ സൻ സതാ/
സഖാ സഖ്യാ സമിധ്യസേ/ 1166

2. ത്വം സുന്വതോ യജമാനായ/ രയിന്ധേഹി സഹസ്രിണം/
അഗ്നേ വീരവതീമിഷം/ 1167
3. അഗ്നേ ഭ്രാതസ്സുഹസ്കൃത/ രോഹിദശ്വ ശുചിവ്രത/
ഇമം സ്തോമഞ്ജുഷസ്വ നഃ/ 1168
4. അഗ്നിം വോ ദേവമഗ്നിഭിസ്സജോഷാഃ/
യജിഷ്ഠന്ദൂതമധ്വരേ കൃണുധ്വം/
യോ മർത്യേഷു നിധ്രുവിര്യതാ വാ/
തപുർമൂർധാ ഘൃതാന്നഃ പാവകഃ/ 1169
5. പ്രോഥദശ്വാ ന യവസേf വിഷ്യൻ/
യദാമഹസ്സംവരണാദ്വ്യസ്ഥാത്/
ആദസ്യ വാതോ അനുവാതി ശോചിഃ/
അധസ്മ തേ വ്രജനം കൃഷ്ണമസ്തി/ 1170
6. ഉദ്യസ്യ തേ നവജാതസ്യ വൃഷ്ണഃ/
അഗ്നേ ചരന്ത്യജരാ ഇധാനാഃ/
അച്ഛാ ദ്യാമരുഷോ ധൂമ ഏതി/
സന്ദൂതോ അഗ്ന ഈയസേ ഹി ദേവാൻ/ 1171
7. യദദ്യ സൂര ഉദിതേ/ അനാഗാ മിത്രോ അര്യമാ/
സുവാതി സവിതാ ഭഗഃ/ 1172
8. സുപ്രാവീരസ്തു സക്ഷയഃ/ പ്രാനുയാമൻ സുദാനവഃ/
യേ നോ അംഹോതിപിപ്രതി/ 1173
9. ഉത സ്വരാജോ അതിദിഃ/ അദബ്ധസ്യൗ വ്രതസ്യ യേ/
മഹോ രാജാന ഈശതേ/ 1174
10. തമിന്ദ്രം വാജയാമസി/ മഹേ വൃത്രായ ഹന്തവേ/
സവൃഷാ വൃഷഭോ ഭുവത്/ 1175
11. ഇന്ദ്രസ്സദാ മനേ കൃതഃ/ ഓജിഷ്ഠസ്സബലേ ഹിതഃ/
ദ്യുമ്നീ ശ്ലോകീ സ സോമ്യഃ / 1176
12. ഗിരാ വജ്രോ ന സംഭൃതഃ/ സബലോ അനപച്യുതഃ/
വവക്ഷ ഉഗ്രോ അസ്തൃതഃ/ 1177

९७

१. त्वं ह्यग्ने अग्निना। विप्रो विप्रेण सन् सता। सखा सख्या समिध्यसे।। ११६६
२. त्वं सुन्वतो यजमानाय। रयिन्धेहि सहस्रिणम्। अग्ने वीरवतीमिषम्।। ११६७
३. अग्ने भ्रातस्सहस्कृत। रोहिदश्व शुचिव्रत। इमं स्तोमञ्जुषस्व नः।। ११६८
४. अग्निं वो देवमग्निभिस्सजोषाः। यजिष्ठन्दूतमध्वरे कृणुध्वम्।
यो मर्त्येषु निध्रुविरृता वा। तपुर्मूर्धा घृतान्नःपावकः।। ११६९

५. प्रोथदश्वो न यवसेऽविष्यन्। यदामहस्संवरणाद्व्यस्थात्।
आदस्य वातो अनुवाति शोचिः। अधस्म ते व्रजनंड्कृष्णमस्ति।। ११७०
६. उद्यस्य ते नवजातस्य वृष्णः। अग्ने चरन्त्यजरा इधानाः।
अच्छा द्यामरुषो धूम एति। सन्दूतो अग्न ईयसे हि देवान्।। ११७१
७. यदद्य सूर उदिते। अनागा मित्रो अर्यमा। सुवाति सविता भगः।। ११७२
८. सुप्रावीरस्तु सक्षयः। प्रानुयामन् सुदानवः। ये नो अंहोतिपिप्रति।। ११७३
९. उत स्वराजो अदितिः। अदब्धस्यौ व्रतस्य ये। महो राजान ईशते।। ११७४
१०. तंमिन्द्रं वाजयामसि। महे वृत्राय हन्तवे। सवृषा वृषभो भुवत्।। ११७५
११. इन्द्रस्सदा मने कृतः। ओजिष्ठस्सबले हितः। द्युम्नी श्लोकी स सोम्यः।।११७६
१२. गिरा वज्रो न संभृतः। सबलो अनपच्युतः। ववक्ष उग्रो अस्तृतः।। ११७७

98

1. അധ്വര്യോ അദ്രിഭിസ്സുതം/ സോമം പവിത്ര ആനയ/
പുനാഹീന്ദ്രായ പാതവേ/ 1178
2. തവത്യ ഇന്ദോ അന്ധസാ/ ദേവാമധോർവ്യാശത/
പവമാനസ്യ മരുതഃ/ 1179
3. ദിവഃ പീയൂഷമുത്തമം/ സോമമിന്ദ്രായ വജ്രിണേ/
സുനോതാ മധുമത്തമം/ 1180
4. ധർതാ ദിവഃ പവതേ കൃത്വിയോ രസഃ/
ദക്ഷോ ദേവാനാമനുമാദ്യോ നൃഭിഃ/
ഹരിസ്സൃജാനോ അത്യോ ന സത്വഭിഃ/
വ്യഥാ പാജാംസി കൃണുഷേ നദീഷ്വാ/ 1181
5. ശൂരോ ന ധത്ത ആയുധാ ഗഭസ്ത്യോഃ/
സ്വാസ്സിഷാസൻ രഥിരോ ഗവിഷ്ടിഷു/
ഇന്ദ്രസ്യ ശുഷ്മമീരയന്നപസ്യുഭിഃ/
ഇന്ദുർഹിന്വാനോ അജ്യതേ മനീഷിഭിഃ/ 1182
6. ഇന്ദ്രസ്യ സോമപവമാന ഊർമിണാ/
തവിഷ്യമാണോ ജഠരേഷ്വാവിശ/
പ്രണഃ പിന്വ വിദ്യുദഭ്രേവ രോദസീ ധിയാ/
ന വാജം ഉപമാസി ശശ്വതഃ/ 1183
7. യദിന്ദ്ര പ്രാഗപാഗുദക്/ ന്യഗ്വാ ഹൂയസേ നൃഭിഃ/
സിമാ പുരൂന്യൃഷ്വൂതോ അസ്യാനവേ/
അസി പ്രശർധ തുർവശേ/ 1184
8. യദ്വാരുമേ രുശമേ ശ്യാവകേ കൃപേ/ ഇന്ദ്രമാദയസേ സചാ/
കണ്വാസസ്ത്വാസ്തോമേഭിർബ്രഹ്മവാഹസഃ/
ഇന്ദ്രാ യച്ഛന്ത്യാ ഗഹി/ 1185

9. ഉഭയം ശൃണവച്ചന/ ഇന്ദ്രോ അർവാഗിദം വചഃ/
സത്രാച്യാ മഘവാ സോമപീതയേ/ ധിയാ ശവിഷ്ഠ ആഗമത്/ 1186
10. തം ഹി സ്വരാജം വൃഷഭന്തമോജസാ/ ധിഷണേ നിഷ്ട തക്ഷതുഃ/
ഉതോപമാനാം പ്രഥമോ നിഷീദസി/
സോമകാമം ഹി തേ മനഃ/ 1187

९८

१. अध्वर्यो अद्रिभिस्सुतम्। सोमं पवित्र आनय। पुनाहीन्द्राय पातवे।। ११७८
२. तवत्य इन्दो अन्धसा। देवामधोर्व्याशत। पवमानस्य मरुतः।। ११७९
३. दिवःपीयूषमुत्तमम्। सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम्।। ११८०
४. धर्ता दिवःपवते कृत्वियो रसः। दक्षो देवानामनुमाद्यो नृभिः।
हरिस्सृजानो अत्यो न सत्वभिः। वृथा पाजांसि कृणुषे नदीष्वा।। ११८१
५. शूरो न धत्त आयुधा गभस्त्योः। स्वास्सिषासन्नथिरो गविष्टिषु।
इन्द्रस्य शुष्ममीरयन्नपस्युभिः। इन्दुर्हिन्वानो अज्यते मनीषिभिः।। ११८२
६. इन्द्रस्य सोमपवमान ऊर्मिणा। तविष्यमाणो जठरेष्वाविश।
प्रणःपिन्व विद्युदभ्रेव रोदसी धिया। न वाजं उपमासि शश्वतः।। ११८३
७. यदिन्द्र प्रागपागुदक्। न्यग्वा हूयसे नृभिः।
सिमा पुरूनृषूतो अस्यानवे। असि प्रशर्ध तुर्वशे।। ११८४
८. यद्वारुमे रुशमे श्यावके कृपे। इन्द्रमादयसे सचा।
कण्वासस्त्वास्तोमेभिर्ब्रह्मवाहसः। इन्द्रा यच्छन्त्या गहि।। ११८५
९. उभयं शृणवच्चनः। इन्द्रो अर्वागिदं वचः।
सत्राच्या मघवा सोमपीतये। धिया शविष्ठ आगमत्।। ११८६
१०. तं हि स्वराजं वृषभन्तमोजसा। धिषणे निष्ट तक्षतुः।
उतोपमानां प्रथमो निषीदसि। सोमकामं हि ते मनः।। ११८७

99

1. പവസ്വ ദേവ ആയുഷക്/ ഇന്ദ്രങ്ഗച്ഛതു തേ മദഃ/
വായുമാരോഹ ധർമണാ/ 1188
2. പവമാന നി തോശസേ/ രയിം സോമ ശ്രവായ്യം/
ഇന്ദോ സമുദ്രമാവിശ/ 1189
3. അപഘ്നൻ പവസേ മൃധഃ/ ക്രതുവിത്സോമമത്സരഃ/
നുദസ്വാദേവയുഞ്ജനം/ 1190

4. അഭീ നോ വാജസാതമം/ രയിമർഷ ശതസ്പൃഹം/
ഇന്ദോ സഹസ്രഭർണസം/ തുവിദ്യുമ്നം വിഭാസഹം/ 1191
5. പരിസ്യസ്വാനോ അക്ഷരത്/ ഇന്ദുരവ്യേ മദച്യുതഃ/
ധാരാ യാ ഊർധ്വോ അധ്വരേ/
ഭ്രാജാ ന യാതി ഗവ്യയുഃ/ 1192
6. വയന്തേ അസ്യ രാധസഃ/ വസോർവസോ പുരുസ്പൃഹഃ/
നിനേദിഷ്ഠതമാ ഇഷഃ/ സ്യാമ സുമ്നേ തേ അധ്രിഗോ/ 1193
7. പവസ്വ സോമ/ മഹാൻ സമുദ്രഃ/
പിതാ ദേവാനാം/ വിശ്വാഭിധാമ / 1194
8. ശുക്രഃ പവസ്വ/ ദേവേഭ്യസ്സോമ/
ദിവേ പൃഥിവ്യൈ/ ശഞ്ച പ്രജാഭ്യഃ/ 1195
9. ദിവോ ധർത്താസി/ ശുക്രഃ പീയൂഷഃ/
സത്യേ വിധർമൻ/ വാജീ പവസ്വ/ 1196
10. പ്രേഷ്ഠം വോ അതിഥിം/ സ്തുഷേ മിത്രമിവ പ്രിയം/
അഗ്നേ രഥന്ന വേദ്യം/ 1197
11. കവിമിവ പ്രശംസ്യം/ യന്തേവാസ ഇതി ദ്വിതാ/
നി മർത്യേഷ്വാദധുഃ/ 1198
12. ത്വയ്യവിഷ്ഠദാശുഷേ/ നൃങ്പാഹി ശൃണുഹീ ഗിരഃ/
രക്ഷാ തോകമുത ത്മനാ/ 1199
13. ഏന്ദ്ര നോ ഗധിപ്രിയ/ സത്രാജിദഗോഹ്യ/
ഗിരിർന വിശ്വതഃപൃഥുഃപതിർദിവഃ/ 1200
14. അഭി ഹി സത്യസോമപാഃ/ ഉഭേ ബഭൂഥ രോദസീ/
ഇന്ദ്രാസി സുന്വതോ വൃധഃപതിർദിവഃ/ 1201
15. ത്വം ഹി ശശ്വതീനാം/ ഇന്ദ്ര ധർതാ പുരാമസി/
ഹന്താ ദസ്യോർമനോർവൃധഃപതിർദിവഃ/ 1202
16. പുരാം ഭിന്ദുർയുവാ കവിഃ/ അമിതൗജാ അജായത/
ഇന്ദ്രോ വിശ്വസ്യ കർമണഃ/ ധർതാ വജ്രീ പുരുഷ്ടുതഃ/ 1203
17. ത്വം വലസ്യ ഗോമതഃ/ അപാവരദ്രിവോ ബിലം/
ത്വാന്ദേവാ അബിഭ്യുഷഃ/ തുജ്യമാനാസ ആവിഷുഃ/ 1204
18. തവാഹം ശൂരരാതിഭിഃ/ പ്രത്യായം സിന്ധുമാവദൻ/
ഉപാതിഷ്ഠന്ത ഗിർവണഃ/ വിദുഷ്ടേ തസ്യ കാരവഃ/ 1205

९९

१. पवस्व देव आयुषक्। इन्द्रङ्गच्छतु ते मदः।। वायुमारोह धर्मणा।। ११८८
२. पवमान नि तोशसे। रयिं सोमश्रवाय्यम्।। इन्दो समुद्रमाविश।। ११८९
३. अपघ्नन् पवसे मृधः। क्रतुवित्सोममत्सरः।। नुदस्वादेवयुञ्जनम्।। ११९०

४. अभी नो वाजसातमम्। रयिमर्ष शतस्पृहम्।
इन्दो सहस्त्रभर्णसम्। तुविद्युम्नं विभासहम्।। ११९१
५. परिस्यस्वानो अक्षरत्। इन्दुरव्ये मदच्युतः।
धारा या ऊर्ध्वो अध्वरे। भ्राजा न याति गव्ययुः।। ११९२
६. वयन्ते अस्य राधसः। वसोर्वसो पुरुस्पृहः।
निनेदिष्ठतमा इषः। स्याम सुम्ने ते अद्रिगो।। ११९३
७. पवस्व सोम। महान् समुद्रः। पिता देवानाम्। विश्वाभि धाम।। ११९४
८. शुक्रः पवस्व। देवेभ्यस्सोम। दिवे पृथिव्यै। शञ्च प्रजाभ्यः।। ११९५
९. दिवो धर्तासि। शुक्रःपीयूषः। सत्ये विधर्मन्। वाजी पवस्व।। ११९६
१०. प्रेष्ठं वो अतिथिम् । स्तुषे मित्रमिव प्रियम्। अग्ने रथन्न वेद्यम्।। ११९७
११. कविमिव प्रशंस्यम्। यन्देवासः इति द्विता। नि मर्त्येष्वादधुः।। ११९८
१२. त्वय्यविष्ठदाशुषे। नृङ्पाहि शृणुही गिरः। रक्षा तोकमुत त्मना।। ११९९
१३. एन्द्र नो गधिप्रिय। सत्राजिदगोह्य। गिरिर्न विश्वतःपृथुःपतिर्दिवः।। १२००
१४. अभि हि सत्यसोमपाः। उभे बभूथ रोदसी।
इन्द्रासि सुन्वतो वृधःपतिर्दिवः।। १२०१
१५. त्वं हि शश्वतीनाम्। इन्द्र धर्ता पुरामसि। हन्ता दस्योर्मनोर्वृधःपतिर्दिवः।। १२०२
१६. पुरां भिन्दुर्युवा कविः। अमितौजा अजायत।
इन्द्रो विश्वस्य कर्मणः। धर्ता वज्री पुरुष्टुतः।। १२०३
१७. त्वं वलस्य गोमतः। अपावरद्रिवो बिलम्।
त्वान्देवा अबिभ्युषः। तुज्यमानास आविषुः।। १२०४
१८. तवाहं शूररातिभिः। प्रत्यायं सिन्धुमावदन्।
उपातिष्ठन्त गिर्वणः। विदुष्टे तस्य कारवः।। १२०५

1. അക്രാൻ സമുദ്രഃ പ്രഥമേ വിധർമൻ/
ജനയൻ പ്രജാ ഭുവനസ്യ ഗോപാഃ/
വൃഷാ പവിത്രേ അധി സാനോ അവ്യേ/
ബൃഹത്സോമോ വാവൃധേ സ്വാനോ അദ്രിഃ/ 1206
2. മഹത്തത്സോമോ മഹിഷശ്ചകാര/
അപാഗ്ദ്വർഭോവൃണീത ദേവാൻ/
അദധാദിന്ദ്രേ പവമാന ഓജഃ/
അജനയത്സൂര്യേ ജ്യോതിരിന്ദുഃ/ 1207

3. മത്സിവായുമിഷ്ടയേ രാധസേ ച/
മത്സിമിത്രാവരുണാ പൂയമാനഃ/
മത്സി ശർധോ മാരുതം മത്സി ദേവാൻ/
മത്സി ദ്യാവാപൃഥിവീ ദേവ സോമ/ 1208
4. ഏഷ ദേവോ അമർത്യഃ/ പർണവീരിവ ദീയതേ/
അഭിദ്രോണാന്യാസദം/ 1209
5. ഏഷ ദേവോ വിപാകൃതഃ/ അതി ഹ്വരാംസി ധാവതി/
പവമാനോ അദാഭ്യഃ/ 1210
6. ഏഷ ദേവോ വിപന്യുഭിഃ/ പവമാന ഋതായുഭിഃ/
ഹരിർവാജായ മൃജ്യതേ/ 1211
7. ഏഷ വിശ്വാനി വാര്യാ/ ശൂരോ യന്നിവ സത്വഭിഃ/
പവമാനസ്സിഷാസതി/ 1212
8. ഏഷ ദേവോ രഥര്യതി/ പവമാനോ ദശസ്യതി/
ആവിഷ്കൃണോതി വഗ്വനും/ 1213
9. ഏഷ വിപ്രൈരഭിഷ്ടുതഃ/ അപോ ദേവോ വിഗാഹതേ/
ദധദ്രത്നാനി ദാശുഷേ/ 1214
10. ഏഷ ദിവം വിധാവതി/ തിരോ രജാംസി ധാരയാ/
പവമാനഃ കനിക്രദത്/ 1215
11. ഏഷ ദിവം വ്യാസരത്/ തിരോ രജാംസ്യസ്തൃതഃ/
പവമാനസ്സധ്വരഃ/ 1216
12. ഏഷ പ്രത്നേ ന ജന്മനാ/ ദേവോ ദേവേഭ്യസ്സുതഃ/
ഹരിഃപവിത്രേ അർഷതി/ 1217
13. ഏഷ ഉ സ്യ പുരുവ്രതഃ/ ജജ്ഞാനോ ജനയന്നിഷഃ/
ധാരയാ പവതേ സുതഃ/ 1218
14. ഏഷ ധിയാ യാത്യനിയാ/ ശൂരോ രഥേഭിരാശുഭിഃ/
ഗച്ഛന്നിന്ദ്രസ്യ നിഷ്കൃതം/ 1219
15. ഏഷ പുരു ധിയായതി/ ബൃഹതേ ദേവതാതയേ/
യത്രാമൃതാസ ആശത/ 1220
16. ഏഷ ഹിതോ വിനീയതേ/ അന്തശ്ചുന്ധ്യാവതാ പഥാ/
യദീ തുഞ്ജന്തി ഭൂർണയഃ/ 1221
17. ഏഷ രുക്മിഭിരീയതേ/ വാജീ ശുഭ്രേിരംശുഭിഃ/
പതിസ്സിന്ധൂനാം ഭവൻ/ 1222
18. ഏഷ ശൃങ്ഗാണി ദോധുവത്/ ശിശീതേ യൂഥ്യോ വൃഷാ/
നൃമ്ണാ ദധാന ഓജസാ/ 1223
19. ഏഷ വസൂനി പിബ്ദനാ/ പരുഷാ യയിവം അതി/
അവ ശാദേഷു ഗച്ഛതി/ 1224
20. ഏതം മൃജന്തി മർജ്യം/ ഉപദ്രോണേഷ്വായവഃ/
പ്രചക്രാണം മഹീരിഷഃ/ 1225

21. ഏതമുത്യന്ദശക്ഷിപഃ/ ഹരിം ഹിന്വന്തി യാതവേ/
സ്വായുധം മദിന്തമം/ 1226
22. ഏഷ കവിരഭിഷ്ടുതഃ/ പവിത്രേ അധി തോശതേ/
പുനാനോ ഘ്ന്നന്നപദ്വിഷഃ/ 1227
23. ഏഷ ഇന്ദ്രായ വായവേ/ സ്വർജിത്പരിഷിച്യതേ/
പവിത്രേ ദക്ഷസാധനഃ/ 1228
24. ഏഷ നൃഭിർവിനീയതേ/ ദിവോ മൂർധാ വൃഷാ സുതഃ/
സോമോ വനേഷു വിശ്വവിത്/ 1229
25. ഏഷ ഗവ്യുരചിക്രദത്/ പവമാനോ ഹിരണ്യയുഃ/
ഇന്ദുസ്സത്രാജിദസ്തൃതഃ/ 1230
26. ഏഷ ശുഷ്മ്യദാഭ്യഃ/ സോമോ വാജമിവാസരത്/
ദേവാവീരഘ്നശംസഹാ/ 1231
27. ഏഷ ശുഷ്മ്യസിഷ്യദത്/ അന്തരിക്ഷേ വൃഷാ ഹരിഃ/
പുനാന ഇന്ദുരിന്ദ്രമാ/ 1232
28. ഏഷ വാജീ ഹിതോ നൃഭിഃ/ വിശ്വവിന്മനസസ്പതിഃ/
അവ്യം വാരം വിധാവതി/ 1233
29. ഏഷ പവിത്രേ അക്ഷരത്/ സോമോ ദേവേഭ്യസ്സുതഃ/
വിശ്വാവസൂന്യാവിശൻ/ 1234
30. ഏഷ ദേവശ്ശുഭായതേ/ അധി യോനാവമർത്യഃ/
വൃത്രഹാ ദേവവീതമഃ/ 1235
31. ഏഷ വൃഷാ കനിക്രദത്/ദശഭിർജാമിഭിര്യതഃ/
അഭി ദ്രോണാനി ധാവതി/ 1236
32. ഏഷ സൂര്യേണ ഹാസതേ/ പവമാനോ അധിദ്യവി/
പവിത്രേ മത്സരോ മദഃ/ 1237
33. ഏഷ സൂര്യമരോചയത്/ പവമാനോ വിചർഷണിഃ/
വിശ്വാ വസൂനി വിശ്വവിത്/ 1238
34. ഏഷ ഉ സ്യ വൃഷാ രഥഃ/ അവ്യാവാരേഭിരർഷതി/
ഗച്ഛൻവാജം സഹസ്രിണം/ 1239
35. ഏതന്ത്രിതസ്യ യോഷണഃ/ ഹരിം ഹിന്വന്ത്യദ്രിഭിഃ/
ഇന്ദുമിന്ദ്രായ പീതയേ/ 1240
36. ഏതന്ത്യം ഹരിതോ ദശ/ മർമൃജ്യന്തേ അപസ്യുവഃ/
യാഭിർമദായ ശുംഭതേ/ 1241
37. ഏഷസ്യ മാനുഷീഷ്വാ/ ശ്യേനോ ന വിക്ഷു സീദതി/
ഗച്ഛഞ്ജാരോ ന യോഷിതം/ 1242
38. ഏഷസ്യ പീതയേ സുതഃ/ ഹരിരർഷതി ധർണസിഃ/
ക്രന്ദന്യോനിമഭിപ്രിയം/ 1243
39. ഏഷസ്യ മദ്യോ രസഃ/ അവചഷ്ടേ ദിവശ്ശിശുഃ/
യ ഇന്ദുർവാരമാവിശത്/ 1244

40. സസൃതഃപീതയേ വൃഷാ/ സോമഃപവിത്രേ അർഷതി/
വിഘ്നൻ രക്ഷാംസി ദേവയുഃ/ 1245
41. സ പവിത്രേ വിചക്ഷണഃ/ ഹരിരർഷതി ധർണസിഃ/
അഭി യോനിങ്കനിക്രദത്/ 1246
42. സ വാജീ രോചനന്ദിവഃ/ പവമാനോ വിധാവതി/
രക്ഷോഹാ വാരമവ്യയം/ 1247
43. സ ത്രിതസ്യാധി സാനവി/ പവമാനോ അരോചയത്/
ജാമിഭിസ്സൂര്യം സഹ/ 1248
44. സ വൃത്രഹാ വൃഷാസുതഃ/ വരിവോവിദദാഭ്യഃ/
സോമോ വാജമിവാസരത്/ 1249
45. സ ദേവഃ കവിനേഷിതഃ/ അഭി ദ്രോണാനി ധാവതി/
ഇന്ദുമിന്ദ്രായ മംഹയൻ/ 1250
46. പവമാനസ്യ തേ കവേ/ വാജിൻ സർഗാ അസൃക്ഷത/
അർവന്തോ ന ശ്രവസ്യവഃ/ 1251
47. അച്ഛാ കോശം മധുശ്ചുതം/ അസ്യഗ്രം വാരേ അവ്യയേ/
അവാവശന്ത ധീതയഃ/ 1252
48. അച്ഛാ സമുദ്രമിന്ദവഃ/ അസ്തങ്ഗാവോ ന ധേനവഃ/
അഗ്മന്നൃതസ്യ യോനിമാ/ 1253

१००

१. अक्रान् समुद्रःप्रथमे विधर्मन्। जनयन् प्रजा भुवनस्य गोपाः।
वृषा पवित्रे अधि सानो अव्ये। बृहत् सोमो वावृधे स्वानो अद्रिः।। १२०६
२. महत्तत् सोमो महिषश्चकार। अपाय्यत्गर्भोवृणीत देवान्।
अदधादिन्द्रे पवमान ओजः। अजनयत् सूर्ये ज्योतिरिन्दुः।। १२०७
३. मत्सिवायुमिष्टये राधसे च। मत्सिमित्रावरुणा पूयमानः।
मत्सि शर्धो मारुतं मत्सि देवान्। मत्सि द्यावा पृथिवी देव सोम।। १२०८
४. एष देवो अमर्त्यः। पर्णवीरिव दीयते। अभिद्रोणान्यासदम्। १२०९
५. एष देवो विपाकृतः। अति ह्वरांसि धावति। पवमानो अदाभ्यः।। १२१०
६. एष देवो विपन्युभिः। पवमान ऋतायुभिः। हरिर्वाजाय मृज्यते।। १२११
७. एष विश्वानि वार्या। शूरो यन्निव सत्वभिः। पवमानस्सिषासति।। १२१२
८. एष देवो रथर्यति। पवमानो दशस्यति। आविष्कृणोति वग्वनुम्।। १२१३
९. एष विप्रैरभिष्टुतः। अपो देवो विगाहते। दधद्रत्नानि दाशुषे।। १२१४
१०. एष दिवं विधावति। तिरो रजांसि धारया। पवमानः कनिक्रदत्।। १२१५
११. एष दिवं व्यासरत्। तिरो रजांस्यस्तृतः। पवमानस्वध्वरः।। १२१६

१२.एष प्रत्ने न जन्मना। देवो देवेभ्यस्सुतः। हरिःपवित्रे अर्षति।। १२१७
१३.एष उ स्य पुरुव्रतः। जज्ञानो जनयन्निषः। धारया पवते सुतः।। १२१८
१४.एष धिया यात्यन्विया। शूरो रथेभिराशुभिः। गच्छन्निन्द्रस्य निष्कृतम्।। १२१९
१५.एष पुरु धियायति। बृहते देवतातये। यत्रामृतास आशत।। १२२०
१६.एष हितो विनीयते। अन्तश्शुन्ध्यावता पथा। यदी तुञ्जन्ति भूर्णयः।। १२२१
१७.एष रुक्मिभिरीयते। वाजी शुभ्रेभिरंशुभिः। पतिस्सिन्धूनां भवन्।। १२२२
१८.एष श्रृङ्गाणि दोधुवत्। शिशीते यूथ्यो वृषा। नृम्णा दधान ओजसा।। १२२३
१९.एष वसूनि पिब्दना। परुषा ययिवम् अति। अव शादेषु गच्छति।। १२२४
२०.एतं मृजन्ति मर्ज्यम्। उपद्रोणेष्वायवः। प्रचक्राणं महीरिषः।। १२२५
२१.एतमुत्यन्दशक्षिपः। हरिं हिन्वन्ति यातवे। स्वायुधं मदिन्तमम्।। १२२६
२२.एष कविरभिष्टुतः। पवित्रे अधि तोशते। पुनानो घ्नन्नपद्विषः।। १२२७
२३.एष इन्द्राय वायवे। स्वर्जित्परिषिच्यते। पवित्रे दक्षसाधनः।। १२२८
२४.एष नृभिर्विनीयते। दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित्।। १२२९
२५.एष गव्युरचिक्रदत्। पवमानो हिरण्ययुः। इन्दुस्सत्राजिदस्तृतः।। १२३०
२६.एष शुष्म्यदाभ्यः। सोमो वाजमिवासरत्। देवावीरघशंसहा।। १२३१
२७.एष शुष्म्यसिष्यदत्। अन्तरिक्षे वृषा हरिः। पुनान इन्दुरिन्द्रमा।। १२३२
२८.एष वाजी हितो नृभिः। विश्वविन्मनसस्पतिः। अव्यं वारं विधावति।। १२३३
२९.एष पवित्रे अक्षरत्। सोमो देवेभ्यस्सुतः। विश्वावसून्याविशन्।। १२३४
३०.एष देवश्शुभायते। अधि योनावमर्त्यः। वृत्रहा देववीतमः।। १२३५
३१.एष वृषा कनिक्रदत्। दशभिर्जामिभिर्यतः। अभि द्रोणानि धावति।। १२३६
३२.एष सूर्येण हासते। पवमानो अधिद्यवि। पवित्रे मत्सरो मदः।। १२३७
३३.एष सूर्यमरोचयत्। पवमानो विचर्षणिः। विश्वा वसूनि विश्ववित्।। १२३८
३४.एष उ स्य वृषा रथः। अव्यावारेभिरर्षति। गच्छन्वाजं सहस्रिणम्।। १२३९
३५.एतन्त्रितस्य योषणः। हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये।। १२४०
३६.एतन्त्यं हरितो दश। मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुंभते।। १२४१
३७.एषस्य मानुषीष्वा। श्येनो न विक्षु सीदति। गच्छञ्जारो न योषितम्।। १२४२
३८.एषस्य पीतये सुतः। हरिरर्षति धर्णसिः। क्रन्दन्योनिमभिप्रियम्।। १२४३
३९.एषस्य मद्यो रसः। अवचष्टे दिवश्शिशुः। य इन्दुर्वारमाविशत्।। १२४४
४०.ससुतःपीतये वृषा। सोमःपवित्र अर्षति। विघ्नन्रक्षांसि देवयुः।। १२४५
४१.सपवित्रे विचक्षणः। हरिरर्षति धर्णसिः। अभि योनिङ्कनिक्रदत्।। १२४६

४२.सवाजी रोचनन्दिवः। पवमानो विधावति। रक्षोहा वारमव्ययम्।। १२४७
४३.स त्रितस्याधि सानवि। पवमानो अरोचयत्। जामिभिरस्सूर्य सह।। १२४८
४४.स वृत्रहा वृषासुतः। वरिवोविददाभ्यः। सोमो वाजमिवासरत्।। १२४९
४५.स देवः कविनेषितः। अभि द्रोणानि धावति। इन्दुमिन्द्राय मंहयन्।। १२५०
४६.पवमानस्य ते कवे। वाजिन् सर्गा असृक्षत। अर्वन्तो न श्रवस्यवः।। १२५१
४७.अच्छा कोशं मधुश्चुतम्। असृग्रं वारे अव्यये। अवावशन्त धीतयः।। १२५२
४८.अच्छा समुद्रमिन्दवः। अस्तङ्गावो न धेनवः। अग्मन्नृतस्य योनिमा।। १२५३

101

1. ഉപ ത്വാ രണ്യ സന്ദൃശം/ പ്രയസ്വന്തസ്സഹസ്കൃത/
അഗ്നേ സസൃഗ്മഹേ ഗിരഃ/ 1254
2. ഉപച്ഛായാമിവ ഘൃണേഃ/ അഗന്മ ശർമ തേ വയം/
അഗ്നേ ഹിരണ്യസന്ദൃശഃ/ 1255
3. യ ഉഗ്ര ഇവ ശര്യഹാ/ തിഗ്മ ശൃങ്ഗോ ന വംസഗഃ/
അഗ്നേ പുരോ രുരോജിഥ/ 1256
4. അഗന്മ മഹാ നമസാ യവിഷ്ഠം/
യോമീദായ സമിദ്ധസ്യേ ദുരോണേ/
ചിത്രഭാനും രോദസീ അന്തരുർവീ/
സ്വാഹുതം വിശ്വതഃപ്രത്യഞ്ചം/ 1257
5. സമഹ്നാ വിശ്വാദുരിതാനി സാഹ്വാൻ/
അഗ്നിഷ്ടവേ ദമ ആ ജാതവേദാഃ/
സ നോ രക്ഷിഷദ്ദുരിതാദവദ്യാത്/
അസ്മാൻ ഗൃണത ഉത നോ മഘോനഃ/ 1258
6. ത്വം വരുണ ഉത മിത്രോ അഗ്നേ/
ത്വാം വർധന്തി മതിഭിർവസിഷ്ഠാഃ/
ത്വേ വസു സുഷണനാനി സന്തു/
യൂയം പാതസ്വസ്തിഭിസ്സദാനഃ/ 1259
7. പ്ര മിത്രയോർവരുണയോഃ/ സ്തോമോ ന ഏതു ശൂഷ്യഃ/
നമസ്വാന്തുവിജാതയോഃ/ 1260
8. യാധാരയന്ത ദേവാഃ/ സുദക്ഷാ ദക്ഷപിതരാ/
അസുര്യായ പ്ര മഹസാ/ 1261
9. താ നസ്തിപാ തനൂപാ/ വരുണഞ്ജരിത്രണാം/
മിത്ര സാധയതന്ധിയഃ/ 1262
10. മഹം ഇന്ദ്രോ യ ഓജസാ/ പർജന്യോ വൃഷ്ടിമം ഇവ/
സ്തോമൈർവത്സസ്യ വാവൃധേ/ 1263

11. കണ്വാ ഇന്ദ്രയ്യദക്രത/ സ്തോമൈർയജ്ഞസ്യ സാധനം/
ജാമി ബ്രുവത ആയുധാ/ 1264
12. പ്രജാ മൃതസ്യ പിപ്രതഃ/ പ്ര യദ്ഭരന്ത വഹ്നയഃ/
വിപ്രാ ഋതസ്യ വാഹസാ/ 1265

१०१

१. उप त्वा रण्व सन्दृशम्। प्रयस्वन्तस्सहस्कृत। अग्ने ससृग्महे गिरः।। १२५४
२. उपच्छायामिव घृणेः। अगन्म शर्म ते वयम्। अग्ने हिरण्यसन्दृशः।। १२५५
३. य उग्र इव शर्यहा। तिग्म शृङ्गो न वंसगः। अग्ने पुरो रुरोजिथ।। १२५६
४. अगन्म महा नमसा यविष्ठम्। योमीदाय समिद्धस्वे दुरोणे।
चित्रभानुं रोदसी अन्तरुर्वी। स्वाहुतं विश्वतःप्रत्यञ्चम्।। १२५७
५. समह्ना विश्वादुरितानि साह्वान्। अग्निष्टवे दम आ जातवेदाः।
स नो रक्षिषद्दुरितादवद्यात्। अस्मान् गृणत उत नो मघोनः।। १२५८
६. त्वं वरुण उत मित्रो अग्ने। त्वां वर्धन्ति मतिभिर्वसिष्ठाः।
त्वे वसु सुषणनानि सन्तु। यूयं पातस्वस्तिभिस्सदानः।। १२५९
७. प्र मित्रयोर्वरुणयोः। स्तोमो न एतु शूष्यः। नमस्वान् तुविजातयोः।। १२६०
८. या धारयन्त देवाः। सुदक्षा दक्षपितरा। असुर्याय प्र महसा।। १२६१
९. ता नस्तिपा तनूपा। वरुणञ्जरितॄणाम्। मित्र साधयतन्धियः।। १२६२
१०. महम् इन्द्रो य ओजसा। पर्जन्यो वृष्टिमम् इव। स्तोमैर्वत्सस्य वावृधे।। १२६३
११. कण्वा इन्द्रय्यदक्रत। स्तोमैर्यज्ञस्य साधनम्। जामि ब्रुवत आयुधा।। १२६४
१२. प्रजा मृतस्य पिप्रतः। प्र यत्भरन्त वह्नयः। विप्रा ऋतस्य वाहसा।। १२६५

102

1. പവമാനസ്യ ജിഘ്നതഃ/ ഹരേശ്ചന്ദ്രാ അസൃക്ഷത/
ജീരാ അജിരശോചിഷഃ/ 1266
2. പവമാനോ രഥീതമഃ/ ശുഭ്രേഭിശ്ശുഭ്രശസ്തമഃ/
ഹരിശ്ചന്ദ്രോ മരുദ്ഗണഃ/ 1267
3. പവമാനവ്യശ്നുഹി/ രശ്മിഭിർവാജസാതമഃ/
ദധത് സ്തോത്രേ സുവീര്യം/ 1268
4. പരിതോഷിഞ്ച താ സുതം/
സോമോ യ ഉത്തമം ഹവിഃ/
ദധന്വാ യോ നരിയോ അപ്സ്വാന്തരാ/
സുഷാവ സോമമദ്രിഭിഃ/ 1269

5. നൂനം പുനാനോവിഭിഃപരിസ്രവ/അദബ്ധസ്സുരഭിന്തരഃ/
സുതേ ചിത്വാപ്സു മദാമോ അന്ധസാ/
ശ്രീണന്തോ ഗോഭിരുത്തരം/ 1270
6. പരിസ്വാനശ്ചക്ഷസേ ദേവമാദനഃ/
ക്രതുരിന്ദുർവിചക്ഷണഃ/ 1271
7. അസാവി സോമോ അരുഷോ വൃഷാ ഹരിഃ/
രാജേവദസ്മോ അഭിഗാ അചിക്രദത്/
പുനാനോ വാരമത്യേഷ്യവ്യയം/
ശ്യേനോ ന യോനിങ്ഘൃതവന്തമാസദത്/ 1272
8. പർജന്യഃപിതാ മഹിഷസ്യ പർണിനഃ/
നാഭാ പൃഥിവ്യാ ഗിരിഷു ക്ഷയന്ദധേ/
സ്വസാര ആപോ അഭിഗാ ഉദാസരൻ/
സങ്ഗ്രാവഭിർവസതേ വീതേ അധ്വരേ/ 1273
9. കവിർവേധസ്യാ പരേ്യഷി മാഹിനം/
അത്യോനനിക്തോ അഭിവാജമർഷസി/
അപസേധന്ദുരിതാ സോമ നോ മൃഡ/
ഘൃതാവസാനഃ പരിയാസി നിർണിജം/ 1274
10. ശ്രായന്ത ഇവ സൂര്യം/ വിശ്വേദിന്ദ്രസ്യ ഭക്ഷത/
വസൂനിജാതോ ജനിമാന്യോജസാ/ പ്രതിഭാഗന്ന ദീധിമഃ/ 1275
11. അലർഷി രാതിം വസുദാമുപസ്തുഹി/
ഭദ്രാ ഇന്ദ്രസ്യ രാതയഃ/
യോ അസ്യ കാമം വിധതോ ന രോഷതി/
മനോ ദാനായ ചോദയൻ/ 1276
12. യത ഇന്ദ്ര ഭയാമഹേ/ തതോ നോ അഭയങ്കൃധി/
മഘവഞ്ഛഗ്ധി തവ തന്ന ഊതയേ/
വിദ്വിഷോ വിമൃധോ ജഹി/ 1277
13. ത്വം ഹി രാധസസ്പതേ രാധസേ മഹഃ/ക്ഷയസ്യാസി വിധർതാ/
തന്ത്വാ വയം മഘവന്നിന്ദ്ര ഗിർവണഃ/
സുതാവന്തോ ഹവാമഹേ/ 1278

൧൦൨

൧. पवमानस्य जिघ्नतः। हरेश्चन्द्रा असृक्षत। जीरा अजिरशोचिषः।। ൧൨൬൬
൨. पवमानो रथीतमः। शुभ्रेभिश्शुभ्रशस्तमः। हरिश्चन्द्रो मरुत्गणः।। ൧൨൬൭
൩. पवमानव्यश्नुहि। रश्मिभिर्वाजसातमः। दधत् स्तोत्रे सुवीर्यम्।। ൧൨൬൮
൪. परितोषिञ्च ता सुतम्। सोमो य उत्तमं हविः।
दधन्वा यो नरियो अप्स्वान्तरा। सुषाव सोममद्रिभिः।। ൧൨൬൯

५. नूनं पुनानोविभिःपरिस्रव। अब्धरसुरभिन्तरः।
सुते चित्वाप्सु मदामो अन्धसा। श्रीणन्तो गोभिरुत्तरम्।। १२७०
६. परिस्वानश्चक्षसे देवमादनः। क्रतुरिन्दुर्विचक्षणः।। १२७१
७. असावि सोमो अरुषो वृषा हरिः। राजेवदस्मो अभिगा अचिक्रदत्।
पुनानो वारमत्येष्यव्ययम्। श्येनो न योनिङ्घृतवन्तमासदत्।। १२७२
८. पर्जन्यःपिता महिषस्य पर्णिनः। नाभा पृथिव्या गिरिषु क्षयन्दधे।
स्वसार आपो अभिगा उदासरन्। सङ्ग्रावभिर्वसते वीते अध्वरे।। १२७३
९. कविर्वेधस्या पर्येषि माहिनम्। अत्योननिक्तो अभिवाजमर्षसि।
अपसेधन्दुरिता सोम नो मृड। घृतावसानःपरियासि निर्णिजम्।। १२७४
१०. श्रायन्त इव सूर्यम्। विश्वेदिन्द्रस्य भक्षत।
वसूनि जातो जनिमान्योजसा। प्रतिभागन्नदीधिमः।। १२७५
११. अलर्षि रातिं वसुदामुपस्तुहि। भद्रा इन्द्रस्य रातयः।
यो अस्य कामं विधतो न रोषति। मनो दानाय चोदयन्।। १२७६
१२. यत इन्द्र भयामहे। ततो नो अभयङ्कृधि।
मघवञ्छग्धि तव तन्न ऊतये। विद्विषो विमृधो जहि।। १२७७
१३. त्वं हि राधसस्पते राधसे महः। क्षयस्यासि विधर्ता।
तन्त्वा वयं मघवन्निन्द्र गिर्वणः। सुतावन्तो हवामहे।। १२७८

103

1. ത്വം സോമാസി ധാരയുഃ/ മന്ദ്ര ഓജിഷ്ഠോ അധ്വരേ/
പവസ്വ മംഹയദ്രയിഃ/ 1279
2. ത്വം സുതോ മദിന്തമഃ/ ദധന്വാൻ മത്സരിന്തമഃ/
ഇന്ദുസ്സത്രാജിദസ്തൃതഃ/ 1280
3. ത്വം സുഷ്വാണോ അദ്രിഭിഃ/ അഭ്യർഷ കനിക്രദത്/
ദ്യുമന്തം ശുഷ്മമുത്തമം/ 1281
4. പവസ്വ ദേവവീതയേ/ ഇന്ദോ ധാരാഭിരോജസാ/
ആ കലശം മധുമാൻ സോമ നസ്സദഃ/ 1282
5. തവ ദ്രപ്സാ ഉദ പ്രുതഃ/ ഇന്ദ്രം മദായ വാവൃധുഃ/
ത്വാന്ദേവാസോ അമൃതായ കം പപുഃ/ 1283
6. ആനസ്സുതാസ ഇന്ദവഃ/ പുനാനാ ധാവതാ രയിം/
വൃഷ്ടിദ്യാവോ രീത്യാപസ്വർവിദഃ/ 1284
7. പരിത്യം ഹര്യതം ഹരിം/ ബഭ്രും പുനന്തി വാരേണ/
യോ ദേവാൻ വിശ്വാ ഇത്പരി/ മദേന സഹ ഗച്ഛതി / 1285

8. ദ്വിര്യം പഞ്ചസ്വയശസം/ സ്വസാരോ അദ്രി സംഹതം/
പ്രിയമിന്ദ്രസ്യ കാമ്യം/ പ്രസ്നാപയന്ത ഊർമയഃ/ 1286
9. ഇന്ദ്രായ സോമപാതവേ/ വൃത്രഘ്നേ പരിഷിച്യസേ/
നരേ ച ദക്ഷിണാവതേ/ വീരായ സദനാസദേ/ 1287
10. പവസ്വ സോമ/ മഹേ ദക്ഷായ/
അശ്വോ ന നിക്തഃ/ വാജീ ധനായ/ 1288
11. ശിശുഞ്ജജ്ഞാനം/ ഹരിം മൃജന്തി/
പവിത്രേ സോമം/ ദേവേഭ്യ ഇന്ദും/ 1289
12. പ്ര തേ സോതാരഃ/ രസം മദായ/
പുനന്തി സോമം/ മഹേ ദ്യുമ്നായ/ 1290
13. ഉപോഷു ജാതമപ്തുരം/ ഗോഭിർഭങ്ഗം പരിഷ്കൃതം/
ഇന്ദുന്ദേവാ അയാസിഷുഃ/ 1291
14. അർഷാ നസ്സോമ ശങ്ഗവേ/ ധുക്ഷസ്വ പിപ്യുഷീമിഷം/
വർധാ സമുദ്രമുക്ഥ്യം/ 1292
15. തമിദ്വർധന്തു നോ ഗിരഃ/ വത്സം സംശിശ്വരീരിവ/
യ ഇന്ദ്രസ്യ ഹൃദംസനിഃ/ 1293
16. ഭദ്രോ നോ അഗ്നിരാഹുതഃ/
ഭദ്രാരാതിസ്സുഭഗഭദ്രോ അധ്വരഃ/
ഭദ്രാ ഉത പ്രശസ്തയഃ/ 1294
17. ഭദ്രം മനഃ കൃണുഷ്വ വൃത്രതൂര്യേ/
യേനാസമത്സു സാസഹിഃ/
അവസ്ഥിരാ തനു ഹി ഭൂരിശർധതാം/
വനേ മാതേ അഭിഷ്ടയേ/ 1295
18. യ ഏക ഇദ്വിദയതേ/ വസുമർതായ ദാശുഷേ/
ഈശാനോ അപ്രതിഷ്കുത ഇന്ദ്രോ അങ്ഗ/ 1296
19. യശ്ചിദ്ധിത്വാ ബഹുഭ്യ ആ/ സുതാവം ആ വിവാസതി/
ഉഗ്രന്തത്പത്യതേ ശവ ഇന്ദ്രോ അങ്ഗ/ 1297
20. കദാ മർതമരാധസം/ പദാക്ഷുംപമിവ സ്ഫുരത്/
കദാനശ്ചുശ്രവദ്ഗിര ഇന്ദ്രോ അങ്ഗ/ 1298
21. ഗായന്തി ത്വാ ഗായത്രിണഃ/ അർചന്ത്യർകമർകിണഃ/
ബ്രഹ്മാണസ്ത്വാ ശതക്രതോ/
ഉദ്വംശമിവ യേമിരേ/ 1299
22. യത്സാനോസ്സാനുമാരുഹത്/ ഭൂര്യസ്പഷ്ട കർത്വം/
തദിന്ദ്രോ അർഥഞ്ചെതതി/ യൂഥേന വൃഷ്ണിരേജതി/ 1300
23. യുങ്ക്ഷ്വാ ഹി കേശിനാ ഹരീ/ വൃഷണാ കക്ഷ്യപ്രാ/
അഥാന ഇന്ദ്ര സോമപാഃ/ ഗിരാമുപശ്രുതിഞ്ചര/ 1300

१०३

१. त्वं सोमासि धारयुः। मन्द्र ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः।। १२७९
२. त्वं सुतो मदिन्तमः। दधन्वान् मत्सरिन्तमः। इन्दुस्सत्राजिदस्तृतः।। १२८०
३. त्वं सुष्वाणो अद्रिभिः। अभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम्।। १२८१
४. पवस्व देववीतये। इन्दो धाराभिरोजसा।
आ कलशं मधुमान् सोम नस्सदः।। १२८२
५. तव द्रप्सा उद प्रुतः। इन्द्रं मदाय वावृधुः।
त्वान्देवासो अमृताय कंपपुः।। १२८३
६. आनस्सुतास इन्दवः। पुनाना धावता रयिम्।
वृष्टिद्यावो रीत्याप स्वर्विदः।। १२८४
७. परित्यं हर्यतं हरिम्। बभ्रुं पुनन्ति वारेण।
यो देवान्विश्वम् इत्परि। मदेन सह गच्छति।। १२८५
८. द्विर्य पञ्चस्वयशसम्। स्वसारो अद्रि संहतम्।
प्रियमिन्द्रस्य काम्यम्। प्रस्नापयन्त ऊर्मयः।। १२८६
९. इन्द्राय सोमपातवे। वृत्रघ्ने परिषिच्यसे।
नरे च दक्षिणावते। वीराय सदनासदे।। १२८७
१०. पवस्व सोम। महे दक्षाय। अश्वो न निक्तः। वाजी धनाय।। १२८८
११. शिशुञ्जज्ञानम्। हरिं मृजन्ति। पवित्रे सोमम्। देवेभ्य इन्दुम्।। १२८९
१२. प्र ते सोतारः। रसं मदाय। पुनन्ति सोमम्। महे द्युम्नाय।। १२९०
१३. उपोषु जातमप्तुरम्। गोभिर्भङ्गं परिष्कृतम्। इन्दुन्देवा अयासिषुः।। १२९१
१४. अर्षा नस्सोम शङ्गवे। धुक्षस्व पिप्युषीमिषम्। वर्धा समुद्रमुक्थ्यम्।। १२९२
१५. तमिद्वर्धन्तु नो गिरः। वत्सं संशिश्वरीरिव। य इन्द्रस्य हृदंसनिः।। १२९३
१६. भद्रो नो अग्निराहुतः। भद्रारातिस्सुभगभद्रो अध्वरः।
भद्रा उत प्रशस्तयः।। १२९४
१७. भद्रं मनः कृणुष्व वृत्रतूर्ये। येनासमत्सु सासहि।
अवस्थिरा तनु हि भूरिशर्धताम्। वने माते अभिष्टये।। १२९५
१८. य एक इद्विदयते। वसुमर्ताय दाशुषे।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग।। १२९६
१९. यश्चिद्धित्वा बहुभ्य आ। सुतावम् आ विवासति।
उग्रन्तत्पत्यते शव इन्द्रो अङ्ग।। १२९७

२०. कदा मर्तमराधसम्। पदाक्षुंपमिव स्फुरत्।
कदानश्शुश्रवद्गिर इन्द्रो अङ्ग।। १२९८
२१. गायन्ति त्वा गायत्रिणः। अर्चन्त्यर्कमर्किणः।
ब्रह्माणस्त्वा शतक्रतो। उद्वंशमिव येमिरे।। १२९९
२२. यत्सानोस्सान्वारुहत्। भूर्यस्पष्ट कर्त्वम्।
तदिन्द्रो अर्थञ्चेतति। यूथेन वृष्णिरेजति।। १३००
२३. युङ्क्ष्वा हि केशिना हरी। वृषणा कक्ष्यप्रा।
अथान इन्द्र सोमपाः। गिरामुपश्रुतिञ्चर।। १३०१

104

1. സുഷമിദ്ധോ ന ആവഹ/ ദേവം അഗ്നേ ഹവിഷ്മതേ/
ഹോതഃ പാവക യക്ഷി ച/ 1302
2. മധുമന്തന്തനൂനപാത്/ യജ്ഞന്ദേവേഷു നഃ കവേ/
അദ്യാ കൃണുഹി വീതയേ/ 1303
3. നരാശംസമിഹ പ്രിയം/ അസ്മിൻ യജ്ഞ ഉപ ഹ്വയേ/
മധുജിഹ്വം ഹവിഷ്കൃതം/ 1304
4. അഗ്നേ സുഖതമേ രഥേ/ ദേവം ഈളിത ആ വഹ/
അസി ഹോതാ മനുർഹിതഃ/ 1305
5. താ നശ്ശക്തം പാർഥിവസ്യ/ മഹോ രായോ ദിവ്യസ്യ/
മഹി വാൻ ക്ഷത്രന്ദേവേഷു/ 1306
6. ഋതമൃതേന സപന്താ/ ഇഷിരന്ദക്ഷമാശതേ/
അദ്രുഹാ ദേവൗ വർധേതേ/ 1307
7. വൃഷ്ടി ദ്യാവാ രീത്യാപാ/ ഇഷസ്പതീ ദാനുമത്യാഃ/
ബൃഹന്തങ്ഗർതമാശാതേ/ 1308
8. യുഞ്ജന്തി ബ്രധ്നമരുഷം/ ചരന്തം പരി തസ്ഥുഷഃ/
രോചന്തേ രോചനാ ദിവി/ 1309
9. യുഞ്ജന്ത്യസ്യ കാമ്യാ/ ഹരീ വിപക്ഷസാ രഥേ/
ശോണാ ധൃഷ്ണൂ നൃവാഹസാ/ 1310
10. കേതുങ്കൃണ്വന്ന കേതവേ/ പേശോ മര്യാ അപേശസേ/
സമുഷദ്ഭിരജായഥാഃ/ 1311
11. തമീളിഷ്വയോ അർചിഷാ/ വനാവിശ്വാ പരിഷ്വജത്/
കൃഷ്ണാ കൃണോതി ജിഹ്വയാ/ 1312
12. യ ഇദ്ധ ആവിവാസതി/ സുമ്നമിന്ദ്രസ്യ മർത്യഃ/
ദ്യുമ്നാനി സുതരാ അപഃ/ 1313
13. താ നോ വാജവതീരിഷഃ/ ആശൂൻ പിപ്യതമർവതഃ/
ഇന്ദ്രമഗ്നിഞ്ച വോഢവേ/ 1314

१०४

१. सुषमिद्धो न आवह। देवं अग्ने हविष्मते। होतःपावक यक्षि च।। १३०२
२. मधुमन्तन्तनूनपात्। यज्ञन्देवेषु नः कवे। अद्या कृणुहि वीतये।। १३०३
३. नराशंसमिह प्रियम्। अस्मिन् यज्ञ उप ह्वये। मधुजिह्वं हविष्कृतम्।। १३०४
४. अग्ने सुखतमे रथे। देवम् ईळित आ वह। असि होता मनुर्हितः।। १३०५
५. ता नश्शक्तं पार्थिवस्य। महो रायो दिव्यस्य। महि वान् क्षत्रन्देवेषु।। १३०६
६. ऋतमृतेन सपन्ता। इषिरन्दक्षमाशते। अद्रुहा देवौ वर्धते।। १३०७
७. वृष्टि द्यावा रीत्यापा। इषस्पती दानुमत्याः। बृहन्तङ्गर्तमाशाते।। १३०८
८. युञ्जन्ति ब्रध्नमरुषम्। चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि।। १३०९
९. युञ्जन्त्यस्य काम्या। हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा।। १३१०
१०. केतुङ्कृण्वन्नकेतवे। पेशो मर्या अपेशसे। समुषद्भिरजायथाः।। १३११
११. तमीळिष्वयो अर्चिषा। वनाविश्वा परिष्वजत्। कृष्णा कृणोति जिह्वया।। १३१२
१२. य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः। द्युम्नानि सुतरा अपः।। १३१३
१३. ता नो वाजवतीरिषः आशून् पिपृतमर्वतः। इन्द्रमग्निञ्च वोढवे।। १३१४

105

1. പ്രത്നം പീയൂഷം പൂർവ്യയ്യദുക്ഥ്യം/
മഹോ ഗാഹാദ്ദിവ ആ നിരധുക്ഷത/
ഇന്ദ്രമഭിജായമാനം സമസ്വരൻ/ 1315
2. അധ യദിമേ പവമാന രോദസീ/
ഇമാ ച വിശ്വാഭുവനാഭി മജ്മനാ/
യൂഥേ ന നിഷ്ഠാ വൃഷഭോ വിതിഷ്ഠസേ/ 1316
3. ആദിങ്കേചിത്പശ്യമാനാസ ആപ്യം/
വസുരുചോ ദിവ്യാ അഭ്യനൂഷത/
വാരന്നദേവസ്സവിതാ വ്യൂർണുതേ/ 1317
4. ആ ജാഗൃവിർവിപ്ര ഋതം മതീനാം/
സോമഃപുനാനോ അസദച്ചമൂഷു/
സപത്ന്യം മിഥുനാസോ നികാമാഃ/
അധ്വര്യവോ രഥിരാസസ്സുഹസ്താഃ/ 1318
5. സ പുനാന ഉപസൂരേ ദധാനഃ/
ഓഭേ അപ്രാ രോദസീ വിഷ ആ വഃ/
പ്രിയാ ചിദ്യസ്യ പ്രിയസാ സ ഊതീ/
സതോ ധനങ്കാരിണേന പ്രയംസത്/ 1319

6. സ വർധിതാ വർധനഃ പൂയമാനഃ/
സോമോ മീഢ്വാം അഭി നോ ജ്യോതിഷാവീത്/
യത്ര നഃപൂർവേ പിതരഃപദജ്ഞാഃ/
സ്വർവിദോ അഭിഗാ അദ്രിമീഷുഃ/ 1320
7. മാചിദന്യദ്വിശംസത/ സഖായോ മാ രിഷണ്യത/
ഇന്ദ്രമിത്സ്തോതാ വൃഷണം സചാ സുതേ/
മുഹുരുക്ഥാ് ച ശംസത/ 1321
8. അവക്രക്ഷിണം വൃഷഭയ്യഥാ ജുവം/ ഗാന്ന ചർഷണീ സഹം/
വിദ്വേഷണം സംവനനമുഭയങ്കരം/ മംഹിഷ്ഠമുഭയാവിനം/ 1322
9. ഉദുത്യേ മധുമത്തമാഃ/ ഗിരസ്തോമാസ ഈരതേ/
സത്രാജിതോ ധനസാ അക്ഷിതോതയഃ/
വാജയന്തോ രഥാ ഇവ/ 1323
10. കണ്വാ ഇവ ഭൃഗവസ്സൂര്യാ ഇവ/ വിശ്വാമിദ്ധീതിമാശത/
ഇന്ദ്രം സ്തോമേഭിർമഹയന്ത ആയവഃ/
പ്രിയമേധാസോ അസ്വരൻ/ 1324

१०५

१. प्रत्नं पीयूषं पूर्व्यय्यदुक्थ्यम्। महो गाहाद्दिव आ निरधुक्षत।
इन्द्रमभिजायमानं समस्वरन्।। १३१५
२. अध यदिमे पवमान रोदसी। इमा च विश्वाभुवनाभि मज्मना।
यूथे न निष्ठा वृषभो वितिष्ठसे।। १३१६
३. आदिङ्केचित्पश्यमानास आप्यम्। वसुरुचो दिव्या अभ्यनूषत।
वारन्नदेवस्सविता व्यूर्णुते।। १३१७
४. आ जागृविर्विप्र ऋतम्मतीनाम्। सोमः पुनानो असदच्चमूषु।
सपत्नियं मिथुनासो निकामाः। अध्वर्यवो रथिरासस्सुहस्ताः।। १३१८
५. स पुनान उपसूरे दधानः। ओभे अप्रा रोदसी विष आ वः।
प्रिया चिद्यस्य प्रियसा स ऊती। सतो धनङ्कारिणेन प्रयंसत्।। १३१९
६. स वर्धिता वर्धनःपूयमानः। सोमो मीढ्वं अभि नो ज्योतिषावीत्।
यत्र नःपूर्वे पितरःपदज्ञाः। स्वर्विदो अभिगा अद्रिमीषुः।। १३२०
७. माचिदन्यद्विशंसत। सखायो मा रिषण्यत।
इन्द्रमित्स्तोता वृषणं सचा सुते। मुहुरुक्था च शंसत।। १३२१
८. अवक्रक्षिणं वृषभय्यथा जुवम्। गान्न चर्षणी सहम्।
विद्वेषणं संवननमुभयङ्करम्। मंहिष्ठमुभयाविनम्।। १३२२

९. उदुत्ये मधुमत्तमाः। गिरस्तोमास ईरते।
सत्राजितो धनसा अक्षितोतयः। वाजयन्तो रथा इव।। १३२३
१०. कण्वा इव भृगवस्सूर्या इव। विश्वमिद्धीतिमाशत।
इन्द्रं स्तोमेभिर्महयन्त आयवः। प्रियमेधासो अस्वरन्।। १३२४

106

1. പവസ്വ മധുമത്തമഃ/ ഇന്ദ്രായ സോമ ക്രതുവിത്തമോ മദഃ/
മഹി ദ്യുക്ഷതമോ മദഃ/ 1325
2. യസ്യ തേ പിത്വാ വൃഷഭോ വൃഷായതേ/ അസ്യ പിതാ സ്വർവിദഃ/
സസൂപ്രകേതോ അഭ്യക്രമീദിഷഃ/ അച്ഛാ വാജന്നൈതശഃ/ 1326
3. ഇന്ദ്രമച്ഛ സുതാ ഇമേ/ വൃഷണഗ്വന്തു ഹരയഃ/
ശ്രുഷ്ടേ ജാതാസ ഇന്ദവ സ്വർവിദഃ/ 1327
4. അയം ഭരായ സാനസിഃ/ ഇന്ദ്രായ പവതേ സുതഃ/
സോമോ ജൈത്രസ്യ ചേതതി യഥാ വിദേ/ 1328
5. അസ്യേദിന്ദ്രോ മദേഷ്വാ/ ഗ്രാഭങ്ഗൃഭ്ണാതി സാനസിം/
വജ്രഞ്ച വൃഷണം ഭരത് സമപ്സുജിത്/ 1329
6. പര്യൂഷു പ്രധന്വാ വാജസാതയേ/ പരിവൃത്രാണി സക്ഷണിഃ/
ദ്വിഷസ്തരധിയ ഋണയാ ന ഈരസേ/ 1330
7. അജീജനോ ഹി പവമാനസൂര്യം/ വിധാരേ ശക്മനാ പയഃ/
ഗോജീരയാ രംഹമാണഃ പുരന്ധ്യാ/ 1331
8. അനുഹിത്വാ സുതം സോമ മദാമസി/ മഹേ സമര്യരാജ്യേ/
വാജം അഭിപവമാന പ്ര ഗാഹസേ/ 1332
9. പരിപ്രധന്വ/ ഇന്ദ്രായ സോമ/
സ്വാദുർമിത്രായ/ പൂഷ്ണേ ഭഗായ/ 1333
10. ഏവാമൃതായ/ മഹേക്ഷയായ/
സ ശുക്രോ അർഷ/ ദിവ്യഃ പീയൂഷഃ/ 1334
11. ഇന്ദ്രസ്തേ സോമ/ സുതസ്യ പേയാത/
ക്രത്വേ ദക്ഷായ/ വിശ്വേ ച ദേവാഃ/ 1335
12. സൂര്യസ്യേവ രശ്മയോ ദ്രാവയിത്നവഃ/
മത്സരാസഃ പ്രസുപസ്സാകമീരതേ/
തന്തുന്തതം പരിസർഗാ സ ആശവഃ/
നേന്ദ്രാദൃതേ പവതേ ധാമ കിഞ്ചന/ 1336
13. ഉപോമതിഃ പൃച്യതേ സിച്യതേ മധു/
മന്ദ്രാജനീ ചോദതേ അന്തരാസനി/
പവമാനസ്സന്തനിസ്സുന്വതാമിവ/
മധുമാന്ദ്രപ്സഃ പരിവാരമർഷതി/ 1337

14. ഉക്ഷാ മിമാതി പ്രതിയന്തി ധേനവഃ/
ദേവസ്യ ദേവീരുപയന്തി നിഷ്കൃതം/
അത്യക്രമീദർജുനം വാരമവ്യം/
അത്കന്നനിക്തം പരിസോമോ അവ്യത/ 1338
15. അഗ്നിന്നരോ ദീധിതിഭിരരണ്യോഃ/
ഹസ്തച്യുതഞ്ജനയതപ്രശസ്തം/
ദൂരേദൃശങ്ഗൃഹപതിമഥവ്യും/ 1339
16. പ്രേദ്ധോ അഗ്നേ ദീദിഹി പുരോ നഃ/
അജസ്രയാ സൂർമ്യാ യവിഷ്ഠ/
ത്വാം ശശ്വന്ത ഉപയന്തി വാജാഃ/ 1340
17. തമഗ്നിമസ്തേ വസവോ ന്യൃണ്വൻ/
സുപ്രതിചക്ഷമവസേ കുതശ്ചിത്/
ദക്ഷായ്യോ യോ ദമ ആസ നിത്യഃ/ 1341
18. ആയങ്ഗൗഃപൃശ്ഞിരക്രമീത്/ അസദന്മാതരം പുരഃ/
പിതരഞ്ച പ്രയൻസ്വഃ/ 1342
19. അന്തശ്ചരതി രോചനാ/ അസ്യ പ്രാണാദപാനതീ/
വ്യഖ്യന്മഹിഷോ ദിവം/ 1343
20. ത്രിംശദ്ധാമവിരാജതി/ വാക്പതങ്ഗായ ധീയതേ/
പ്രതിവസ്തോരഹദ്യുഭിഃ/ 1344

ദ്വാദശാഹം കാണ്ഡം കഴിഞ്ഞു.

१०६

१. पवस्व मधुमत्तमः। इन्द्राय सोम क्रतुवित्तमो मदः। महि द्युक्षतमो मदः।।१३२५
२. यस्य ते पित्वा वृषभो वृषायते। अस्य पिता स्वर्विदः।
ससुप्रकेतो अभ्यक्रमीदिषः। अच्छा वाजन्नैतशः।। १३२६
३. इन्द्रमच्छ सुता इमे। वृषणय्यन्तु हरयः।
श्रुष्टे जातास इन्दव स्वर्विदः।। १३२७
४. अयं भराय सानसिः। इन्द्राय पवते सुतः।
सोमो जैत्रस्य चेतति। यथा विदे।। १३२८
५. अस्येदिन्द्रो मदेष्वा। ग्राभङ्गृभ्णाति सानसिम्।
वज्रञ्च वृषणं भरत् समप्सुजित्।। १३२९
६. पर्यूषु प्रधन्वा वाजसातये। परिवृत्राणि सक्षणिः।
द्विषस्तरधिय ऋणया न ईरसे।। १३३०

७. अजीजनो हि पवमानसूर्यम्। विधारे शक्मना पयः।
गोजीरया रंहमाणःपुरन्ध्या।। १३३१
८. अनुहित्वा सुतं सोम मदामसि। महे समर्यराज्ये।
वाजम् अभिपवमान प्र गाहसे।। १३३२
९. परिप्रधन्व। इन्द्राय सोम। स्वादुर्मित्राय। पूष्णे भगाय।। १३३३
१०. एवामृताय। महेक्षयाय। स शुक्रो अर्ष। दिव्यःपीयूषः।। १३३४
११. इन्द्रस्ते सोम। सुतस्य पेयात्। क्रत्वे दक्षाय। विश्वे च देवाः।। १३३५
१२. सूर्यस्येव रश्मयो द्रावयित्नवः। मत्सरासःप्रसुपस्साकमीरते।
तन्तुन्ततं परिसर्गा स आशवः। नेन्द्रादृते पवते धाम किञ्चन।। १३३६
१३. उपोमतिःपृच्यते सिच्यते मधु। मन्द्राजनी चोदते अन्तरासनि।
पवमानस्सन्तनिस्सुन्वतामिव। मधुमान्द्रप्सःपरिवारमर्षति।। १३३७
१४. उक्षा मिमाति प्रतियन्ति धेनवः। देवस्य देवीरुपयन्ति निष्कृतम्।
अत्यक्रमीदर्जुनं वारमव्ययम्। अत्कन्ननिक्तं परिसोमो अव्यत।। १३३८
१५. अग्निन्नरो दीधितिभिररण्योः। हस्तच्युतञ्जनयतप्रशस्तम्।
दूरेदृशङ्गृहपतिमथव्युम्।। १३३९
१६. प्रेद्धो अग्ने दीदिहि पुरो नः। अजस्रया सूर्म्या यविष्ठ।
त्वां शश्वन्त उपयन्ति वाजाः।। १३४०
१७. तमग्निमस्ते वसवो न्यृण्वन्। सुप्रतिचक्षमवसे कुतश्चित्।
दक्षाय्यो यो दम आस नित्यः।। १३४१
१८. आयङ्गौःपृश्निरक्रमीत्। असदन्मातरं पुरः। पितरञ्च प्रयन्स्वः।। १३४२
१९. अन्तश्चरति रोचना। अस्य प्राणादपानती। व्यख्यन्महिषो दिवम्।। १३४३
२०. त्रिंशद्धाम विराजति। वाक्पतङ्गाय धीयते। प्रतिवस्तोरहद्युभिः।। १३४४

द्वादशाहं काण्डं समाप्तम्।

കാണ്ഡം 5 - ഉത്തര
काण्डं- ५ - उत्तर।

107

1. ഇന്ദ്രോ രാജാ ജഗതശ്ചർഷണീനാം/
അധിക്ഷമാ വിശ്വരൂപയ്യദസ്യ/
തതോ ദദാതി ദാശുഷേ വസൂനി/
ചോദദ്രാധ ഉപസ്തുതഞ്ചിദർവാക്/ 1345
2. സന്തേ പയാംസി സമുയന്തു വാജാഃ/
സംവൃഷ്ണ്യാന്യഭിമാതിഷാഹഃ/
ആപ്യായമാനോ അമൃതായ സോമ/
ദിവിശ്രവാംസ്യുത്തമാനിധത്സ്വ/ 1346
3. ത്വമിമാ ഓഷധീസ്സോമവിശ്വാഃ/
ത്വമപോ അജനയസ്ത്വങ്ഗാഃ/
ത്വമാതനോരുർവാന്തരിക്ഷം/
ത്വഞ്ജ്യോതിഷാ വിതമോ വവർഥ/ 1347
4. മയി വർചോ അഥോ ഭഗം/
അഥോ യജ്ഞസ്യ യത്പയഃ/
പരമേഷ്ഠീ പ്രജാപതിഃ/
ദിവി ദ്യാമിവ ദ്യംഹതു/ 1348
5. ഇദഞ്ഛരന്തോ ജമദഗ്നേരൃതാവൃധഃ/
യേന ദേവാസോ അമൃതത്വമായൻ/
തത്ര ദ്യാവാപൃഥിവീ ധത്തമസ്മാൻ/
യത്ര ദേവാനാങ്ഗുഹ്യന്നിധാമ/ 1349
6. സമന്യായന്ത്യുപയന്ത്യന്യാഃ/
സമാനമൂർവന്നദ്യഃപൃണന്തി/
തമൂശുചിം ശുചയോ ദീദിവാംസം/
അപാന്നപാതമുപയന്ത്യാപഃ/ 1350
7. തേമന്വത പ്രഥമന്നാമഗോനാം/
ത്രിസ്സപ്തപരമന്നാമജാനാം/
താ ജാനതീരഭ്യനൂഷതക്ഷാഃ/
ആവിർഭുവന്നരുണീര്യശസാ ഗാവഃ/ 1351
8. സഹർഷഭാസ്സഹവത്സാ ഉദേത/
വിശ്വാരൂപാണി ബിഭ്രതീദ്യൂധ്നീഃ/
ഉരുഃ പൃഥുരയം വോ അസ്തു ലോകഃ/
ഇമാ ആപസ്സുപ്രപാണാ ഇഹസ്ത/ 1352

9. ആരാത്സുപർണഃപതതു/
മാശ്വാനമാശിതങ്കരത്/
തീർഥാനി സുപ്രപാണാനി/
സുഗം ഗോഷദനങ്കരത്/ 1353
10. അഗ്നിമീളേ പുരോഹിതം/ യജ്ഞസ്യ ദേവമൃത്വിജം/
ഹോതാരം രത്നധാതമം/ 1354
11. മന്യേവാൻ ദ്യാവാപൃഥിവീ സുഭോജസാ/
യേ അപ്രഥേഥാമമിതമഭിയോജനം/
ദ്യാവാപൃഥിവീ ഭവതം സ്യോനേ/
തേ നോ മുഞ്ചതമംഹസഃ/ 1355
12. യശസാ മാ ദ്യാവാപൃഥിവീ/ ഭഗേനേന്ദ്ര ബൃഹസ്പതീ/
യശോ ഭഗസ്യ വിന്ദതു/ യശോ മാ പ്രതിമുച്യതാം/
യശസ്വിയാ സ്യാസ്സംസദഃ/ അഹം പ്രവദിതാ സ്യാം/
അഹം ഭൂയാസമുത്തമഃ/ 1356
13. പ്രക്ഷസ്യ വൃഷ്ണോ അരുഷസ്യ നൂമഹഃ/
പ്ര നു വോചോ വിദഥാ ജാതവേദസേ/
വൈശ്വാനരായ മതിർനവ്യസേ ശുചിഃ/
സോമ ഇവ പവതേ ചാരുരഗ്നയേ/ 1357
14. വിശ്വേദേവാ മമ ശൃണ്വന്തു യജ്ഞം/
ഉഭേ രോദസീ അപാന്നപാച്ചമന്മ/
മാ വോ വചാംസി പരിചക്ഷ്യാണി വോചം/
സുമ്നേഷ്വിദ്വോ അന്തമാ മദേമ/ 1358
15. ഏവാ ഹ്യസി വീരയുഃ/ ഏവാ ശൂര ഉതസ്ഥിരഃ/
ഏവാ തേ രാധ്യം മനഃ/ 1359
16. ആപ്രാഗാദ്ഭദ്രാ യുവതിഃ/
അഹനഃ കേതൂൻ സമീപ്സതിഃ/
അഭൂദ്ഭദ്രാ നിവേശനീ/
വിശ്വസ്യ ജഗതോ രാത്രിഃ/ 1360
17. ഉഗ്രം വാജീന്യക്രമീത്/ 1361
18. അഗ്നിരസ്മി ജന്മനാ ജാതവേദാഃ/
ഘൃതമ്മേ ചക്ഷുരമൃതമ്മ ആസൻ/
ത്രിധാത്വർകോ രജസോ വിമാനഃ/
അജസ്രഞ്ജ്യോതിർഹവിരസ്മി സർവം/ 1362
19. പാത്യഗ്നിർവിപോ അഗ്രം പദം വേഃ/
പാതി യഹ്വശ്ചരണം സൂര്യസ്യ/
പാതി നാഭാസപ്തശീർഷാണമഗ്നിഃ/
പാതി ദേവാനാമുപമാദമൃഷ്വഃ/ 1363

20. ഭ്രാജന്ത്യഗ്നേ സമിധാനദീദിവഃ/
ജിഹ്വാ ചരന്ത്യന്തരാസനി/
സത്വന്നോ അഗ്നേ പയസാ വസുവിത്/
രയിം വർചോ ദൃശേദാഃ/ 1364
21. ഇന്ദ്രസ്യ നു വീര്യാണി പ്രവോചം/
യാനി ചകാര പ്രഥമാനി വജ്രീ/
അഹന്നഹിമന്വപസ്തതർദ/
പ്രവക്ഷണാ അഭിനത്പർവതാനാം/ 1365
22. വിഭ്രാഡ്ബൃഹത്പിബതു സോമ്യം മധു/
ആയുർദധദ്യജ്ഞപതാവവിഹ്രുതം/
വാതജൂതോ യോ അഭിരക്ഷതി ത്മനാ/
പ്രജാഃ പിപർതി ബഹുധാ വിരാജതി/ 1366
23. വസന്ത ഇന്നു രന്ത്യഃ/ ഗ്രീഷ്മ ഇന്നു രന്ത്യഃ/
വർഷാണി ഇന്നു ശരദഃ/ ഹേമന്തശിശിര ഇന്നു രന്ത്യഃ/ 1367
24. തവത്യേ പിതോ ദദതഃ/ തവ സ്വാദിഷ്ഠതേ പിതോ/
പ്രസ്വാദ്വാനോ രസാനാം/ തുവി ഗ്രീവാ ഇവേ രതേ/ 1368
25. ഇന്ദ്ര സ്പൃധുത വൃത്രഹാ/ പരസ്പാ നോ വരേണ്യഃ/
സ നോ രക്ഷിഷച്ചരമം സമധ്യമം/
സ പശ്ചാത്പാതു സ പുരഃ/ 1369
26. സഹസ്രശീർഷാ പുരുഷഃ/ സഹസ്രാക്ഷസ്സഹസ്രപാത്/
സ ഭൂമിം സർവതോ വൃത്വാ/ അത്യതിഷ്ഠദ്ദശങ്ഗുലം/ 1370
27. ത്രിപാദൂർധ്വ ഉദൈത്പുരുഷഃ/ പാദോസ്യേഹാ ഭവത്പുനഃ/
തഥാ വിഷ്വങ്വ്യക്രാമത്/ അശനാനശനേ അഭി/ 1371
28. പുരുഷ ഏവേദം സർവം/ യത് ഭൂതയ്യച്ച ഭവ്യം/
പാദോസ്യ സർവാ ഭൂതാനി/ ത്രിപാദസ്യാമൃതന്ദിവി/ 1372
29. താവാനസ്യ മഹിമാ/ തതോ ജ്യായാംശ്ച പൂരുഷഃ/
ഉതാമൃതത്വസ്യേശാനഃ/ യദന്നേനാതിരോഹതി/ 1373
30. തതോ വിരാഡജായത/ വിരാജോ അധിപൂരുഷഃ/
സ ജാതോ അത്യരിച്യത/ പശ്ചാത് ഭൂമിമഥോ പുരഃ/ 1374
31. യത്പുരുഷേണ ഹവിഷാ/ ദേവാ യജ്ഞമതന്വത/
വസന്ത ഏഷാമാസീദാജ്യം/ ഗ്രീഷ്മ ഇധ്മശ്ശരദ്ധവിഃ/ 1375
32. സപ്താസ്യാസൻ പരിധയഃ/ ത്രിസ്സപ്തസമിധഃ കൃതാഃ/
ദേവാ യദ്യജ്ഞന്തന്വാനാഃ/ അബധ്നൻ പുരുഷം ഹവിഃ/ 1376
33. ഹരീത ഇന്ദ്ര ശ്മശ്രൂണി/ ഉതോ തേ ഹരിതാ ഹരീ/
തന്ത്വാ സ്തുവന്തി കാരവഃ/ പരുഷാസോ വനർഗവഃ/
രിശ്യാസ ഇന്ദ്ര ഭുങ്ങിതി/ മഘവന്നിന്ദ്ര ഭുങ്ങിതി/
ഇന്ദ്രസ്ത്രസരപൂതഃ/ 1377

34. യദ്വർചോ ഹിരണ്യസ്യ/ യദ്വാ വർചോ ഗവാമുത/
സത്യസ്യ ബ്രഹ്മണോ വർചഃ/ തേന മാ സംസൃജാമസി/ 1378
35. ചിത്രന്നോവാനാമുദഗാദനീകം/
ചക്ഷുർമിത്രസ്യ വരുണസ്യാഗ്നേഃ/
ആ പ്രാ ദ്യാവാപൃഥിവീ അന്തരിക്ഷം/
സൂര്യ ആത്മാ ജഗതസ്തസ്ഥുഷശ്ച/ 1379
36. യദിതസ്തന്വോ മമ/ ദോഷാ രസസ്യ ഭേജിരേ/
നരാശംസേന സോമേന/ അഹന്തത്പുനരാദദേ/
യുഷ്മദപ്സരസസ്പരി/ 1380
37. യസ്യേദമാരജോ യുജഃ/ തുജേ ജനേ വനം സ്വഃ/
ഇന്ദ്രസ്യ രന്ത്യം ബൃഹത്/ 1381
38. സഹസ്തന്ന ഇന്ദ്ര ദധ്യോജഃ/
ഈശേ ഹ്യാസ്യ മഹതോ വിരപ്ശീ/
ക്രതുന്ന നൃമ്ണം സ്ഥവിരഞ്ച വാജം/
വൃത്രേഷു ശത്രുൻ സുഹനാ കൃധീ നഃ/ 1382
39. ഇന്ദ്ര ജ്യേഷ്ഠന്ന ആഭര/ ഓജിഷ്ഠം പുപുരിശ്രവ /
യദ്ദിധൃക്ഷേമ വജ്ര ഹസ്ത രോദസീ/
ഓഭേ സുശിപ്ര പപ്രാഃ/ 1383
40. ഉദുത്തമം വരുണപാശമസ്മത്/
അവാധമം വിമധ്യമം ശ്രഥായ/
അഥാദിത്യ വ്രതേ വയന്തവ/
അനാഗസോ അദിതയേ സ്യാമ/ 1384
41. ത്വയാ വയം പവമാനേന സോമ/
ഭരേ കൃതം വിചിനുയാമ ശശ്വത്/
തന്നോ മിത്രോ വരുണോ മാമഹന്താം/
അദിതിസ്സിന്ധുഃ പൃഥിവീ ഉതദ്യൗഃ/ 1385
42. ഇമം വൃഷണങ്കൃണുതൈകം മാം/ 1386
43. സ ന ഇന്ദ്രായ യജ്യവേ/ വരുണായ മരുദ്ഭ്യഃ/
വരിവോവിത് പരിസ്രവ/ 1387
44. ഏനാ വിശ്വാന്യര്യ ആ/ ദ്യുമ്നാനി മാനുഷാണാം/
സിഷാസന്തോ വനാമഹേ/ 1388
45. ത്വമേതദധാരയഃ/ കൃഷ്ണാസു രോഹിണീഷു ച/
പരുഷ്ണീഷു രുശത്പയഃ/ 1389
46. പ്രഥശ്ച യസ്യ സപ്രഥശ്ച നാമ/
ആനുഷ്ടുഭസ്യ ഹവിഷോ ഹവിര്യത്/
ധാതുർദ്യുതാനാത്സവിതുശ്ച വിഷ്ണോഃ/
രഥന്തരമാജഭാരാ വസിഷ്ഠഃ/ 1390

47. ഇന്ദ്ര ഇദ്ധര്യോസ്സചാ/ സമ്മിശ്ല ആ വചോ യുജാ/
ഇന്ദ്രോ വജ്രീ ഹിരണ്യയഃ/ 1391
48. ഇന്ദ്ര വാജേഷു നോവ/ സഹസ്രപ്രധനേഷു ച/
ഉഗ്ര ഉഗ്രാഭിരൂതിഭിഃ/ 1392
49. അരൂരുചദുഷസഃപ്യശ്നിരഗ്രയുഃ/
ഉക്ഷാമിമാതി ഭുവനേഷു വാജയുഃ/
മായാവിനോ മമിരേ അസ്യ മായയാ/
നൃചക്ഷസഃ പിതരോ ഗർഭമാദധുഃ/ 1393
50. യജ്ജായഥാ അപൂർവ്യ/ മഘവന്യുത്രഹഥായ/
തത് പൃഥിവീമപ്രഥയഃ/ തദസ്തഭ്നാ ഉത് ദിവം/ 1394
51. അഗ്ന ആയൂംഷി പവസേ/ ആ സുവോർജമിഷഞ്ചനഃ/
ആരേ ബാധസ്വ ദുച്ഛുനാം/ 1395
52. ആയങ്ഗൗഃ പൃശ്നിരക്രമീത്/ അസദന്മാതരം പുരഃ/
പിതരഞ്ച പ്രയൻസ്വഃ/ 1396
53. അന്തശ്ചരതി രോചനാ/ അസ്യ പ്രാണാദപാനതീ/
വ്യഖ്യന്മഹിഷോ ദിവം/ 1397
54. ത്രിശംദ്ധാമ വിരാജതി/ വാക് പതങ്ഗായ ധീയതേ/
പ്രതിവസ്തോരഹദ്യുഭിഃ/ 1398
55. വിദാ മഘവന്വിദാ ഗാതുമനുശംസിഷോ ദിശഃ/
ശിക്ഷാശചീനാം പതേ പൂർവീണാം പുരോവസോ/
ആഭിഷ്ടുമഭിഷ്ടിഭിഃ പ്രചേതനപ്രചേതയേന്ദ്രദ്യുമ്നായന ഇഷേ/
ഏവാ ഹി ശക്രോ രായേ വാജായ വജ്രിവഃ/
ശവിഷ്ഠവജ്രിന്നൃഞ്ജസേ മംഹിഷ്ഠ വജ്രിന്നൃഞ്ജസ/
ആ യാഹി പിബ മത്സ്വ/ 1399
56. വിദാ രായേ സുവീര്യം ഭുവോ വാജാനാംപതിർവശം അനു/
മംഹിഷ്ഠ വജ്രിന്നൃഞ്ജസേ യശ്ശവിഷ്ഠശ്ശൂരാണാം/
യോ മംഹിഷ്ഠോ മഘോനാം/
ചികിത്വോ അഭിനോ നയേന്ദ്രോ വിദേ തമുസ്തുഹി/
ഈശേ ഹി ശക്രസ്തമൂതയേ ഹവാമഹേ ജേതാരമപരാജിതം/
സ നഃ പർഷദതി ദ്വിഷഃ ക്രതുശ്ഛന്ദ ഋതം ബൃഹത്/ 1400
57. ഇന്ദ്രസ്ഥനസ്യ സാതയേ ഹവാമഹേ ജേതാരമപരാജിതം/
സ നഃപർഷദതി ദ്വിഷസ്സ നഃപർഷദതി ദ്വിഷഃ/
പൂർവസ്യ യത്തേ അദ്രിവഃ സുമ്ന ആധേഹി/
നോ വസോ പൂർതിശ്ശവിഷ്ഠ ശസ്യതേ/
വശീഹി ശക്രോ നൂനന്തന്നവ്യം സന്യസേ/
പ്രഭോർജനസ്യ വൃത്രഹൻ സമര്യേഷു സ്തവാമഹേ/
ശൂരോ യോ ഗോഷു ഗച്ഛതി സഖാ സുശേവോ അദ്രയുഃ/ 1401

58. ഏവാഹ്യവ/ ഏവാഹ്യഗ്നേ/ ഏവ്ാഹിന്ദ്ര/
ഏവാഹി പൂഷൻ/ ഏവാഹി ദേവാഃ/ 1402

१०७

१. इन्द्रो राजा जगतश्चर्षणीनाम् । अधिक्षमा विश्वरूपय्यदस्य।
ततो ददाति दाशुषे वसूनि। चोदद्राध उपस्तुतञ्चिदर्वाक्।। १३४५
२. सन्ते पयांसि समुयन्तु वाजाः। संवृष्ण्यान्यभिमातिषाहः।
आप्यायमानो अमृताय सोम। दिविश्रवांस्युत्तमानिधत्स्व।। १३४६
३. त्वमिमा ओषधीस्सोमविश्वाः। त्वमपो अजनयस्त्वङ्गाः।
त्वमातनोरुर्वान्तरिक्षम्। त्वञ्ज्योतिषा वितमो ववर्थ।। १३४७
४. मयि वर्चो अथो भगम्। अथो यज्ञस्य यत्पयः।
परमेष्ठी प्रजापतिः। दिवि द्यामिव दृंहतु।। १३४८
५. इदञ्छन्दो जमदग्नेरृतावृधः। येन देवासो अमृतत्वमायन्।
तत्र द्यावापृथिवी धत्तमस्मान्। यत्र देवानाङ्गुह्यन्निधाम।। १३४९
६. समन्यायन्त्युपयन्त्यन्याः। समानमुर्वन्नद्यःपृणन्ति।
तमूशुचिं शुचयो दीदिवांसम्। अपान्नपातमुपयन्त्यापः।। १३५०
७. तेमन्वत प्रथमन्नाम गोनाम्। त्रिस्सप्तपरमन्नामजानाम्।
ता जानतीरभ्यनूषतक्षाः। आविर्भुवन्नरुणीर्यशसा गावः।। १३५१
८. सहर्षभास्सहवत्सा उदेत। विश्वारूपाणि बिभ्रतीद्व्यूध्नीः।
उरुःपृथुरयं वो अस्तु लोकः। इमा आपस्सुप्रपाणा इहस्त।। १३५२
९. आरात्सुपर्णःपततु। माश्वानमाशितङ्करत्।
तीर्थानि सुप्रपाणानि। सुगं गोषदनङ्करत्।। १३५३
१०. अग्निमीले पुरोहितम्। यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।। १३५४
११. मन्येवान् द्यावापृथिवी सुभोजसा। ये अप्रथेथाममितमभियोजनम्।
द्यावापृथिवी भवतं स्योने। ते नो मुञ्चतमंहसः।। १३५५
१२. यशसा मा द्यावापृथिवी। भगेनेन्द्र बृहस्पती।
यशो भगस्य विन्दतु। यशो मा प्रतिमुच्यताम्।।
यशस्विया स्यास्संसदः। अहं प्रवदिता स्याम्। अहं भूयासमुत्तमः।। १३५६
१३. प्रक्षस्य विष्णो अरुषस्य नूमहः। प्र नू वोचो विदथा जातवेदसे।
वैश्वानराय मतिर्नव्यसे शुचिः। सोम इव पवते चारुरग्नये।। १३५७

१४. विश्वेदेवा मम शृण्वन्तु यज्ञम्। उभे रोदसी अपान्नपाच्च मन्म।
मा वो वचांसि परिचक्ष्याणि वोचम्। सुम्नेष्विद्वो अन्तमामदेम।। १३५८
१५. एवा ह्यसि वीरयुः। एवा शूर उतस्थिरः। एवा ते राध्यं मनः।। १३५९
१६. आप्रागात्भद्रा युवतिः। अह्नः केतून् समीप्सति।
अभूत्भद्रा निवेशनी। विश्वस्य जगतो रात्रिः।। १३६०
१७. उग्रं वाजीन्यक्रमीत्।। १३६१
१८. अग्निरस्मि जन्मना जातवेदाः। घृतम्मे चक्षुरमृतम्म आसन्।
त्रिधात्वर्को रजसो विमानः। अजस्रञ्ज्योतिर्हविरस्मि सर्वम्।। १३६२
१९. पात्यग्निर्विपो अग्रं पदं वे। पाति यह्वश्चरणं सूर्यस्य।
पाति नाभासप्तशीर्षाणमग्निः। पाति देवानामुपमादमृष्वः।। १३६३
२०. भ्राजन्त्यग्ने समिधानदीदिवः। जिह्वा चरन्त्यन्तरासनि।
सत्वन्नो अग्ने पयसा वसुवित्। रयिं वर्चो दृशेदाः।। १३६४
२१. इन्द्रस्य नु वीर्याणि प्रवोचम्। यानि चकार प्रथमानि वज्री।
अहन्नहिमन्वपस्ततर्द। प्रवक्षणा अभिनत्पर्वतानाम्।। १३६५
२२. विभ्राळ्बृहत्पिबतु सोम्यं मधु। आयुर्दधद्यज्ञपतामहिह्रुतम्।
वातजूतो यो अभिरक्षति त्मना। प्रजाःपिपर्ति बहुधा विराजति।। १३६६
२३. वसन्त इन्नु रन्त्यः। ग्रीष्म इन्नु रन्त्यः।
वर्षाणि इन्नु शरदः। हेमन्तशिशिर इन्नु रन्त्यः।। १३६७
२४. तवत्ये पितो ददतः। तव स्वादिष्ठते पितो।
प्रस्वाद्वानो रसानाम्। तुवि ग्रीवा इवे रते।। १३६८
२५. इन्द्र स्पडुत वृत्रहा। परस्पा नो वरेण्यः।
स नो रक्षिषच्चरमं समध्यमम्। स पश्चात्पातु स पुरः।। १३६९
२६. सहस्रशीर्षा पुरुषः। सहस्राक्षस्सहस्रपात्।
स भूमिं सर्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्।। १३७०
२७. त्रिपादूर्ध्व उदैत्पुरुषः। पादोस्येहा भवत्पुनः।
तथा विष्वङ्व्यक्रामत् । अशनानशने अभि।। १३७१
२८. पुरुष एवेदं सर्वम्। यत् भूतय्यच्च भव्यम्।
पादोस्य सर्वा भूतानि। त्रिपादस्यामृतन्दिवि।। १३७२
२९. तावानस्य महिमा। ततो ज्यायांश्च पूरुषः।
उतामृतत्वस्येशानः। यदन्नेनातिरोहति।। १३७३

३०. ततो विराडजायत। विराजो अधिपूरूषः।
स जातो अत्यरिच्यत। पश्चात् भूमिमथो पुरः।। १३७४
३१. यत्पुरुषेण हविषा। देवा यज्ञमतन्वत।
वसन्त एषामासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः।। १३७५
३२. सप्तास्यासन् परिधयः। त्रिरस्सप्तसमिधः कृताः।
देवा यद्यज्ञन्तन्वानाः। अप्नाध्नन् पुरुषं हविः।। १३७६
३३. हरीत इन्द्र श्मश्रूणि। उदोते हरिती हरी।
तन्त्वा स्तुवन्ति कारवः। रिश्यास इन्द्र भुङिति।
मघवन्निन्द्र भुङिति। इन्द्रस्त्रसरपूतः।। १३७७
३४. यद्वर्चो हिरणस्य। यद्वा वर्चो गवामुत।
सत्यस्य ब्रह्मणो वर्चः। तेन मासं सृजामसि।। १३७८
३५. चित्रन्देवानामुदगादनीकम्। चक्षुर्मित्रस्य वरुणस्याग्नेः।
आ प्रा द्यावापृथिवी अन्तरिक्षम्। सूर्य आत्मा जगतस्तस्थुषश्च।। १३७९
३६. यदितस्तन्वो मम। दोषा रसस्य भेजिरे।
नराशंसेन सोमेन अहन्तत्पुनराददे। युष्मदप्सरसस्परि।। १३८०
३७. यस्येदमारुजो युजः। तुजे जने वनं स्वः। इन्द्रस्य रन्त्यं बृहत्।। १३८१
३८. सहस्तन्न इन्द्र दध्योजः। ईशे ह्यास्य महतो विरप्शी।
क्रतुन्न नृम्णं स्थविरञ्च वाजम्। वृत्रेषु शत्रून् सुहना कृधी नः।। १३८२
३९. इन्द्र ज्येष्ठन्न आभर। ओजिष्ठं पुपुरिश्रवः।
यद्दिधृक्षेम वज्र हस्त रोदसी। ओभे सुशिप्र पप्राः।। १३८३
४०. उदुत्तमं वरुणपाशमस्मत्। अवाधमं विमध्यमं श्रथाय।
अथादित्य व्रते वयन्तव। अनागसो अदितये स्याम।। १३८४
४१. त्वया वयं पवमानेन सोम। भरे कृतं विचिनुयाम शश्वत्।
तन्नो मित्रो वरुणो मामहन्ताम्। अदितिस्सिन्धुःपृथिवी उतद्यौः।। १३८५
४२. इमं वृषणङ्कृणुतैकम्माम्।। १३८६
४३. स न इन्द्राय यज्यवे। वरुणाय मरुत्भ्यः। वरिवोवित् परिस्रवः।। १३८७
४४. एना विश्वान्यर्य आ। द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे।। १३८८
४५. त्वमेतदधारयः। कृष्णासु रोहिणीषु च। रुष्णीषु रुशत्पयः।। १३८९
४६. प्रथश्च यस्य सप्रथश्च नाम। आनुष्टुभस्य हविषो हविर्यत्।
धातुर्द्युतानात्सवितुश्च विष्णोः। रथन्तरमाजभारा वसिष्ठः।। १३९०

४७. इन्द्र इद्धर्योस्सचा। सम्मिश्ळ आ वचो युजा।
इन्द्रो वज्री हिरण्ययः।। १३९१

४८. इन्द्र वाजेषु नोव। सहस्त्रप्रधनेषु च। उग्र उग्राभिरूतिभिः।। १३९२

४९. अरूरुचदुषसःपृश्निरग्रयुः। उक्षामिमाति भुवनेषु वाजयुः।
मायाविनो ममिरे अस्य मायया। नृचक्षसःपितरो गर्भमादधुः।। १३९३

५०. यज्जायथा अपूर्व्य। मघवन्वृत्रहथाय।
तत् पृथिवीमप्रथयः। तदस्तभ्ना उत दिवम्।। १३९४

५१. अग्न आयूंषि पवसे। आ सुवोर्जमिषञ्चन। आरे बाधस्व दुच्छुनाम्।। १३९५

५२. आयङ्गौःपृश्निरक्रमीत्। असदन्मातरं पुरः। पितरञ्च प्रयन्स्वः।। १३९६

५३. अन्तश्चरति रोचना। अस्य प्राणादपानती। व्यख्यन्महिषो दिवम्।। १३९७

५४. त्रिंशद्धाम विराजति। वाक् पतङ्गाय धीयते। प्रतिवस्तोरहद्युभिः।। १३९८

५५. विदा मघवन्विदा गातुमनुशंसिषो दिशः।
शिक्षा शचीनां पते पूर्वीणां पुरोवसो।
आभिष्ट्वमभिष्ठिभिःप्रचेतनप्रचेतयेन्द्रद्युम्नायन इषे।
एवा हि शक्रो राये वाजाय वज्रिवः।
शविष्ठवज्रिन्नृञ्जसे मंहिष्ठ वज्रिन्नृञ्जस आ याहि पिब मत्स्व।। १३९९

५६. विदा राये सुवीर्यं भुवो वाजानां पतिर्वशम् अनु।
मंहिष्ठ वज्रिन्नृञ्जसे यश्शविष्ठश्शूराणां यो मंहिष्ठो मघोनाम्।
चिकित्वो अभिनो नयेन्द्रो विदेतमुस्तुहि।
ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितम्।
स नःपर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत्।। १४००

५७. इन्द्रन्धनस्य सातये हवामहे जेतारमपराजितम्।
स नःपर्षदति द्विषस्स नःपर्षदति द्विषः।
पूर्वस्य यत्ते अद्रिवस्सुम्न आधेहि नो वसो पूर्तिश्शविष्ठ शस्यते।।
वशीहि शक्रो नूनन्तन्नव्यं सन्यसे।
प्रभोर्जनस्य वृत्रहन् समर्येषु स्तवामहे।
शूरो यो गोषु गच्छति सखा सुशेवो अद्रयुः।। १४०१

५८. एवाह्येव। एवाह्यग्ने। एवाहीन्द्र। एवाहि पूषन्।। एवाहि देवाः।। १४०२

108

1. അയാ രുചാ ഹരിണ്യാ പുനാനഃ/
വിശ്വാ ദ്വേഷാംസി തരതി സയുഗ്വഭിഃ/
സൂരോ ന സ യുഗ്വഭിഃ/
ധാരാ പൃഷ്ഠസ്യ രോചതേ/
പുനാനോ അരുഷോ ഹരിഃ/
വിശ്വാ യദ്രൂപാ പരിയാസ്യൃക്വഭിഃ/
സപ്താസ്യേഭിരൃക്വഭിഃ/ 1403

2. പ്രാചീമനുപ്രദിശയ്യാതി ചേകിതത്/
സംരശ്മിഭിര്യതതേ ദർശതോ രഥഃ/
ദൈവ്യോ ദർശതോ രഥഃ/
അഗ്മന്നുക്ഥാനി പൗംസ്യാ/
ഇന്ദ്രഞ്ജൈത്രായ ഹർഷയൻ/
വജ്രശ്ച യത് ഭവഥോ അനപച്യുതാ/
സമത്സ്വനപച്യുതാ/ 1404

3. ത്വന്ത്യത്പണീനാം വിദോ വസു/
സമ്മാതൃഭിർമർജയസി സ്വ ആ ദമേ/
ഋതസ്യ ധീതിഭിർദമേ/
പരാവതോ ന സാമ തത്/
യത്രാരണന്തി ധീതയഃ/
ത്രിധാതുഭിരരുഷീഭിർവയോ ദധേ/
രോചമാനോ വയോ ദധേ/ 1405

4. പ്രോഷ്ഠസ്മൈ പുരോ രഥം/
ഇന്ദ്രായ ശൂഷമർചത/
അഭികേ ചിദുലോകകൃത്/
സങ്ഗേ സമത്സു വൃത്രഹാ/
അസ്മാകം ബോധി ചോദിതാ/
നഭന്താമന്യകേഷാം/
ജ്യാകാ അധി ധന്വസു/ 1406

5. ത്വം സിന്ധും രവാസൃജഃ/ അധരാ ചോ അഹന്നഹിം/
അശത്രുരിന്ദ്ര ജജ്ഞിഷേ/ വിശ്വം പുഷ്യസി വാര്യം/
തന്ത്വാ പരിഷ്വജാമഹേ/ നഭന്താമന്യ കേഷാം/
ജ്യാകാ അധി ധന്വസു/ 1407

6. വിഷു വിശ്വാ അരാതയഃ/ അര്യോ ന ശന്തനോധിയഃ/
അസ്താസി ശത്രവേ വധം/ യോ ന ഇന്ദ്ര ജിഘാംസതി/
യാതേ രാതിർദദിർവസു/ നഭന്താമന്യ കേഷാം/
ജ്യാകാ അധി ധന്വസു/ 1408

7. പ്ര വോ വാജാ അഭിദ്യവഃ/ ഹവിഷ്മന്തോ ഘൃതാച്യാ/
ദേവാഞ്ജിഗാതി സുമ്നയുഃ/ 1409
8. ഈളേ അഗ്നിം വിപശ്ചിതം/ ഗിരാ യജ്ഞസ്യ സാധനം/
ശ്രുഷ്ടീവാനന്ധീതാവാനം/ 1410
9. അഗ്നേ ശകേമ തേ വയം/ യമന്ദേവസ്യ വാജിനഃ/
അതിദ്വേഷാംസി തരേമ/ 1411
10. ഉദുത്യഞ്ജാതവേദസം/ ദേവം വഹന്തി കേതവഃ/
ദൃശേ വിശ്വായ സൂര്യം/ 1412
11. തരണിർവിശ്വദർശതഃ/ ജ്യോതിഷ്കൃദസി സൂര്യ/
വിശ്വമാഭാസി രോചനം/ 1413
12. പ്രത്യങ് ദേവാനാം വിശഃ/ പ്രത്യങുദേഷി മാനുഷീഃ/
പ്രത്യങ് വിശ്വം സ്വർദൃശേ/ 1414
13. ഉദ്ഘേദഭിശ്രുതാമഘം/ വൃഷഭന്നര്യാപസം/
അസ്താരമേഷി സൂര്യ/ 1415
14. നവയോ നവതിം പുരഃ/ ബിഭേദ ബാഹ്വോജസാ/
അഹിഞ്ച വ്യത്രഹാവധീത്/ 1416
15. സ ന ഇന്ദ്രശ്ശിവസ്സഖാ/ അശ്വാവദ്ഗോമദ്യവമത്/
ഉരു ധാരേവ ദോഹതേ/ 1417
16. ഇന്ദ്രാഗ്നീ രോചനാദിവഃ/ പരി വാജേഷു ഭൂഷഥഃ/
തദ്വാഞ്ഛേതി പ്രവീര്യം/ 1418
17. ഇന്ദ്രാഗ്നീ തവിഷാണി വാം/ സധസ്ഥാനി പ്രയാംസി ച/
യുവോരപ്തൂര്യം ഹിതം/ 1419
18. ഇന്ദ്രാഗ്നീ അപസസ്പരി/ ഉപപ്രയന്തി ധീതയഃ/
ഋതസ്യ പഥ്യാ അനു/ 1420
19. വിഭ്രാൾബൃഹത്പിബതു സോമ്യം മധു/
ആയുർദധദ്യജ്ഞപതാവവിഹ്രുതം/
വാത ജൂതോ യോ അഭിരക്ഷതി ത്മനാ/
പ്രജാഃ പിപർതി ബഹുധാ വിരാജതി/ 1421
20. വിഭ്രാൾബൃഹത്സുഭൃതം വാജസാതമം/
ധർമന്ദിവോ ധരുണേ സത്യമർപിതം/
അമിത്രഹാ വൃത്രഹാ ദസ്യുഹന്തമം/
ജ്യോതിർജജ്ഞേ അസുരഹാ സപത്നഹാ/ 1422
21. ഇദം ശ്രേഷ്ഠഞ്ജ്യോതിഷാം ജ്യോതിരുത്തമം/
വിശ്വജിദ്ധനജിദുച്യതേ ബൃഹത്/
വിശ്വഭ്രാൾ ഭ്രാജോ മഹി സൂര്യോ ദൃശേ/
ഉരു പപ്രഥേ സഹ ഓജോ അച്യുതം/ 1423
22. ബൾമഹം അസി സൂര്യ/ ബളാദിത്യമഹം അസി/

മഹസ്തേ സതോ മഹിമാ പനിഷ്ടമ/
മഹ്നാ ദേവമഹം അസി/ 1424

23. ബൾസൂര്യ ശ്രവസാ മഹം അസി/
സത്രാദേവമഹം അസി/
മഹ്നാ ദേവാനാമസൂര്യഃ പുരോഹിതഃ/
വിഭുജ്യോതിരദാഭ്യം/ 1425

24. ഉപ ത്വാ ജാമയോ ഗിരഃ/ ദേദിശതീർഹവിഷ്കൃതഃ/
വായോരനീകേ അസ്ഥിരൻ/ 1426

25. യേ തേ സരസ്വന്നൂർമയഃ/ മധുമന്തോ ഘൃതശ്ചുതഃ/
തേഭിർനോവിതാ ഭവ/ 1427

26. ഉത നഃപ്രിയാ പ്രിയാസു/ സപ്ത സ്വസാ സുജൂഷ്ടാ/
സരസ്വതീസ്തോമ്യാഭൂത്/ 1428

27. സോമാനം സ്വരണം/ കൃണുഹി ബ്രഹ്മണസ്പതേ/
കക്ഷീവന്തയ്യ ഔശിജഃ/ 1429

28. തത്സവിതുർവരേണ്യം/ ഭർഗോ ദേവസ്യ ധീമഹി/
ധിയോ യോ നഃ പ്രചോദയാത്/ 1430

29. അഗ്ന ആയൂംഷി പവസേ/ ആ സുവോർജമിഷഞ്ചനഃ/
ആ രേ ബാധസ്വ ദുച്ഛുനാം/ 1431

30. അഗ്നേ പവസ്വ സ്വപാഃ/ അസ്മേ വർചസ്സുവീര്യം/
ദധത്പോഷം രയിം മയി/ 1432

31. അഗ്നിരൃഷിഃ പവമാനഃ/ പാഞ്ചജന്യഃ പുരോഹിതഃ/
തമീമഹേ മഹാ ഗയം/ 1433

32. അയം സോമ ഇന്ദ്ര തുഭ്യം സുന്വേ/
തുഭ്യം പവതേ ത്വമസ്യ പാഹി/
ത്വം ഹയഞ്ചകൃഷേ ത്വം വവൃഷേ/
ഇന്ദും മദായ യുജ്യായ സോമം/ 1434

33. സ ഈം രഥോന ഭുരിഷാളയോജി/
മഹഃപുരൂണി സാതയേ വസൂനി/
ആദീം വിശ്വാ നഹുഷ്യാണി ജാതാ/
സ്വർഷാതാ വന ഊർധ്വാ നവന്ത/ 1435

34. ശുഷ്മീ ശർധോ ന മാരുതം പവസ്വ/
അനഭിശസ്താ ദിവ്യാ യഥാ വിൾ/
ആപോ ന മക്ഷൂ സുമതിർഭവാനഃ/
സഹസ്രാപ്സാഃ പൃതനാഷാൾ ന യജ്ഞഃ/ 1436

35. ത്വമഗ്നേ യജ്ഞാനാം ഹോതാ/ വിശ്വേഷാം ഹിതഃ/
ദേവേഭിർമാനുഷേ ജനേ/ 1437

36. സ നോ മന്ദ്രാഭിരധ്വരേ/ ജിഹ്വാഭിര്യജാമഹഃ/
ആ ദേവാൻ വക്ഷി യക്ഷി ച/ 1438

37. വേത്ഥാ ഹി വേധോ അധ്വനഃ/ പഥശ്ച ദേവാഞ്ജസാ/
അഗ്നേ യജ്ഞേഷു സുക്രതോ/ 1439
38. തമീം ഹിന്വന്ത്യഗ്രുവഃ/ ധമന്തി ബാകുരന്ദൃതിം/
ത്രിധാതു സാരഘ്നം മധു/ 1440
39. അഭീമമഘ്ന്യാ ഉത/ ശ്രീണന്തി ധേനവശ്ശിശും/
സോമമിന്ദ്രായ പാതവേ/ 1441
40. അസ്യേദിന്ദ്രോ മദേഷ്വാ/ വിശ്വാ വൃത്രാണി ജിഘ്നതേ/
ശൂരോ മഘ്വാ ച മംഹതേ/ 1442
41. സസ്തോമ്യസ്സഹവ്യഃ/ സത്യസ്സത്വാ തുവികൂർമിഃ/
ഏകശ്ചിത്സന്നഭിഭൂതിഃ/ 1443
42. തമർകേഭിസ്തം സാമഭിഃ/ തം ഗായത്രൈശ്ചർഷണയഃ/
ഇന്ദ്രം വർധന്തി ക്ഷിതയഃ/ 1444
43. പ്രണേതാരം വസ്യോ അച്ഛ/ കർതാരഞ്ജ്യോതിസ്സമത്സു/
സാസഹ്വാം സയ്യുധാ മിത്രാൻ/ 1445
44. സ നഃ പപ്രിഃ പാരയാതി/ സ്വസ്തിനാ വാ പുരുഹൂതഃ/
ഇന്ദ്രോ വിശ്വാ അതിദ്വിഷഃ/ 1446
45. തദിദാസ ഭുവനേഷു ജ്യേഷ്ഠം/
യതോ ജജ്ഞ ഉഗ്രസ്ത്വേഷ നൃമ്ണഃ/
സദ്യോ ജജ്ഞാനോ നിരിണാതി ശത്രൂൻ/
അനു യം വിശ്വേ മദന്ത്യൂമാഃ/ 1447
46. വാവൃധാനശ്ശവസാ ഭൂര്യോജാഃ/
ശത്രുർദാസായ ഭിയസന്ദധാതി/
അവ്യനച്ചവ്യനച്ച സസ്നി/
സന്തേനവന്ത പ്രഭൃതാ മദേഷു/ 1448
47. ത്വേ ക്രതുമപി വൃഞ്ജന്തി വിശ്വേ/
ദ്വിര്യദേതേ ത്രിർഭവന്ത്യൂമാഃ/
സ്വാദോ സ്വാദീയ സ്വാദുനാ സൃജാസം/
അദസ്സുമധു മധുനാഭിയോധീഃ/ 1449

൧൦൮

൧. अया रुचा हरिण्या पुनानः। विश्वा द्वेषांसि तरति सयुग्वभिः।
सूरो न स युग्वभिः। धारा पृष्ठस्य रेचते। पुनानो अरुषो हरिः।
विश्वा यद्रूपा परियास्यृक्वभिः। सप्तास्येभिरृक्वभिः।। १४०३
൨. प्राचीमनुप्रदिशय्याति चेकितत्। संरश्मिभिर्यतते दर्शतो रथः।
दैव्यो दर्शतो रथः। अग्मन्नुक्थानि पौंस्या। इन्द्रञ्जैत्राय हर्षयन्
वज्रश्च यत् भवथो अनपच्युता। समत्स्वनपच्युता।। १४०४

३. त्वन्त्यत् पणीनां विदो वसु। सम्मातृभिर्मर्जयसि स्व आ दमे।
ऋतस्य धीतिभिर्दमे। परावतो न साम तत्। यत्रारणन्ति धीतयः।
त्रिधातुभिररुषीभिर्वयो दधे। रोचमानो वयो दधे।। १४०५

४. प्रोष्वस्मै पुरो रथम्। इन्द्राय शूषमर्चत। अभिके चिदुलोककृत्।
सङ्गे समत्सु वृत्रहा। अस्माकं बोधि चोदिता।
नभन्तामन्यकेषाम्। ज्याका अधि धन्वसु।। १४०६

५. त्वं सिन्धुं रवासृजः। अधरा चो अहन्नहिम्। अशत्रुरिन्द्र जज्ञिषे।
विश्वं पुष्यसि वार्यम्। तन्त्वा परिष्वजामहे।
नभन्तामन्यकेषाम्। ज्याका अधि धन्वसु।। १४०७

६. विषु विश्वा अरातयः। अर्यो न शन्तनोधियः। अस्तासि शत्रवे वधम्।
यो न इन्द्र जिघांसति। याते रातिर्ददिर्वसु।
नभन्तामन्यकेषाम्। ज्याका अधि धन्वसु।। १४०८

७. प्र वो वाजा अभिद्यवः। हविष्मन्तो घृताच्या। देवाञ्जिगाति सुम्नयुः।। १४०९

८. ईळे अग्निं विपश्चितम्। गिरा यज्ञस्य साधनम्।
श्रुष्टीवानन्धीतावानम्।। १४१०

९. अग्ने शकेम ते वयम्। यमन्देवस्य वाजिनः। अतिद्वेषांसि तरेम।। १४११

१०. उदुत्यञ्जातवेदसम्। देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।। १४१२

११. तरणिर्विश्वदर्शतः। ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनम्।। १४१३

१२. प्रत्यङ् देवानां विशः। प्रत्यङुदेषि मानुषीः। प्रत्यङ्विश्वं स्वर्दृशे।। १४१४

१३. उत्घेदभिश्रुतामघम्। वृषभन्नरियापसम्। अस्तारमेषि सूर्य।। १४१५

१४. नवयो नवतिं पुरः। बिभेद बाह्वोजसा। अहिञ्च वृत्रहावधीत्।। १४१६

१५. स न इन्द्रश्शिवस्सखा। अश्वावत्गोमद्यवमत्। उरु धारेव दोहते।। १४१७

१६. इन्द्राग्नी रोचनादिवः। परि वाजेषु भूषथः। तद्वाञ्चेति प्रवीर्यम्।। १४१८

१७. इन्द्राग्नी तविषाणि वाम्। सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितम्।। १४१९

१८. इन्द्राग्नी अपसस्परि। उपप्रयन्ति धीतयः। ऋतस्य पथ्या अनु।। १४२०

१९. विभ्राळ् बृहत्पिबतु सोम्यं मधु। आयुर्दधद्यज्ञपतावविहुतम्।
वात जूतो यो अभिरक्षति त्मना। प्रजाःपिपर्ति बहुधा विराजति।। १४२१

२०. विभ्राळ्बृहत्सुभृतं वाजसातमम्। धर्मन्दिवो धरुणे सत्यमर्पितम्।
अमित्रहा वृत्रहा दस्युहन्तमम्। ज्योतिर्जज्ञे असुरहा सपत्नहा।। १४२२

२१. इदं श्रेष्ठञ्ज्योतिषां ज्योतिरुत्तमम्। विश्वजिद्धनजिदुच्यते बृहत्।

विश्वभ्राळ्भ्राजो महि सूर्यो दृशे। उरु पप्रथे सह ओजो अच्युतम्।। १४२३

२२. बळ्महम् असि सूर्य। बळादित्यमहम् असि।
महस्ते सतो महिमा पनिष्टम। महना देवमहम् असि।। १४२४

२३. बळ्सूर्य श्रवसा महम् असि। सत्रादेवमहम् असि।
महना देवानामसूर्यःपुरोहितः। विभुज्योतिरदाभ्यम्।। १४२५

२४. उपत्वा जामयो गिरः। देदिशतीर्हविष्कृतः। वायोरनीके अस्थिरन्।। १४२६

२५. ये ते सरस्वन्नूर्मयः। मधुमन्तो घृतश्चुतः। तेभिर्नोविता भव।। १४२७

२६. उत नःप्रिया प्रियासु। सप्त स्वसा सुजुष्टा। सरस्वतीस्तोम्याभूत्।। १४२८

२७. सोमानां स्वरणम्। कृणूहि ब्रह्मणस्पते। कक्षीवन्तय्य औशिजः।। १४२९

२८. तत्सवितुर्वरेण्यम्। भर्गो देवस्य धीमहि। धियो यो नःप्रचोदयात्।। १४३०

२९. अग्न आयूंषि पवसे। आ सुवोर्जमिषञ्चनः। आ रे बाधस्व दुच्छुनाम्।। १४३१

३०. अग्ने पवस्व स्वपाः। अस्मे वर्चस्सुवीर्यम्। दधत्पोषं रयिं मयि।। १४३२

३१. अग्निरृषिः पवमानः। पाञ्चजन्यः पुरोहितः। तमीमहे महा गयम्।। १४३३

३२. अयं सोम इन्द्र तुभ्यं सुन्वे। तुभ्यं पवते त्वमस्य पाहि।
त्वं हयञ्चकृषे त्वं ववृषे। इन्दुं मदाय युज्याय सोमम्।। १४३४

३३. स ईं रथोन भुरिषाळयोजि। महःपुरूणि सातये वसूनि।
आदीं विश्वा नहुष्याणि जाता। स्वर्षाता वन ऊर्ध्वा नवन्त।। १४३५

३४. शुष्मी शर्धो न मारुतं पवस्व। अनभिशस्ता दिव्या यथा विळ्।
आपो न मक्षू सुमतिर्भवानः। सहस्राप्साः पृतनाषाळ् न यज्ञः।। १४३६

३५. त्वमग्ने यज्ञानां होता। विश्वेषां हितः। देवेभिर्मानुषे जने।। १४३७

३६. स नो मन्द्राभिरध्वरे। जिह्वाभिर्यजामहः। आ देवान् वक्षि यक्षि च।।१४३८

३७. वेत्था हि वेधो अध्वनः। पथश्च देवाञ्जसा। अग्ने यज्ञेषु सुक्रतो।। १४३९

३८. तमां हिन्वन्त्यग्रवः। धमन्ति बाकुरन्दृतिम्। त्रिधातु सारघं मधु।। १४४०

३९. अभीममघ्न्या उत। श्रीणन्ति धेनवश्शिशुम्। सोममिन्द्राय पातवे।। १४४१

४०. अस्येदिन्द्रो मदेष्वा। विश्वा वृत्राणि जिघ्नते। शूरो मघा च मंहते।। १४४२

४१. सस्तोम्यस्सहव्यः। सत्यस्सत्वा तुविकूर्मिः। एकश्चित्सन्नभिभूतिः।। १४४३

४२. तमर्केभिस्तं सामभिः। तं गायत्रैश्चर्षणयः। इन्द्रं वर्धन्ति क्षितयः।। १४४४

४३. प्रणेतारं वस्यो अच्छ। कर्तारञ्ज्योतिस्समत्सु।
सासह्वां सय्युधा मित्रान्।। १४४५

४४. स नःपप्रिःपारयाति। स्वस्तिना वा पुरुहूतः। इन्द्रो विश्वा अतिद्विषः।। १४४६

४५. तदिदास भुवनेषु ज्येष्ठम्। यतो जज्ञ उग्रस्त्वेष नृम्णः।
सद्यो जज्ञानो निरिणाति शत्रून्। अनु यं विश्वे मदन्त्यूमाः।। १४४७
४६. वावृधानश्शवसा भूर्योजाः। शत्रुर्दासाय भियसन्दधाति।
अव्यनच्चव्यनच्च सस्नि सन्ते। नवन्त प्रभृता मदेषु।। १४४८
४७. त्वे क्रतुमपि वृञ्जन्ति विश्वे। द्विर्यदेते त्रिर्भवन्त्यूमाः।
स्वादो स्वादीय स्वादुना सृजासम्। अदस्सुमधु मधुनाभियोधीः।। १४४९

109

1. പ്രയോ രിരിക്ഷ ഓജസാ/ ദിവസ്സദോഭ്യസ്പരി/
ന ത്വാ വിവ്യാച രജ ഇന്ദ്ര പാർഥിവം/
അതി വിശ്വം വവക്ഷിഥ/ 1450
2. നകിഃപരിഷ്ടിർമ്മഘവന്മഘസ്യ തേ/
യദ്ദാശൂഷേ ദശസ്യസി/
അസ്മാകം ബോധ്യുചഥസ്യ ചോദിതാ/
മംഹിഷ്ഠോ വാജസാതയേ/ 1451
3. ശിശാനോ വൃഷഭോ യഥാ/ അഗ്നിഃ ശൃങ്ഗേദവിധ്വത്/
തിഗ്മാ അസ്യ ഹനവോ ന പ്രതിധൃഷേ/
സുജംഭസ്സഹസോ യഹുഃ/ 1452
4. ന ഹി തേ അഗ്നേ വൃഷഭ പ്രതിധൃഷേ/
ജംഭാസോ യദ്വിതിഷ്ഠസേ/
സത്വന്നോ ഹോതസ്സുഹുതം ഹവിഷ്കൃധി/
വംസ്വാ നോ വാര്യാ പുരു/ 1453
5. ഉപത്വാ ജാമയോ ഗിരഃ/ ദേദിശതീർഹവിഷ്കൃതഃ/
വായോരനീകേ അസ്ഥിരൻ/ 1454
6. യസ്യ ത്രിധാത്വവൃതം/ ബർഹിസ്തസ്ഥാവസന്ദിന/
ആപശ്ചിന്നിദധാ പദം/ 1455
7. പദന്നേവസ്യ മീഢുഷഃ/ അനാദൃഷ്ടാഭിരൂതിഭിഃ/
ഭദ്രാ സൂര്യ ഇവോപദൃക്/ 1456
8. അഗ്നിസ്തിഗ്മേന ശോചിഷാ/ യം സദ്വിശ്വന്യാത്രിണം/
അഗ്നിർനോ വംസതേ രയിം/ 1457
9. സുവീരം രയിമാഭര/ ജാതവേദോ വിചർഷണേ/
ജഹി രക്ഷാംസി സുക്രതോ/ 1458
10. ത്വന്നഃ പാഹ്യംഹസഃ/ ജാതവേദോ അഘായതഃ/
രക്ഷാണോ ബ്രഹ്മണസ്കവേ/ 1459
11. ഉത്തേ ശുഷ്മാസോ അസ്ഥുഃ/ രക്ഷോ ഭിന്ദന്തോ അദ്രിവഃ/
നുദസ്വ യാഃപരിസ്പൃധഃ/ 1460

12. അയാ നിജഘ്നിരോജസാ/ രഥസങ്ഗേ ധനേ ഹിതേ/
സ്തവാ അബിഭ്യുഷാ ഹൃദാ/ 1461
13. അസ്യ വ്രതാനി നാധൃഷേ/ പവമാനസ്യ ദൂഡ്യാ/
രുജയസ്ത്വാ പൃതന്യതി/ 1462
14. തം ഹിന്വന്തി മദച്യുതം/ ഹരിന്നദീഷു വാജിനം/
ഇന്ദുമിന്ദ്രായ മത്സരം/ 1463
15. പ്ര തേ ധാരാ അസശ്ചതഃ/ ദിവോ നയന്തി വൃഷ്ടയഃ/
അച്ഛാ വാജം സഹസ്രിണം/ 1464
16. അഭി പ്രിയാണി കാവ്യാ/ വിശ്വാ ചക്ഷാണോ അർഷതി/
ഹരിസ്തുഞ്ജാന ആയുധാ/ 1465
17. സ മർമൃജാന ആയുഭിഃ/ ഇഭോ രാജേവ സുവ്രതഃ/
ശ്യേനോ ന വംസു ഷീദതി/ 1466
18. സ നോ വിശ്വാ ദിവോ വസു/ ഉതോ പൃഥിവ്യാ അധ/
പുനാന ഇന്ദവാഭര/ 1467
19. ഉ ത്യാ മന്ദന്തു സോമാഃ/ കൃണുഷ്വ രാധോ അദ്രിവഃ/
അവ ബ്രഹ്മ ദ്വിഷോ ജഹി/ 1468
20. പദാ പണീം രരാധസഃ/ നിബാധസ്വ മഹം അസ/
നഹിത്വാ കശ്ചനപ്രതി/ 1469
21. ത്വമീശിഷേ സുതാനാം/ ഇന്ദ്ര ത്വമസുതാനാം/
ത്വം രാജാ ജനാനാം/ 1470
22. സമസ്യ മന്യവേ വിശഃ/ വിശ്വേ നമന്തകൃഷ്ടയഃ/
സമുദ്രായേവ സിന്ധവഃ/ 1471
23. വിചിദ്വൃത്രസ്യ ദോധതഃ/ വജ്രേണ ശതപർവണാ/
ശിരോ ബിഭേദ വൃഷ്ണിനാ/ 1472
24. ഓജസ്തദസ്യ തിത്വിഷേ/ ഉഭേ യത്സമവർതയത്/
ഇന്ദ്രശ്ചർമേവ രോദസീ/ 1473
25. നിത്യാമഗ്നേ മനുർദധേ/ ജ്യോതിർജനായ ശശ്വതേ/
ദീദേഥ കണ്വ ഋത ജാത ഉക്ഷിതഃ/ യന്നമസ്യന്തി കൃഷ്ടയഃ/ 1474
26. ത്വേഷാസോ അഗ്നേ രമവന്തോ അർചയഃ/
ഭീമാസോ ന പ്രതീതയേ/
രക്ഷസ്വിനസ്സദമിദ്യാതുമാവതഃ/
വിശ്വം സമത്രിണന്ദഹ/ 1475
27. യദദ്യകച്ച വൃത്രഹൻ/ ഉദഗാ അഭി സൂര്യ/
സർവന്തദിന്ദ്ര തേ വശേ/ 1476
28. യദ്യാ പ്രവൃദ്ധ സത്പതേ/ ന മരാ ഇതി മന്യസേ/
ഉതോ തത്സത്യമിത്തവ/ 1477
29. യേ സോമാസഃ പരാവതി/ യേ അർവാവതി സുന്വിരേ/
സർവം സ്തം ഇന്ദ്ര ഗച്ഛസി/ 1478

30. ഇദം വിഷ്ണുർവിചക്രമേ/ ത്രേധാ നിദധേ പദം/
സമൂഢമസ്യ പാംസുലേ/ 1479
31. ത്രീണി പദാ വിചക്രമേ/ വിഷ്ണുർഗോപാ അദാഭ്യഃ/
അതോ ധർമാണി ധാരയൻ/ 1480
32. വിഷ്ണോഃ കർമാണി പശ്യത/ യതോ വ്രതാനി പസ്പശേ/
ഇന്ദ്രസ്യ യുജ്യസ്സഖാ/ 1481
33. തദ്വിഷ്ണോഃ പരമം പദം/ സദാ പശ്യന്തി സൂരയഃ/
ദിദീവ ചക്ഷുരാതതം/ 1482
34. ജരാ ബോധ തദ്വിവിഡ്ഢി/ വിശേ വിശേ യജ്ഞിയായ/
സ്തോമം രുദ്രായ ദൃശീകം/ 1483
35. സനോ മഹം അനിമാനഃ/ ധൂമകേതുഃ പുരുശ്ചന്ദ്രഃ/
ധിയേ വാജായ ഹിന്വതി/ 1484
36. സരേവം ഇവ വിശ്പതിഃ/ ദൈവ്യഃ കേതുഃ ശൃണോതു നഃ/
ഉക്ഥൈരഗ്നിർബൃഹദ്ഭാനുഃ/ 1485
37. തദ്വോ ഗായ സുതേ സചാ/ പുരുഹൂതായ സത്വനേ/
ശയ്യദ്ഗവേന ശാകിനേ/ 1486
38. ന ഘാവസുർനിയമതേ/ ദാനം വാജസ്യ ഗോമതഃ/
യത്സീമുപശ്രവദ്ഗിരഃ/ 1487
39. കുവിത്സസ്യ പ്ര ഹി വ്രജം/ ഗോമന്തന്ദസ്യുഹാഗമത്/
ശചീഭിരുപ നോ വരത്/ 1488
40. യത്സോമമിന്ദ്ര വിഷ്ണവേ/ യദ്വാഘത്രിത ആപ്ത്യേ/
യദ്വാ മരുത്സു മന്ദസേ സമിന്ദുഭിഃ/ 1489
41. യദ്വാ ശക്ര പരാവതി/ സമുദ്രേ അധിമന്ദസേ/
അസ്മാകമിത്സുതേ രണാസമിന്ദുഭിഃ/ 1490
42. യദ്വാസീ സുന്വതോ വൃധഃ/ യജമാനസ്യ സത്പതേ/
ഉക്ഥേ വായസ്യ രണ്യസി സമിന്ദുഭിഃ/ 1491
43. ന ഹി തേ അഗ്നേ തന്വൈ/ ക്രൂരം വിവേദ മർത്യഃ/
കപിർബഭസ്തി തേജനം പുനർജരായു ഗൗരിവ/ 1492
44. ത്വേഷ ഇവേത്സഞ്ചവിചേവ ഷ്ണസി/
യദുത്തരദ്രാ ഉ പരേഷു ഖാദസി/
ശീർഷ്ണാ ശിരോ വക്ഷസാ വക്ഷോ അർദയൻ/
അംശും ബിഭർഷി ഹരിതേഭിരാസഭിഃ/ 1493
45. കോ യഥ കോദസി/ പുരുത്രാ ചിദ്ധിതേമനഃ/
അലർഷി യുധ്മ[7] ഖജകൃത്പുരന്ദര/
പ്ര ഗായത്രാ അഗാസിഷുഃ/ 1494
46. പ്രാസ്മൈ ഗായത്രമർചത/ വാവാതുര്യഃപുരന്ദരഃ/
യാഭിഃ കാണ്വസ്യോപ ബർഹിരാസദം/
യാസദ്വജ്രീഭിനത്പുരഃ/ 1495

47. യേ തേ സന്തി ദശഗ്വിനഃ/
ശതിനോ യേ സഹസ്രിണഃ/
അശ്വാസോ യേ തേ വൃഷണോ രഘുദ്രുവഃ/
തേഭിർനസ്തൂയമാഗഹി/ 1496
48. ഗൗർധയതി മരുതാം/ ശ്രവസ്യുർമാതാ മഘോനാം/
യുക്താ വഹനീ രഥാനാം/ 1497
49. യസ്യാ ദേവാ ഉപസ്ഥേ/ വ്രതാ വിശ്വേ ധാരയന്തേ/
സൂര്യാമാസാ ദൃശേകം/ 1498
50. തത്സു നോ വിശ്വേ അര്യ ആ/ സദാ ഗൃണന്തി കാരവഃ/
മരുതസ്സോമപീതയേ/ 1499
51. സത്രാഹണന്ദാധൃഷിന്തുമ്രമിന്ദ്രം/
മഹാമപാരം വൃഷഭം സുവജ്രം/
ഹന്താ യോ വൃത്രം സനിതോത വാജം/
ദാതാ മഘാനി മഘവാ സുരാധാഃ/ 1500
52. അയം വൃതശ്ചാതയതേ സമീചീഃ/
യ ആദിഷു മഘവാ ശ്രുണ്വ ഏകഃ/
അയം വാജം ഭരതി യം സനോതി/
അസ്യ പ്രിയാസസ്സഖ്യേ സ്യാമ/ 1501
53. അയം ശ്രുണ്വേ അധജയന്നുതഘ്നൻ/
അയമുത പ്രകൃണുതേ യുധാഗാഃ/
യദാ സത്യങ്കൃണുതേ മന്യുമിന്ദ്രഃ/
വിശ്വന്ദൃഢം ഭയത ഏജദസ്മാത്/ 1502
54. വിശ്വേത്താ വിഷ്ണുരാഭരത്/ ഉരുക്രമസ്ത്വേഷിതഃ/
ശതം മഹിഷാൻ ക്ഷീരപാകമോദനം/
വരാഹമിന്ദ്ര ഏമുഷം/ 1503
55. സുവിക്ഷന്തേ സുകൃതം സൂമയന്ധനുഃ/
സാധുർബുന്തോ ഹിരണ്യയഃ/
ഉഭാ തേ ബാഹൂരണ്യാ സുസംസ്കൃതാ/
ഋദൂപേ ചിദൃദൂവൃധാ/ 1504
56. യോ വിശ്വാ ദയതേ വസു/
ഹോതാ മന്ദ്രോ ജനാനാം/
മധോർനപാത്രാ പ്രഥമാന്യസ്മൈ/
പ്രസ്തോമായന്ത്യഗ്നയേ/ 1505
57. അശ്വന്നഗ്നീർഭിരഥ്യം സുദാനവഃ/
മർമൃജ്യന്തേ ദേവയവഃ/
ഉഭേ തോകേ തനയേദസ്മ വിശ്പതേ/
പർഷി രാധോ മഘോനാം/ 1506

58. അഗ്നേ വിവസ്വദുഷസഃ/ ചിത്രം രാധോ അമർത്യം/
ആ ദാശുഷേ ജാതവേദോ വഹാ ത്വം/
അദ്യാ ദേവം ഉഷർബുധഃ/ 1507
59. ജുഷ്ടോ ഹി ദൂതോ/ അസി ഹവ്യവാഹനഃ/
അഗ്നേ രഥീരധ്വരാണാം/
സജൂരശ്വിഭ്യാമുഷസാ സുവീര്യം/
അസ്മേ ധേഹി ശ്രവോ ബൃഹത്/ 1508
60. ഇമമൂഷുത്വമസ്മാകം/ സനിങ്ഗായത്രന്നവ്യാംസം/
അഗ്നേ ദേവേഷു പ്രവോചഃ/ 1509
61. ആ നോ ഭജ പരമേഷു/ ആ വാജേഷു മധ്യമേഷു/
ശിക്ഷാ വസ്വോ അന്തമസ്യ/ 1510
62. വിഭക്താസി ചിത്രഭാനോ/ സിന്ധോരൂർമാ ഉപാക ആ/
സദ്യോ ദാശുഷേ ക്ഷരസി/ 1511
63. അഹമിദ്ധി പിതുഃ പരി/ മേധാമൃതസ്യ ജഗ്രഹ/
അഹം സൂര്യ ഇവാജനി/ 1512
64. അഹം പ്രത്നേന മന്മനാ/ഗിരശ്ശുംഭാമി കണ്വവത്/
യേനേന്ദ്രശ്ശുഷ്മമിദ്ദധേ/ 1513
65. യേ ത്വാമിന്ദ്ര ന തുഷ്ടുവുഃ/ ഋഷയോ യേ ച തുഷ്ടുവുഃ/
മമേദ്വർധസ്വ സുഷ്ടുതഃ/ 1514

१०९

१. प्र यो रिरिक्ष ओजसा दिवस्सदोभ्यस्परि।
न त्वा विव्याच रज इन्द्र पार्थिवम्। अति विश्वं ववक्षिथ।। १४५०
२. नकिःपरिष्टिर्म्मघवन्मघस्य ते। यद्दाशुषे दशस्यसि।
अस्माकं बोध्युचथस्य चोदिता। मंहिष्ठो वाजसातये।। १४५१
३. शिशानो वृषभो यथा। अग्नि शृङ्गेदविध्वत्।
तिग्मा अस्य हनवो न प्रतिधृषे। सुजंभरस्सहसो यहुः।। १४५२
४. न हि ते अग्ने वृषभ प्रतिधृषे। जंभासो यद्वितिष्ठसे।
सतत्वन्नो होतस्सुहुतं हविष्कृधि। वंस्वा नो वार्या पुरु।। १४५३
५. उपत्वा जामयो गिरः। देदिशतीर्हविष्कृतः। वायोरनीके अस्थिरन्।। १४५४
६. यस्य त्रिधात्ववृतम्। बर्हिस्तरस्थावसन्दिनम्। आपश्चिन्निदधा पदम्।। १४५५
७. पदन्देवस्य मीढुषः। अनादृष्टाभिरूतिभिः। भद्रा सूर्य इवोपदृक्।। १४५६
८. अग्निस्तिग्मेन शोचिषा। यं सद्विश्वन्यात्रिणम्। अग्निर्नो वंसते रयिम्।। १४५७
९. सुवीरं रयिमाभर। जातवेदो विचर्षणे। जहि रक्षांसि सुक्रतो।। १४५८

१०.त्वन्नःपाह्यंहसः। जातवेदो अघायतः। रक्षाणो ब्रह्मणस्कवे।। १४५९
११.उत्ते शुष्मासो अस्थुः। रक्षो भिन्दन्तो अद्रिवः। नुदस्व याःपरिस्पृधः।। १४६०
१२.अया निजघ्निरोजसा। रथसङ्गे धने हिते। स्तवा अबिभ्युषा हृदा।। १४६१
१३.अस्य व्रतानि नाधृषे। पवमानस्य दूढ्या। रुजयस्त्वा पृतन्यति।। १४६२
१४.तं हिन्वन्ति मदच्युतम्। हरिन्नदीषु वाजिनम्। इन्दुमिन्द्राय मत्सरम्।। १४६३
१५.प्र ते धारा असश्चतः। दिवो नयन्ति वृष्टयः। अच्छा वाजं सहस्रिणम्।। १४६४
१६.अभि प्रियाणि काव्या। विश्वा चक्षाणो अर्षति। हरिस्तुञ्जान आयुधा।। १४६५
१७.स मर्मृजान आयुभिः। इभो राजेव सुव्रतः। श्येनो न वंसु षीदति।। १४६६
१८.स नो विश्वा दिवो वसु। उतो पृथिव्या अधि। पुनान इन्दवाभर।। १४६७
१९.उ त्वा मन्दन्तु सोमाः। कृणुष्व राधो अद्रिवः। अव ब्रह्म द्विषो जहि।। १४६८
२०.पदा पणीं रराधसः। निबाधस्व महम् असि। नहित्वा कश्चनप्रति।। १४६९
२१.त्वमीशिषे सुतानाम्। इन्द्र त्वमसुतानाम्। त्वं राजा जनानाम्।। १४७०
२२.समस्य मन्यवे विशः। विश्वे नमन्तकृष्टयः। समुद्रायेव सिन्धवः।। १४७१
२३.विचिद्वृत्रस्य दोधतः। वज्रेण शतपर्वणा। शिरो बिभेद वृष्णिना।। १४७२
२४.ओजस्तदस्य तित्विषे। उभे यत्समवर्तयत्। इन्द्रश्चर्मेव रोदसी।। १४७३
२५.नित्वामग्ने मनुर्दधे। ज्योतिर्जनाय शश्वते।
दीदेथ कण्व ऋत जात उक्षितः। यन्नमस्यन्ति कृष्टयः।। १४७४
२६.त्वेषासो अग्ने रमवन्तो अर्चयः। भीमासो न प्रतीतये।
रक्षस्विनस्सदमिद्यातुमावतः। विश्वं समत्रिणन्दह।। १४७५
२७.यदद्यकच्च वृत्रहन्। उदगा अभि सूर्य। सर्वन्तदिन्द्र ते वश। १४७६
२८.यद्वा प्रवृद्ध सत्पते। न मरा इति मन्यसे। उतो तत्सत्यमित्तव।। १४७७
२९.ये सोमासःपरावति। ये अर्वावति सुन्विरे। सर्वं स्तम् इन्द्र गच्छसि।। १४७८
३०.इदं विष्णुर्विचक्रमे। त्रेधा निदधे पदम्। समूढमस्य पांसुले।। १४७९
३१.त्रीणि पदा विचक्रमे। विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्।। १४८०
३२.विष्णोः कर्माणि पश्यत। यतो व्रतानि पस्पशे। इन्द्रस्य युज्यस्सखा।। १४८१
३३.तद्विष्णोःपरमं पदम्। सदा पश्यन्ति सूरयः। दिदीव चक्षुराततम्।। १४८२
३४. जरा बोध तद्विविढ्ढि। विशे विशे यज्ञियाय। स्तोमं रुद्राय दृशीकम्।। १४८३
३५.सनो महम् अनिमानः। धूमकेतुःपुरुश्चन्द्रः। धिये वाजाय हिन्वति।। १४८४
३६.सरेवम् इव विश्पतिः। दैव्यः केतुः शृणोतु नः। उक्थैरग्निर्बृहत्भानुः।। १४८५
३७.तद्वो गाय सुते सचा। पुरुहूताय सत्वने। शय्यत्गवे न शाकिने।। १४८६

३८.न घावसुर्नियमते। दानं वाजस्य गोमतः। यत्सीमुपश्रवत्गिरः।। १४८७
३९. कुवित्सस्य प्र हि व्रजम्। गोमन्तन्दस्युहागमत्। शचीभिरुप नो वरत्।। १४८८
४०. यत्सोममिन्द्र विष्णवे। यद्वाघत्रित आप्त्ये।
यद्वा मरुत् सुमन्दसे समिन्दुभिः।। १४८९
४१. यद्वा शक्र परावति। समुद्रे अधिमन्दसे।
अस्माकमित् सुते रणा समिन्दुभिः।। १४९०
४२. यद्वासि सुन्वतो वृधः। यजमानस्य सत्पते।
उक्थे वायस्य रण्यसि समिन्दुभिः।। १४९१
४३. न हि ते अग्ने तन्वै। क्रूरं विवेद मर्त्यः।
कपिर्बाभस्ति ते जनम्। पुनर्जरायु गौरिव।। १४९२
४४. त्वेष इवेत्सञ्चविचेव ऋण्वसि। यदुत्तरद्रा उ परेषु ख्वादसि।
शीर्ष्णा शिरो वक्षसा वक्षो अर्दयन्। अंशुं बिभर्षि हरितेभिरासभिः।। १४९३
४५. क्वे यथ क्वेदसि। पुरुत्रा चिद्धितेमनः।
अलर्षि युध्म खजकृत्पुरन्दर। प्र गायत्रा अगासिषुः।। १४९४
४६. प्रास्मै गायत्रमर्चत। वावतुर्यःपुरन्दरः।
याभिः काण्वस्योप बर्हिरासदम्। यासद्वज्रीभिनत्पुरः।। १४९५
४७. ये ते सन्ति दशग्विनः। शतिनो ये सहस्रिणः।
अश्वासो ये ते वृषणो रघुद्रुवः। तेभिर्नस्तूयमागहि।। १४९६
४८. गौर्धयति मरुताम्। श्रवस्युर्माता मघोनाम्। युक्ता वह्नी रथानाम्।। १४९७
४९. यस्या देवा उपस्थे। व्रता विश्वे धारयन्ते। सूर्यामासा दृशेकम्।। १४९८
५०. तत्सु नो विश्वे अर्य आ। सदा गृणन्ति कारवः। मरुतस्सोमपीतये।। १४९९
५१. सत्राहणन्दाधृषिन्तुम्रमिन्द्रम्। महामपारं वृषभं सवज्रम्।
हन्ता यो वृत्रं सनितोत वाजम्। दाता मघानि मघवा सुराधाः।। १५००
५२. अयं वृतश्चातयते समीचीः। य आदिषु मघवा शृण्व एकः।
अयं वाजं भरति यं सनोति। अस्य प्रियासस्सख्ये स्याम।। १५०१
५३. अयं शृण्वे अधजयन्नुतघ्नन्। अयमुत प्रकृणुते युधागाः।
यदा सत्यङ्कृणुते मन्युमिन्द्रः। विश्वन्दृढं भयत एजदस्मात्।। १५०२
५४. विश्वेत्ता विष्णुराभरत्। उरुक्रम स्त्वेषितः।
शतं महीषान् क्षीरपाकमोदनम्। वराहमिन्द्र एमुषम्।। १५०३

५५. सुविक्षन्ते सुकृतं सूमयन्धनुः। साधुर्बुन्दो हिरण्ययः।
उभा ते बाहूरण्या सुसंस्कृता। ऋदूचे चिदृदूवृधा।। १५०४
५६. यो विश्वा दयते वसु। होता मन्द्रो जनानाम्।
मधोर्नपात्रा प्रथमान्यस्मै। प्रस्तोमायन्त्वग्नये।। १५०५
५७. अश्वन्नगीर्भिरथ्यं सुदानवः। मर्मृज्यन्ते देवयवः।
उभे तोके तनयेदस्म विश्पते। परषि राधो मघोनाम्।। १५०६
५८. अग्ने विवस्वदुषसः। चित्रं राधो अमर्त्यम्।
आ दाशुषे जातवेदो वहा त्वम्। अद्या देवं उषर्बुधः।। १५०७
५९. जुष्टो हि दूतो असि हव्यवाहनः। अग्ने रथीरध्वराणाम्।
सजूरश्विभ्यामुषसा सुवीर्यम्। अस्मे धेहि श्रवो बृहत्।। १५०८
६०. इममूषुत्वमस्माकम्। सनिङ्गायत्रन्नव्यांसम्। अग्ने देवेषु प्रवोचः।। १५०९
६१. आ नो भज परमेषु। आ वाजेषु मध्यमेषु। शिक्षा वस्वो अन्तमस्य।। १५१०
६२. विभक्तासि चित्रभानो। सिन्धोरूर्मा उपाक आ। सद्यो दाशुषे क्षरसि।। १५११
६३. अहमिद्धि पितुःपरि। मेधामृतस्य जग्रह। अहं सूर्य इवाजनि।। १५१२
६४. अहं प्रत्नेन मन्मना। गिरश्शुंभामि कण्ववत्। येनेन्द्रश्शुष्ममिद्दधे।। १५१३
६५. ये त्वामिन्द्र न तुष्टुवुः। ऋषयो ये च तुष्टुवुः। ममेद्वर्धस्व सुष्टुतः।। १५१४

110

1. അഗ്ന ആയൂംഷി പവസേ/ ആസുവോർജമിഷഞ്ചനഃ/
ആരേ ബാധസ്വ ദുച്ഛുനാം/ 1515
2. അഗ്നേ പവസ്വ സ്വപാഃ/ അസ്മേ വർചസ്സുവീര്യം/
ദധത്പോഷം രയിമ്മയി/ 1516
3. അഗ്നിരൃഷിഃ പവമാനഃ/ പാഞ്ചജന്യഃ പുരോഹിതഃ/
തമീമഹേ മഹാ ഗയം/ 1517
4. അഗ്നേ പാവകരോചിഷാ/ മന്ദ്രയാ ദേവജിഹ്വയാ/
ആ ദേവാൻവക്ഷി യക്ഷി ച/ 1518
5. സനഃ പാവകദീദിവഃ/ അഗ്നേ ദേവം ഇഹാവഹ/
ഉപ യജ്ഞം ഹവിശ്ചനഃ/ 1519
6. യോ അഗ്നിന്ദേവവീതയേ/ ഹവിഷ്മാം ആ വിവാസതി/
തസ്മൈ പാവക മൃഡയ/ 1520
7. അഗ്നിശ്ശുചിവ്രതതമഃ/ ശുചിർവിപ്രശ്ശുചിഃ കവിഃ/
ശുചീ രോചത ആഹുതഃ/ 1521
8. ഉദഗ്നേ ശുചയസ്തവ/ ശുക്രാ ഭ്രാജന്ത ഈരതേ/
തവ ജ്യോതീംഷ്യർചയഃ/ 1522

9. ശുചിഃപാവക വന്ദ്യഃ/ അഗ്നേ ബൃഹദ്വിരോചസേ/
ത്വങ്ഘൃതേഭിരാഹുതഃ/ 1523
10. കസ്തേ ജാമിർജനാനാം/ അഗ്നേ കോ ദാശ്വധ്വരഃ/
കോ ഹ കസ്മിന്നസി ശ്രിതഃ/ 1524
11. ത്വഞ്ജാമിർജനാനാം/ അഗ്നേ മിത്രോ അസി പ്രിയഃ/
സഖാ സഖിഭ്യ ഈഡ്യഃ/ 1525
12. യജാനോ മിത്രാ വരുണാ/ യജാ ദേവം ഘൃതം ബൃഹത്/
അഗ്നേ യക്ഷി സ്വന്ദമം/ 1526
13. ഈളേന്യോ നമസ്യഃ/ തിരസ്തമാംസി ദർശതഃ/
സമഗ്നിരിധ്യതേ വൃഷാ/ 1527
14. വൃഷോ അഗ്നിസ്സമിധ്യതേ/ അശ്വോ ന ദേവവാഹനഃ/
തം ഹവിഷ്മന്ത ഈളതേ/ 1528
15. വൃഷണന്ത്വാ വയം വൃഷൻ/ വൃഷണസ്സമിധീമഹി/
അഗ്നേ ദീദ്യതം ബൃഹത്/ 1529
16. ഉത്തേ ബൃഹന്തോ അർചയഃ/ സമിധാനസ്യ ദീദിവഃ/
അഗ്നേ ശുക്രാസ ഈരതേ/ 1530
17. ഉപ ത്വാ ജുഹ്വോ മമ/ ഘൃതാചീര്യന്തു ഹര്യത/
അഗ്നേ ഹവ്യാ ജുഷസ്വ നഃ/ 1531
18. മന്ദ്രം ഹോതാരമൃത്വിജം/ ചിത്രഭാനും വിഭാവസും/
അഗ്നിമീളേ സ ഉശ്രവത്/ 1532
19. ഇനോ രാജന്നരതിസ്സമിദ്ധഃ/
രൗദ്രോ ദക്ഷായ സുഷുമം അദർശി/
ചികിദ്വിഭാതി ഭാസാ ബൃഹതാ/
അസിക്നീമേതി രുശതീമപാജൻ/ 1533
20. കൃഷ്ണായുദേനീമഭിവർപസാഭൂത്/
ജനയൻ യോഷാം ബൃഹതഃപിതുർജാം/
ഊർധ്വം ഭാനും സൂര്യസ്യ സ്തഭായൻ/
ദിവോ വസുഭിരരതിർവിഭാതി/ 1534
21. ഭദ്രോ ഭദ്രയാ സചമാന ആഗാത്/
സ്വസാരഞ്ജാരോ അഭ്യേതി പശ്ചാത്/
സുപ്രകേതൈർദ്യുഭിരഗ്നിർവിതിഷ്ഠൻ/
രുശദ്ഭിർവർണൈരഭിരാമമസ്ഥാത്/ 1535
22. പാഹി നോ അഗ്ന ഏകയാ/
പാഹ്യുത ദ്വിതീയയാ/
പാഹി ഗീർഭിസ്തിസൃഭിരൂർജാംപതേ/
പാഹി ചതസൃഭിർവസോ/ 1536
23. പാഹി വിശ്വസ്മാദ്രക്ഷസോ അരാവിണ്ണഃ/
പ്രസ്ന വാജേഷു നോവ/

ത്വാമിദ്ധി നേദിഷ്ഠന്തേവതാതയേ/
ആപിന്നക്ഷാമഹേ വ്യധേ/ 1537

24. കയാ തേ അഗ്നേ അങ്ഗിരഃ/ ഊർജ്ജോ നപാദുപസ്തുതിം/
വരായ ദേവമന്യവേ/ 1538

25. ദാശേമ കസ്യ മനസാ/ യജ്ഞസ്യ സഹസോ യഹോ/
കദുവോച ഇദന്നമഃ/ 1539

26. അധാ ത്വം ഹി നസ്കരഃ/ വിശ്വാ അസ്മഭ്യം സുക്ഷിതീഃ/
വാജദ്രവിണസോ ഗിരഃ/ 1540

27. അച്ഛാ നശ്ശീരശോചിഷം/ ഗിരോ യന്തു ദർശതം/
അച്ഛാ യജ്ഞാസോ നമസാ പുരോവസും/
പുരുപ്രശസ്തമൂതയേ/ 1541

28. അഗ്നിം സുനും സഹസാ ജാതവേദസം/
ദാനായ വാര്യാണാം/
ദ്വിതാ യോ/ ഭൂദമൃതോ മർത്യേഷ്വാ/
ഹോതാ മന്ദ്രതമോ വിശി/ 1542

29. അഗ്നിമീളിഷ്വാവസേ/ ഗാഥാഭിശ്ശീരശോചിഷം/
അഗ്നിം രായേ പുരുമീഢ ശ്രുതന്നരഃ/
അഗ്നിസ്സുദീതയേ ഛർദിഃ/ 1543

30. അഗ്നിന്ദ്വേഷോ യോതവൈ നോ ഗൃണീമസി/
അഗ്നിം ശയ്യോശ്ച ദാതവേ/
വിശ്വാസു വിക്ഷ്വവിതേവ ഹവ്യഃ/
ഭുവദ്വാസ്തുരൃഷ്ടൂണാം/ 1544

31. അദാഭ്യഃപുര ഏതാ/ വിശ്വാമഗ്നിർമാനുഷീണാം/
തൂർണീരഥസ്സുദാ നവഃ/ 1545

32. സാഹ്വാൻ വിശ്വാ അഭിയുജഃ/ ക്രതുർദേവാനാമമൃക്തഃ/
അഗ്നിസ്തുവിശ്രവസ്തമഃ/ 1546

33. അഭിപ്രയാംസി വാഹസാ/ ദാശ്വാം അശ്നോതി മർത്യഃ/
ക്ഷയം പാവകശോചിഷഃ/ 1547

34. അഗ്നേ വാജസ്യ ഗോമതഃ/ ഈശാനസ്സഹസോ യഹോ/
അസ്മേ ദേഹി ജാതവേദോ മഹിശ്രവഃ/ 1548

35. സ ഇധാനോ വസുഷ്കവിഃ/ അഗ്നിരീളേന്യോ ഗിരാ/
രേവദസ്മഭ്യം പുർവണീകദീദിഹി/ 1549

36. ക്ഷപോ രാജന്നുത ത്മനാ/ അഗ്നേ വസ്തോരുതോഷസഃ/
സതിഗ്മ ജംഭ രക്ഷസോ ദഹ പ്രതി/ 1550

37. വിശോ വിശോ വോ അതിഥിം/ വാജയന്തഃ പുരുപ്രിയം/
അഗ്നിം വോ ദുര്യം വചഃ/ സ്തുഷേ ശൂഷസ്യ മന്മഭിഃ/ 1551

38. യഞ്ജനാസോ ഹവിഷ്മന്തഃ/ മിത്രന്ന സർപിരാസുതിം/
പ്രശംസന്തി പ്രശസ്തിഭിഃ/ 1552

39. പന്യാംസഞ്ജാതവേദസം/ യോ ദേവതാത്യുദ്യതാ/
ഹവ്യാന്യൈരയദ്ദിവി/ 1553
40. സമിദ്ധമഗ്നിം സമിധാ ഗിരാ ഗൃണേ/
ശുചിം പാവകം പുരോ അധ്വരേ ധ്രുവം/
വിപ്രം ഹോതാരം പുരുവാരമദ്രുഹം/
കവിം സുമ്നൈരീമഹേ ജാതവേദസം/ 1554
41. ത്വാന്മൂതമഗ്നേ അമൃതയ്യുഗേ യുഗേ/
ഹവ്യവാഹന്തധിരേ പായുമീഡ്യം/
ദേവാസശ്ച മർതാസശ്ച ജാഗൃവിം/
വിഭും വിശ്പതിം നമസാ നിഷേദിരേ/ 1555
42. വിഭൂഷന്നഗ്ന ഉഭയം അനുവ്രതാ/
ദൂതോ ദേവാനാം രജസീ സമീയസേ/
യത്തേ ധീതിം സുമതിമാവൃണീമഹേ/
അധസ്മാനസ്ത്രിവരൂഥശ്ഛിവോ ഭവ/ 1556
43. ആ നോ യജ്ഞന്ദിവിസ്പൃശം/
വായോ യാഹി സുമന്മഭിഃ/
അന്തഃ പവിത്ര ഉപരി ശ്രീണാനഃ/
അയം ശുക്രോ അയാമി തേ/ 1557
44. പ്രേത്യധ്വര്യുഃ പഥിഭീരജിഷ്ഠൈഃ/
പ്രതി ഹവ്യാനി വീതയേ/
അധാ നിയുത്വ ഉഭയസ്യ നഃ പിബ/
ശുചിം സോമങ്ഗവാശിരം/ 1558
45. ഇന്ദ്ര ഇത്സോമപാ ഏകഃ/ ഇന്ദ്രസ്സുതപാ വിശ്വായുഃ/
അന്തർദേവാൻ മർത്യാംശ്ച/ 1559
46. ന യം ശുക്രോ ന ദുരാശീഃ/ ന തൃപ്രാ ഉരു വ്യചസം/
അപസ്പൃണ്വതേ സുഹാർദം/ 1560
47. ഗോഭിർയദീമന്യേ അസ്മത്/ മൃഗം ന വ്രാ മൃഗയന്തേ/
അഭിത്സരന്തി ധേനുഭിഃ/ 1561
48. ത്രയ ഇന്ദ്രസ്യ സോമാഃ/ സുതാസസ്സന്തു ദേവസ്യ/
സ്വ ക്ഷയേ സുതപാവ്ന്നഃ/ 1562
49. ത്രയഃ കോശാസശ്ചോതന്തി/ തിസ്രശ്ചമാസ്സുപൂർണാഃ/
സമാനേ അധി ഭാർമൻ/ 1563
50. ശുചിരസി പുരുനിഷ്ഠാഃ/ ക്ഷീരൈർമധ്യത ആ ശീർതഃ/
ദധ്നാ മന്ദിഷ്ഠംശ്ശൂരസ്യ/ 1564
51. ഇന്ദ്രായ സോമപാതവേ/ വൃത്രഘ്നേ പരിഷിച്യസേ/
നരേ ച ദക്ഷിണാവതേ/ വീരായ സദനാസദേ/ 1565
52. സ വായ്വജ്ഞേഷു മാനവീ/ ഇന്ദുർജനിഷ്ടരോദസീ/
ദേവോ ദേവീ ഗിരിഷ്ഠാഃ/ അസ്രേധന്തന്തുവിഷ്വണി/ 1566

53. തം സഖായഃ പുരൂരുചം/ യൂയം വയഞ്ച സൂരയഃ/
അ ശ്യാമ വാജഗന്ധ്യം/ സനേമ വാജപസ്ത്യം/ 1567
54. ആഘായേ അഗ്നിമിന്ധതേ/ സ്തൃണന്തി ബർഹിരാനുഷക്/
യേഷാമിന്ദ്രോ യുവാ സഖാ/ 1568
55. ബൃഹന്നിദിധ്മ ഏഷാം/ ഭൂരിശസ്തം പൃഥുസ്വരുഃ/
യേഷാമിന്ദ്രോ യുവാ സഖാ/ 1569
56. അയുദ്ധ ഇദ്യുധാവൃതം/ ശൂര ആജതി സത്വഭിഃ/
യേഷാമിന്ദ്രോ യുവാ സഖാ/ 1570
57. ഏതോന്വിന്ദ്രം സ്തവാമ/ സഖായ സ്തോമ്യന്നരം/
കൃഷ്ടീര്യോ വിശ്വാ അഭ്യസ്ത്യേക ഇത്/ 1571
58. അഗോരുധായ ഗവിഷേ/ ദ്യുക്ഷായ ദസ്മ്യം വചഃ/
ഘൃതാത്സ്വാദീയോ മധുനശ്ച വോചത/ 1572
59. യസ്യാമിതാനി വീര്യാ/ ന രാധഃ പര്യേതവേ/
ജ്യോതിർന വിശ്വമഭ്യസ്തി ദക്ഷിണാ/ 1573
60. സുമന്മാ വസ്വീ രന്തീ സൂനരീ/ 1574
61. സരൂപ വൃഷന്നാഗഹി/ ഇമൗ ഭദ്രൗ ധുരിയാവഭി/
താവിമാ ഉപസർപതഃ/ 1575
62. നീവ ശീർഷാണി മൃഢ്വം/ മധ്യ ആപസ്യ തിഷ്ഠതി/
ശൃങ്ഗേഭിർദശഭിർദിശൻ/ 1576

११०

१. अग्न आयूंषि पवसे। आसुवोर्जमिषञ्चनः। आरे बाधस्व दुच्छुनाम्।। १५१५
२. अग्ने पवस्व स्वपाः। अस्मेवर्चस्सुवीर्यम्। दधत्पोषं रयिम्मयि।। १५१६
३. अग्निरृषिःपवमानः। पाञ्चजन्यःपुरोहितः। तमीमहे महा गयम्।। १५१७
४. अग्ने पावकरोचिषा। मन्द्रया देवजिह्वया। आ देवान्वक्षि यक्षि च।। १५१८
५. सनःपावकदीदिवः। अग्ने देवम् इहावह। उप यज्ञं हविश्चनः।। १५१९
६. यो अग्निन्देववीतये। हविष्मं आ विवासति। तस्मै पावक मृडय।। १५२०
७. अग्निश्शुचिव्रततमः। शुचिर्विप्रश्शुचिः कविः। शुची रोचत आहुतः।। १५२१
८. उदग्ने शुचयस्तव। शुक्रा भ्राजन्त ईरते। तव ज्योतींष्यर्चयः।। १५२२
९. शुचिःपावकवन्द्यः। अग्ने बृहद्विरोचसे। त्वङ्घृतेभिराहुतः।। १५२३
१०. कस्ते जामिर्जनानाम्। अग्ने कोदाश्वध्वरः। को ह कस्मिन्नसि श्रितः।। १५२४
११. त्वञ्जामिर्जनानाम्। अग्ने मित्रो असि प्रियः। सखा सखिभ्य ईड्यः।। १५२५
१२. यजानो मित्रा वरुणा। यजा देवम् ऋतं बृहत्।
अग्ने यक्षि स्वन्दमम्।। १५२६

१३. ईळेन्यो नमस्यः। तिरस्तमांसि दर्शतः। समग्निरिध्यते वृषा।। १५२७
१४. वृषो अग्निरस्समिध्यते। अश्वो न देववाहनः। तं हविष्मन्त ईळते।। १५२८
१५. वृषणन्त्वा वयं वृषन्। वृषणरस्समिधीमहि। अग्ने दीद्यतं बृहत्।। १५२९
१६. उत्ते बृहन्तो अर्चयः। समिधानस्य दीदिवः। अग्ने शुक्रास ईरते।। १५३०
१७. उप त्वा जुह्वो मम। घृताचीर्यन्तु हर्यत। अग्ने हव्या जुषस्व नः।। १५३१
१८. मन्द्रं होतारमृत्विजम्। चित्रभानुं विभावसुम्। अग्निमीळे स उश्रवत्।। १५३२
१९. इनो राजन्नरतिस्समिद्धः। रौद्रो दक्षाय सुषुमम् अदर्शि।
चिकिद्विभाति भासा बृहता। असिक्नीमेति रुशतीमपाजन्।। १५३३
२०. कृष्णाय्यदेनीमभिवर्पसाभूत्। जनयन्योषां बृहतःपितुर्जाम्।
ऊर्ध्वं भानुं सूर्यस्यस्तभायन्। दिवो वसुभिररतिर्विभाति।। १५३४
२१. भद्रो भद्रया सचमान आगात्। स्वसारञ्जारो अभ्येति पश्चात्।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्। रुशद्भिर्वर्णैरभिराममस्थात्।। १५३५
२२. पाहि नो अग्न एकया। पाह्युत द्वितीयया।
पाहि गीर्भिस्तिसृभिरूर्जांपते। पाहि चतसृभिर्वसो।। १५३६
२३. पाहि विश्वस्माद्रक्षसो अराविण्णः। प्रस्न वाजेषु नोव।
त्वामिद्धि नेदिष्ठन्देवतातये। आपित्नक्षामहे वृधे।। १५३७
२४. कया ते अग्ने अङ्गिरः। ऊर्जो नपादुपस्तुतिम्। वराय देवमन्यवे।। १५३८
२५. दाशेम कस्य मनसा। यज्ञस्य सहसो यहो। कदुवोच इदन्नमः।। १५३९
२६. अधा त्वं हि नस्करः। विश्वा अस्मभ्यं सुक्षितीः। वाजद्रविणसो गिरः।। १५४०
२७. अच्छा नश्शीरशोचिषम्। गिरो यन्तु दर्शताम्।
अच्छा यज्ञासो नमसा पुरोवसुम्। पुरुप्रशस्तमूतये।। १५४१
२८. अग्निं सूनुं सहसा जातवेदसम्। दानाय वार्याणाम्।
द्विता यो भूदमृतो मर्त्येष्वा। होता मन्द्रतमो विशि।। १५४२
२९. अग्निमीळिष्वावसे। गाथाभिश्शीरशोचिषम्।
अग्निं राये पुरुमीढ श्रुतन्नरः। अग्निरस्सुदीतये छर्दिः।। १५४३
३०. अग्निन्द्वेषो योतवै नो गृणीमसि। अग्निं शय्योश्च दातवे।
विश्वासु विक्ष्ववितेव हव्यः। भुवद्वस्तुरृषूणाम्।। १५४४
३१. अदाभ्यःपुर एता। विश्वामग्निर्मानुषीणाम्। तूर्णीरथस्सदा नवः।। १५४५
३२. साह्वान् विश्वा अभियुजः। क्रतुर्देवानाममृक्तः। अग्निस्तुविश्रवस्तमः।। १५४६
३३. अभिप्रयांसि वाहसा। दाश्वं अश्नोति मर्त्यः। क्षयं पावकशोचिषः।। १५४७

३४.अग्ने वाजस्य गोमतः। ईशानस्सहसो यहो।
अस्मे देहि जातवेदो महिश्रवः।। १५४८
३५.स इधानो वसुष्कविः। अग्निरीळेन्यो गिरा।
रेवदस्मभ्यं पुर्वणीकदीदिहि।। १५४९
३६.क्षपो राजन्नुत त्मना। अग्ने वस्तोरुतोषसः।
सतिग्म जंभ रक्षसो दह प्रति।। १५५०
३७.विशो विशो वो अतिथिम्। वाजयन्तःपुरुप्रियम्।
अग्निं वो दुर्यं वचः। स्तुषे शूषस्य मन्मभिः।। १५५१
३८.यज्जनासो हविष्मन्तः। मित्रन्न सर्पिरासुतिम्। प्रशंसन्ति प्रशस्तिभिः।। १५५२
३९.पन्यांसज्जातवेदसम्। यो देवतात्युद्यता। हव्यान्यैरयद्दिवि।। १५५३
४०.समिद्धमग्निं समिधा गिरा गृणे। शुचिम्पावकं पुरो अध्वरे ध्रुवम्।
विप्रं होतारं पुरुवारमद्रुहम्। कविं सुम्नैरीमहे जातवेदसम्।। १५५४
४१.त्वान्दूतमग्ने अमृतय्युगे युगे। हव्यवाहन्दधिरे पायुमीड्यम्।
देवासश्च मर्तासश्च जागृविम्। विभुं विश्पतिं नमसा निषेदिरे।। १५५५
४२.विभूषन्नग्न उभयम् अनुव्रता। दूतो देवानां रजसी समीयसे।
यत्ते धीतिं सुमतिमावृणीमहे। अधस्मानस्त्रिवरूथश्शिवो भव।। १५५६
४३.आ नो यज्ञन्दिविस्पृशम्। वायो याहि सुमन्मभिः।
अन्तः पवित्र उपरि श्रीणानः। अयं शुक्रो अयामि ते।। १५५७
४४.वेत्यध्वर्युःपथिभी रजिष्ठैः। प्रति हव्यानि वीतये।
अधा नियुत्व उभयस्य नः पिबा। शुचिं सोमङ्गवाशिरम्।। १५५८
४५.इन्द्र इत्सोमपा एकः। इन्द्रस्सुतपा विश्वायुः। अन्तर्देवान् मर्त्यांश्च।। १५५९
४६.न यं शुक्रो न दुराशीः। न तृप्रा उरु व्यचसम्। अपस्पृण्वते सुहार्दम्।। १५६०
४७.गोभिर्यदीमन्ये अस्मत्। मृगं न व्रा मृगयन्ते। अभित्सरन्ति धेनुभिः।। १५६१
४८.त्रय इन्द्रस्य सोमाः। सुतासरस्सन्तु देवस्य। स्वे क्षये सुतपाव्नः।। १५६२
४९.त्रयः कोशासश्चोतन्ति। तिस्रश्चम्वास्सुपूर्णाः। समाने अधि भार्मन्।। १५६३
५०.शुचिरसि पुरुनिष्ठाः। क्षीरैर्मध्यत आ शीर्तः। दध्ना मन्दिष्ठश्शूरस्य।। १५६४
५१.इन्द्राय सोमपातवे। वृत्रघ्ने परिषिच्यसे।
नरे च दक्षिणावते। वीराय सदनासदे।। १५६५
५२.स वाय्यज्ञेषु मानवी। इन्दुर्जनिष्टरोदसी।
देवो देवी गिरिष्ठाः। अस्रेधन्तन्तुविष्वणि।। १५६६

५३. तं सखाय पुरूरुचम्। यूयं वयञ्च सूरयः।
अ श्याम वाजगन्ध्यम्। सनेम वाजपस्त्यम्।। १५६७
५४. आघाये अग्निमिन्धते। स्तृणन्ति बर्हिरानुषक्। येषामिन्द्रो युवा सखा।। १५६८
५५. बृहन्निदिध्म एषाम्। भूरिशस्तं पृथुस्वरुः। येषामिन्द्रो युवा सखा।। १५६९
५६. अयुद्ध इद्युधावृतम्। शूर आजति सत्वभिः। येषामिन्द्रो युवा सखा।। १५७०
५७. एतोन्विन्द्रं स्तवाम। सखाय स्तोम्यन्नरम्।
कृष्टीर्र्यो विश्वा अभ्यस्त्येक इत्।। १५७१
५८. अगोरुधाय गविषे। द्युक्षाय दस्म्यं वचः।
घृतात्स्वादीयो मधुनश्च वोचत।। १५७२
५९. यस्यामितानि वीर्या। न राधःपर्येतवे। ज्योतिर्न विश्वमभ्यस्ति दक्षिणा।। १५७३
६०. सुमन्मा वस्वी रन्ती सूनरी।। १५७४
६१. सरूप वृषन्नागहि। इमौ भद्रौ धुरियावभि। ताविमा उपसर्पतः।। १५७५
६२. नीव शीर्षाणि मृढ्वम्। मध्य आपस्य तिष्ठति। शृङ्गेभिर्दशभिर्दिशन्।। १५७६

1. അഗ്നേ വിശ്വേഭിരാഗഹി/ ദേവേഭിർഹവ്യദാതയേ/
ഹോതാരന്ത്വാ വൃണീമഹേ/ 1577
2. യജമാനായ സുന്വതേ/ ആഗ്നേ സുവീര്യം വഹ/
ദേവൈരാസത്സി ബർഹിഷി/ 1578
3. സമിധാനസ്സഹസ്രജിത്/ അഗ്നേ ധർമാണി പുഷ്യസി/
ദേവാനാന്ദൂത ഉക്ഥ്യഃ/ 1579
4. വിശ്വസ്യ ഹി പ്രചേതസാ/ വരുണമിത്രരാജഥഃ/
ഈശാനാ പിപ്യതന്ധിയഃ/ 1580
5. ആ നോ ഗന്തം രിശാദസാ/ വരുണമിത്രബർഹണാ/
ഉപേമഞ്ചാരുമധ്വരം/ 1581
6. ഉപനസ്സുതമാഗതം/ വരുണമിത്രദാശുഷഃ/
അസ്യ സോമസ്യ പീതയേ/ 1582
7. ആ നോ വിശ്വേഷാം രസം/ മധ്വസ്സിഞ്ചന്ത്വദ്രയഃ/
യേ പരാവതി സുന്വിരേ ജനേഷ്വാ/
യേ അർവാവതീന്ദവഃ/ 1583
8. വിശ്വാദ്വേഷാംസി ജഹി ചാപ ചാകൃധി/
വിശ്വേ സന്വന്ത്വാവസു/
ശീർഷ്ടേഷു ചിത്തേ മദിരാസോ അംശവഃ/
യത്രാ സോമസ്യ തൃംപസി/ 1584

9. ആ നോ വിശ്വാസു ഹവ്യം/ ഇന്ദ്രം സമത്സു ഭൂഷത/
ഉപ ബ്രഹ്മാണി സവനാനി വൃത്രഹൻ/ പരമജ്യാ ഋചീഷമ/ 1585
10. ത്വന്ദാതാ പ്രഥമോ രാധസാമസി/ ആസി സത്യ ഈശാനകൃത്/
തുവദ്യുമ്നസ്യ യുജ്യാ വൃണീമഹേ/പുത്രസ്യ ശവസോ മഹഃ/ 1586
11. യസ്യായം വിശ്വ ആര്യഃ/ ദാസശ്ശേവധിപാ അരിഃ/
തിരശ്ചിദര്യേ രുശമേ പവീരവി/ തുഭ്യേത്സോ അജ്യതേ രയിഃ/ 1587
12. തുരണ്യവോ മധുമന്തം ഘൃതശ്ചുതം/വിപ്രാസോ അർകമാനൃചുഃ/
അസ്മേ രയിഃ പപ്രഥേ വൃഷ്ണ്യംശവഃ/
അസ്മേ സ്വാനാസ ഇന്ദവഃ/ 1588
13. മന്ദ്രോ ഹോതാ ഗൃഹപതിഃ/ അഗ്നേ ദൂതോ വിശാമസി/
ത്വേ വിശ്വാ സങ്ഗതാനി വ്രതാ ധ്രുവാ/
യാനി ദേവാ അകൃണ്വത/ 1589
14. ത്വേ ഇദഗ്നേ സുഭഗേ യവിഷ്ഠ്യ/ വിശ്വമാഹൂയതേ ഹവിഃ/
സത്വന്നോ അദ്യ സുമനാ ഉതാപരം/
യക്ഷി ദേവാൻ സുവീര്യാ/ 1590
15. ദൂതം വോ വിശ്വവേദസം/ ഹവ്യവാഹമമർത്യം/
യജിഷ്ഠമൃഞ്ജസേ ഗിരാ/ 1591
16. സ ഹി വേദാ വസുധിതിം/ മഹം ആരോധനന്ദിവഃ/
സ ദേവം ഏഹ വക്ഷതി/ 1592
17. സ വേദ ദേവ ആനമം/ ദേവം ഋതായതേ ദമേ/
ദാതി പ്രിയാണി ചിദ്വസു/ 1593
18. രാജാ സിന്ധൂനാം അവസിഷ്ട വാസഃ/
ഋതസ്യ നാവമാരുഹദ്രജിഷ്ഠാം/
അപ്സു ദ്രപ്സോ വാവൃധേ ശ്യേന ജൂതഃ/
ദുഹ ഈം പിതാ ദുഹ ഈം പിതുർജാം/ 1594
19. സിംഹന്ന സന്തമധ്രോ അയാസം/
ഹരിമരുഷന്തിവോ അസ്യ പതിം/
ശൂരോ യുത്സു പ്രഥമ ഃ പൃച്ഛതേഗാഃ/
അസ്യ ചക്ഷസാ പരിപാത്യുക്ഷാ/ 1595
20. മധുപൃഷ്ഠം ഘോരമയാസമശ്വം/
രഥേ യുഞ്ജന്ത്യുരുചക്ര ഋഷ്വം/
സ്വസാര ഈജാമയോ മർജയന്തി/
സനാഭയോ വാജിനമൂർജയന്തി/ 1596
21. മാ ഭേമമാശ്രമിഷ്മ/ ഉഗ്രസ്യ സഖ്യേ തവ/
മഹത്തേ വൃഷ്ണോ അഭിചക്ഷ്യങ്കൃതം/
പശ്യേമ തുർവശയ്യദും/ 1597
22. സവ്യാമനുസ്ഫിഗ്യം വാവസേ വൃഷാ/
ന ദാനോ അസ്യ രോഷതി/

മധ്വാ സംപൃക്താസ്സ്താരഷ്ണ ധേനവഃ/
തൂയമേഹി ദ്രവാ പിബ/ 1598

23. സത്യമിത്താ വൃഷേദസി/ വൃഷജൂതിർനോവിതാ/
വൃഷാഹ്യുഗ്ര ശൃണ്വിഷേ പരാവതി/
വൃഷോ അർവാവതി ശ്രുതഃ/ 1599

24. വൃഷണസ്തേ അഭീശവഃ/ വൃഷാ കശാ ഹിരണ്യയീ/
വൃഷാ രഥോ മഘവന്വൃഷണാ ഹരീ/
വൃഷാ ത്വം ശതക്രതോ/ 1600

25. വൃഷാ സോതാ സുനോതു തേ/ വൃഷന്നൃജീപിന്നാഭര/
വൃഷാ ദധന്വേ വൃഷണന്നദീഷ്വാ/ തുഭ്യം സ്ഥാതർഹരീണാം/ 1601

26. ഇമാ ഉ ത്വാ പുരോവസോ/ ഗിരോ വർധന്തു യാ മമ/
പാവകവർണാശ്ശുചയോ വിപശ്ചിതഃ/ അഭ്രിസ്തോമൈരനൂഷത/ 1602

27. അയം സഹസ്രമൃഷിഭിസ്സഹസ്കൃതഃ/ സമുദ്ര ഇവ പപ്രഥേ/
സത്യസ്സോ അസ്യ മഹിമാ ഗൃണേ ശവഃ/
യജ്ഞേഷു വിപ്രരാജ്യേ/ 1603

28. അഞ്ജതേ വ്യഞ്ജതേ സമഞ്ജതേ/
ക്രതും രിഹന്തി മധ്വാഭ്യഞ്ജതേ/
സിന്ധോരുച്ഛ്വാസേ പതയന്തമുക്ഷണം/
ഹിരണ്യപാവാഃ പശുമപ്സു ഗൃഭ്ണതേ/ 1604

29. അഗ്രേഗോ രാജാപ്യസ്തവിഷ്യതേ/
വിമാനോ അഹ്നാം ഭുവനേഷ്വർപിതഃ/
ഹരിർഘൃതസ്നുസ്സുദൃശീകോ അർണവഃ/
ജ്യോതീരഥഃ പവതേ രായ ഓക്യഃ/ 1605

30. വിപശ്ചിതേ പവമാനായ ഗായത/ മഹീനധാരാത്യന്ധോ അർഷതി/
അഹിർന ജൂർണാമതി സർപതി ത്വചം/
അത്യോ നക്രീളന്നസരദ്വൃഷാ ഹരിഃ/ 1606

31. ദേവോ വോ ദ്രവിണോദാഃ/ പൂർണാം വിവഷ്ടാസിചം/
ഉദ്വാ സിഞ്ചധ്വമുപ വാ പൃണധ്വം/ ആദിദ്വോ ദേവ ഓഹതേ/ 1607

32. തം ഹോതാരമധ്വരസ്യ പ്രചേതസം/ വഹ്നിന്ദേവാ അകൃണ്വത/
ദധാതി രത്നം വിധതേ സുവീര്യം/ അഗ്നിർജനായ ദാശുഷേ/ 1608

33. അദർശി ഗാതുവിത്തമഃ/ യസ്മിൻ വ്രതാന്യാദധുഃ/
ഉപോഷു ജാതമാര്യസ്യ വർധനം/ അഗ്നിന്നക്ഷന്തു നോ ഗിരഃ/ 1609

34. യസ്മാദ്രേജന്ത കൃഷ്ടയഃ/ ചർകൃത്യാനി കൃണ്വതഃ/
സഹസ്രസാം മേധസാതാവിവത്മനാ/ അഗ്നിന്ധീഭിർനമസ്യത/ 1610

35. പ്ര ദൈവോ ദാസോ അഗ്നിഃ/ ദേവ ഇന്ദ്രോ ന മജ്മനാ/
അനുമാതരം പൃഥിവീം വിവാവൃതേ/
തസ്ഥൗ നാകസ്യ ശർമണി/ 1611

36. മധോർധാരാമനുക്ഷര/ തീവ്രസ്സധസ്ഥമാസദഃ/
ചാരുര്യതായ പീതയേ/ 1612
37. പ്ര നിമ്നേനേവ സിന്ധവഃ/ ഘ്നന്തോ വൃത്രാണി ഭൂർണയഃ/
സോമാ അസൃഗ്രമാശവഃ/ 1613
38. അഭിസ്വാനാസ ഇന്ദവഃ/ വൃഷ്ടയഃ പൃഥിവീമിവ/
ഇന്ദ്രം സോമാസോ അസ്വരൻ/ 1614
39. ഇമേ ത ഇന്ദ്ര സോമാഃ/ തീവ്രാ അസ്മേ സുതാസഃ/
ശുക്രാ ആശിര്യാചന്തേ/ 1615
40. തം ആശിരം പുരോഡാശം/ ഇന്ദ്രേമം സോമം ശ്രീണിഹി/
രേവന്തം ഹിത്വാ ശൃണോമി/ 1616
41. ഹൃത്സുപീതാസോ യുധ്യന്തേ/ ദുർമദാസോ നഃ സുരായാം/
ഊധർന നഗ്നാ ജരന്തേ/ 1617
42. പവമാന ഋതം ബൃഹത്/ ശുക്രഞ്ജ്യോതിരജീജനത്/
കൃഷ്ണാ തമാംസി ജങ്ഘനത്/ 1618
43. പവമാനോ രഥീതമഃ/ ശുഭ്രേഭിശ്ശുഭ്രശസ്തമഃ/
ഹരിശ്ചന്ദ്രോ മരുദ്ഗണഃ/ 1619
44. പവമാനവ്യശ്നുഹി/ രശ്മിഭിർവാജസാതമഃ/
ദധത്സ്തോത്രേ സുവീര്യം/ 1620
45. പ്ര സമ്രാജഞ്ചർഷണീനാം/ ഇന്ദ്രം സ്തോതാ നവ്യങ്ഗീർഭിഃ/
നരന്നൃഷാഹം മംഹിഷ്ഠം/ 1621
46. യസ്മിന്നുക്ഥാനി രണ്യന്തി/ വിശ്വാനി ച ശ്രവസ്യാ/
അപാമവോ ന സമുദ്രേ/ 1622
47. തം സുഷ്ടുത്യാവിവാസേ/ ജ്യേഷ്ഠരാജം ഭരേ കൃത്നും/
മഹോ വാജിനം സനിഭ്യഃ/ 1623
48. പ്രവാമർചന്ത്യുക്ഥിനഃ/ നീഥാവിദോ ജരിതാരഃ/
ഇന്ദ്രാഗ്നീ ഇഷ ആവൃണേ/ 1624
49. ഇന്ദ്രാഗ്നീ നവതിം പുരഃ/ ദാസപത്നീരധൂനുതം/
സാകമേകേന കർമണാ/ 1625
50. ഇന്ദ്രാഗ്നീ അപസസ്പരി/ ഉപപ്രയന്തി ധീതയഃ/
ഋതസ്യ പഥ്യാ അനു/ 1626
51. തോശാ വൃത്രഹണാ ഹുവേ/ സജിത്വാനാപരാജിതാ/
ഇന്ദ്രാഗ്നീ വാജസാതമാ/ 1627
52. പ്ര വ ഇന്ദ്രായ ബൃഹതേ/ മരുതോ ബ്രഹ്മാർചത/
വൃത്രം ഹനാതി വൃത്രഹാ ശതക്രതുഃ/
വജ്രേണ ശതപർവണാ/ 1628
53. അഭി പ്ര ഭര ധൃഷതാ ധൃഷന്മനഃ/ ശ്രവശ്ചിത്തേ അസദ്ബൃഹത്/
അർഷന്ത്യാപോ ജവസാ വിമാതരഃ/
ഹനോ വൃത്രഞ്ജയാസ്യഃ/ 1629

54. ഇന്ദ്രമിദ്ദേവതാതയേ/ ഇന്ദ്രം പ്രയത്യധ്വരേ/
ഇന്ദ്രം സമീകേ വനിനോ ഹവാമഹേ/
ഇന്ദ്രസ്ധനസ്യ സാതയേ/ 1630
55. ഇന്ദ്രോ മഹ്ന രോദസീ പപ്രഥച്ഛവഃ/
ഇന്ദ്രസ്സൂര്യമരോചയത്/
ഇന്ദ്രേഹ വിശ്വാ ഭുവനാനി യേമിരേ/
ഇന്ദ്രേ സ്വാനാസ ഇന്ദവഃ/ 1631
56. പ്ര തത്തേ അദ്യ ശിപിവിഷ്ട ഹവ്യം/
അര്യശ്ശംസാമി വയുനാനി വിദ്വാൻ/
തന്ത്വാ ഗൃണാമി തവസമതവ്യാൻ/
ക്ഷയന്തമസ്യ രജസഃപരാകേ/ 1632
57. കിമിത്തേ വിഷ്ണോ പരിചക്ഷ്യം ഭൂത്/
പ്രയദ്വവക്ഷേ ശിപിവിഷ്ടോ അസ്മി/
മാ വർപോ അസ്മദപഗൂഹ ഏതത്/
യദന്യരൂപസ്സമിഥേ ബഭൂഥ/ 1633
58. വഷട്തേ വിഷ്ണവാസ ആകൃണോമി/
തന്മേ ജുഷസ്വ ശിപിവിഷ്ടഹവ്യം/
വർധന്തു ത്വാ സുഷ്ടുതയോ ഗിരോ മേ/
യൂയം പാതസ്വസ്തിഭിസ്സദാനഃ/ 1634
59. വായോ ശുക്രോ അയാമി തേ/ മധ്വോ അഗ്രന്ദിവിഷ്ടിഷു/
ആയാഹി സോമപീതയേ/ സ്പാർഹോ ദേവ നിയുത്വതാ/ 1635
60. ഇന്ദ്രശ്ച വായവേഷാം/ സോമാനാം പീതിമർഹഥഃ/
യുവാം ഹി യന്തീന്ദവഃ/ നിമ്നമാപോ ന സധ്ര്യക്/ 1636
61. വായവിന്ദ്രശ്ച ശുഷ്മിണാ/ സരഥം ശവസസ്പതീ/
നിയുത്വന്താ ന ഊതയേ/ ആയാതം സോമപീതയേ/ 1637
62. അധക്ഷപാ പരിഷ്കൃതഃ/ വാജം അഭിപ്രഗാഹതേ/
യദീ വിവസ്വതോ ധിയഃ/ ഹരിം ഹിന്വന്തി യാതവേ/ 1638
63. തമസ്യ മർജയാമസി/ മദോ യ ഇന്ദ്ര പാതമഃ/
യങ്ഗാവ ആസഭിർദധുഃ/ പുരാ നൂനഞ്ച സൂരയഃ/ 1639
64. തങ്ഗാഥയാ പുരാണ്യാ/ പുനാനമഭ്യനൂഷത/
ഉതോ കൃപന്ത ധീതയഃ/ ദേവാനാന്നാമ ബിഭ്രതീഃ/ 1640
65. അശ്വന്നത്വാ വാരവന്തം/ വന്ദധ്യാ അഗ്നിന്നമോഭിഃ/
സമ്രാജന്തമധ്വരാണാം/ 1641
66. സഘാനസ്സൂനുശ്ശവസാ/ പൃഥു പ്ര ഗാ മാ സുശേവഃ/
മീഢ്വാം അസ്മാകം ബഭൂയാത/ 1642
67. സ നോ ദൂരാച്ചാസാച്ച/ നിമർത്യാദഘായോഃ/
പാഹി സദമിദ്വിശ്വായുഃ/ 1643

68. ന ഹി തേ അഗ്നേ തന്യൈ/ ക്രൂരം വിവേദ മർത്യഃ/
കപിർബഭസ്തി തേജനം/ പുനർജരായു ഗൗരിവ/ 1644
69. അഗ്നേ വിശ്വേഭിരഗ്നിഭിഃ/ ദേവേഭിർമഹയാ ഗിരഃ/
യജ്ഞേഷു യ ഉചാ യവഃ/ 1645
70. അഗ്നേ ദാദാശുഷേ രയിം/ വീരവന്തം പരീണസം/
ശിശീഹി നസ്സൂനുമതഃ/ 1646
71. അഗ്നേ സഹസ്യ പൃതനാഃ/ അഭിമാതീരപാസ്യ/
ദുഷ്ടരസ്തരന്നരാതീഃ/ വർചോധാ യജ്ഞവാഹസേ/ 1647
72. നദം വോ അദതീനാം/ നദയ്യോ യുവതീനാം/
പതിം വോ അഘ്ന്യാനാം/ ധേനൂനാമിഷുധ്യസി/ 1648
73. താ അസ്യ സൂദദോഹസഃ/ സോമം ശ്രീണന്തി പൃശ്ഞയഃ/
ജന്മന്ദേവാനാം വിശഃ/ ത്രിഷ്ടാ രോചനേ ദിവഃ/ 1649
74. അഗ്ന ആയാഹ്യഗ്നിഭിഃ/ ഹോതാരന്ത്വാ വൃണീമഹേ/
ആ ത്വാമനക്തു പ്രയതാ ഹവിഷ്മതീ/
യജിഷ്ഠം ബർഹിരാസദേ/ 1650
75. അച്ഛാ ഹിത്വാ സഹസസ്സൂനോ അങ്ഗിരഃ/ സ്രുചശ്ചരന്ത്യധ്വരേ/
ഊർജോനപാതം ഘൃതകേശമീമഹേ/
അഗ്നിം യജ്ഞേഷു പൂർവ്യം/ 1651

११११

१. अग्ने विश्वेभिरागहि। देवेभिर्हव्यदातये। होतारन्त्वा वृणीमहे।। १५७७
२. यजमानाय सुन्वते। आग्ने सुवीर्यं वह। देवैरासत्सि बर्हिषि।। १५७८
३. समिधानस्सहस्रजित्। अग्ने धर्माणि पुष्यसि। देवानान्दूत उक्थ्यः।। १५७९
४. विश्वस्य हि प्रचेतसा। वरुण मित्र राजथः। ईशाना पिप्यतन्धियः।। १५८०
५. आ नो गन्तं रिशादसा। वरुण मित्र बर्हणा। उपेमञ्चारुमध्वरम्।। १५८१
६. उपनस्सुतमागतम्। वरुण मित्र दाशुषः। अस्य सोमस्य पीतये।। १५८२
७. आ नो विश्वेषां रसम्। मध्वस्सिञ्चन्त्वद्रयः।
ये परावति सुन्विरे जनेष्वा। ये अर्वावतीन्दवः।। १५८३
८. विश्वाद्वेषांसि जहि चाप चाकृधि। विश्वे सन्वन्त्वावसु।
शीर्ष्टेषु चित्ते मदिरासो अंशवः। यत्रा सोमस्य तृंपसि।। १५८४
९. आ नो विश्वासु हव्यम्। इन्द्रं समत्सु भूषत।
उप ब्रह्माणि सवनानि वृत्रहन्। परमज्या ऋचीषम।। १५८५
१०. त्वन्दाता प्रथमो राधसामसि। असि सत्य ईशानकृत्।
तुविद्युम्नस्य युज्या वृणीमहे। पुत्रस्य शवसो महः।। १५८६

११. यस्यायं विश्व आर्यः। दासश्शेवधिपा अरिः।
तिरश्चिदर्ये रुशमे पवीरवि। तुभ्येत्सो अज्यते रयिः।। १५८७
१२. तुरण्यवो मधुमन्तं घृतश्चुतम्। विप्रासो अर्कमानृचुः।
अस्मे रयिःपप्रथे वृष्ण्यंशवः। अस्मे स्वानास इन्दवः।। १५८८
१३. मन्द्रो होता गृहपतिः। अग्ने दूतो विशामसि।
त्वे विश्वा सङ्गतानि व्रता ध्रुवा। यानि देवा अकृण्वत।। १५८९
१४. त्वे इदग्ने सुभगे यविष्ठ्य। विश्वमाहूयते हविः।
सत्वन्नो अद्य सुमना उतापरम्। यक्षि देवान् सुवीर्या।। १५९०
१५. दूतं वो विश्वेदसम् हव्यवाहममर्त्यम्। यजिष्ठमृञ्जसे गिरा।। १५९१
१६. स हि वेदा वसुधितिम्। महम् आरोधनन्दिवः। स देवं एह वक्षति।। १५९२
१७. स वेद देव आनमम्। देवम् ऋतायते दमे। दाति प्रियाणि चिद्वसु।। १५९३
१८. राजा सिन्धूनाम् अवसिष्ट वासः। ऋतस्य नावमारुहद्रजिष्ठाम्।
अप्सु द्रप्सो वावृधे श्येन जूतः। दुह ईं पिता दुह ईं पितुर्जाम्।। १५९४
१९. सिंहन्न सन्तमध्वो अयासम्। हरिमरुषन्दिवो अस्य पतिम्।
शूरो युत्सु प्रथमःपृच्छतेगाः। अस्य चक्षसा परिपात्युक्षा।। १५९५
२०. मधुपृष्ठं घोरमयासमश्वम्। रथे युञ्जन्त्युरुचक्र ऋष्वम्।
स्वसार ईं जामयो मर्जयन्ति। सनाभयो वाजिनमूर्जयन्ति।। १५९६
२१. मा भेममाश्रमिष्म। उग्रस्य सख्ये तव।
महत्ते वृष्णो अभिचक्ष्यङ्कृतम्। पश्येम तुर्वशय्यदुम्।। १५९७
२२. सव्यामनुस्फिग्यं वावसे वृषा। न दानो अस्य रोषति।
मध्वा संपृक्तास्सारघेण धेनवः। तूयमेहि द्रवा पिबा।। १५९८
२३. सत्यमित्था वृषेदसि। वृषजूतिर्नोविता।
वृषा ह्युग्र शृण्विषे परावति। वृषो अर्वावति श्रुतः।। १५९९
२४. वृषणस्ते अभीशवः। वृषा कशा हिरण्ययी।
वृषा रथो मघवन्वृषणा हरी। वृषा त्वं शतक्रतो।। १६००
२५. वृषा सोता सुनोतु ते। वृषन्नृजीपिन्नाभर।
वृषा दधन्वे वृषणन्नदीष्वा। तुभ्यं स्थातर्हरीणाम्।। १६०१
२६. इमा उ त्वा पुरोवसो। गिरो वर्धन्तु या मम।
पावकवर्णाश्शुचयो विपश्चितः। अभिस्तोमैरनूषत।। १६०२

२७.अयं सहस्रमृषिभिस्सहस्कृतः। समुद्र इव पप्रथे।
सत्यस्सो अस्य महिमा गृणे शवः। यज्ञेषु विप्रराज्ये।। १६०३
२८.अञ्जते व्यञ्जते समञ्जते। क्रतुं रिहन्ति मध्वाभ्यञ्जते।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणम्। हिरण्यपावाःपशुमप्सु गृभ्णते।। १६०४
२९.अग्रेगो राजाप्यस्तविष्यते। विमानो अह्नां भुवनेष्वर्पितः।
